शास्त्रसंदेश-४३

# स्तोत्रसंदेशमाला

सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि

१७



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४३

# स्तोत्र संदेशमाला-१७

## सम्यग्दृष्टिदेव-देवीनां स्तोत्राणि


: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



પ્રકાશક-પ્રાપ્તિ સ્થાન

શાસ્ત્રસંદેશ

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૧૭**

**सम्यग्दृष्टिदेव-देवीनां स्तोत्राणि**

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૮૮ + ૪

સ્તોત્ર : ૧૦૪ શ્લોક : ૨૦૧૩

**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૭-૧૮ ના
## દ્રવ્ય લાભાર્થી



## શ્રી શીતલનાથ જૈન શ્વે. મૂ.તપા. સંઘ
## ધનજીવાડી મલાડ (પૂર્વ)

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલ શ્રુતભક્તિની*
*શાસ્ત્રસંદેશ ભૂરિ ભૂરિ*
*અનુમોદના કરે છે.*
*ટ્રસ્ટીગણ ના અમો*
*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*



**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ
*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | अन्तः कुण्डलिनि प्रसुप्तभुज- | पू.आ. श्री बप्पभट्टसूरि | १ |
| २ | कलमरालविहङ्गमवाहना | पू.आ. श्री बप्पभट्टसूरि | ३ |
| ३ | कला काचित् कान्ता न | पू. आ. श्री मुनिसुन्दरसूरि | ५ |
| ४ | आराद्धा श्रद्धया सम्यग्- | पू. आ. श्री मुनिसुन्दरसूरि | ७ |
| ५ | जगदीशं जिनं देवमभिवन्द्या- | पू. आ. श्रीमल्लिषेणाचार्य | ८ |
| ६ | वाग्देवते भक्तिमतां स्वशक्ति- | पू. आ. श्री जिनप्रभसूरि | १९ |
| ७ | ॐ नमस्त्रिदशवन्दितक्रमे ! | पू. आ. श्री जिनप्रभसूरि | २० |
| ८ | यन्नामस्मृतिरप्यशेषजगती- | पू.आ.श्री रत्नसिंहसूरि | २२ |
| ९ | सरभसलसद्-भक्तिप्रह्वी- | पू.आ.श्री जिनवल्लभसूरि | २३ |
| १० | अथैकदा विश्वविहङ्गवंशो- | पू.आ.श्री बालचन्द्रसूरि | २८ |
| ११ | श्रीमाता श्रुतदेवता भगवती, | पू.आ.श्री विजयरत्नसूरि | ३० |
| १२ | प्रणमतानर्गलज्ञानसञ्जीवनीं | पू.उपा.श्री यशोविजयजी | ३३ |
| १३ | वपुः कूर्माकारं हरिरनुचकार | पू.मु. श्री पद्मसुन्दरकवि | ३४ |
| १४ | जय जय वागीशे जये दात्रि | पू.मु. श्री जयवर्धनक वि. | ४५ |
| १५ | हरिहरदात्राद्या जगदभिवाद्या- | पू.मु. श्री जयवर्धनक वि. | ४५ |
| १६ | सम्पूर्णशीतद्युति वक्त्रकान्ते ! | पू. पं. दानविजयमुनिवर्य | ४७ |
| १७ | ॐ ह्रीँ श्री प्रथमा प्रसिद्ध- | पू.मु. श्री मुक्तिविमलगणि | ४९ |
| १८ | श्रीमत्यम्बे ! नमस्ते भगवति ! | पू.मु. श्री लक्ष्मीविजयजी | ५१ |
| १९ | जननमृत्यु-जराक्षयकारणं | पू. श्री मलयकीर्तिमुनीश्वर | ५५ |
| २० | सकललोकसुसेवितपत्कजा | पू. श्री सुमतिसागरमुनि | ५६ |
| २१ | श्री शारदा शास्त्रसुबुद्धिदाता, | पू.मु. श्री साधुकीर्ति | ५७ |
| २२ | नमोऽस्तु वचनं श्रुत्वा देहस्थाः | पू.श्री सागरमुनि | ५८ |
| २३ | जयत्यशेषामरमौलिलालितं | पू. आचार्य श्री पद्मनन्दी | ६० |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २४ | सद्भावभासुर-सुरासुरवन्द्य- | श्री रत्नवर्धनकविम् | ६५ |
| २५ | धिषणा धीर्मतिर्मेधा वाग् | श्री वस्तुपालमन्त्री | ७० |
| २६ | व्योमव्याप्तमिवैन्दवेन महसा | श्री वस्तुपालमन्त्री | ७२ |
| २७ | ॐ ह्रीं अर्हँ मुखाम्भोज- | | ७४ |
| २८ | सकल-मङ्गल-वृद्धिविधायि | | ७५ |
| २९ | त्वं शारदादेवि ! समस्तशारदा, | | ७७ |
| ३० | व्याप्ताऽनन्त-समस्तलोक- | साध्वीशिवार्या | ७८ |
| ३१ | राजते श्रीमती देवता भारती, | | ८० |
| ३२ | ज्ञानानन्दकरी सदा सुखकरी | | ८२ |
| ३३ | ॐ ऐँ ह्रीँ श्रीँ मन्त्ररुपे विबुध- | | ८३ |
| ३४ | प्राग् वाग्देवी जगज्जनोप- | | ८५ |
| ३५ | वाग्वादिनी नमस्तुभ्यं वीणा- | | ८७ |
| ३६ | चन्द्रार्ककोटिघटितोज्ज्वल- | | ८८ |
| ३७ | नमामि भारतीं देवीं चतुर्भुजां | | ८९ |
| ३८ | नमस्ते शारदादेवी काश्मीर- | | ९० |
| ३९ | शारदा विजया नन्दा जया | | ९१ |
| ४० | शब्दात्मिका या त्रिजगद्- | | ९३ |
| ४१ | त्रिजगदीश जिनेन्द्रमुखोद्भवा, | | ९५ |
| ४२ | ये त्वाम्पाण्डुर पुण्डरीक पटल | | ९७ |
| ४३ | सौन्दर्योदारकौन्दद्युतिधरवपुषं | | ९८ |
| ४४ | श्वेतपद्मासनादेवी श्वेतपुष्पाभि- | | १०० |
| ४५ | हिमकरकरहारनीहारहीराट्ट- | | १०० |
| ४६ | सर्व्वज्ञवाणी जयतात् सर्व- | | १०१ |
| ४७ | कश्चिज्जनो लज्जितहृज्जडिम्ना | | १०३ |
| ४८ | नमो सरय-ससि-सरिस- | | १२२ |
| ४९ | पूर्वं पूर्वाभिमुखः स्नातः शुभ- | पू.आ.श्री चन्द्रसूरि | १२४ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ५० | कमठोपसर्गदलनं त्रिभुवननाथं | पू.आ.श्री मल्लिषेणसूरि | १४२ |
| ५१ | ॐ जयन्तीभमातङ्गी सर्वदुष्ट- | श्री धराचार्य | १७३ |
| ५२ | चिदानन्दसंपद्विलासैकदक्षः | पू.मु.श्री क्षमाकल्याणगणि | १७४ |
| ५३ | पद्मावती महादेवी, सर्वदुष्ट- | | १७५ |
| ५४ | श्रेयस्तनोतु धरणाभिधनाग- | | १७६ |
| ५५ | भगवन्! सर्वमाख्यातं मन्त्रं | | १७९ |
| ५६ | ॐ ॐ ॐकारबीजं त्रिभुव- | | १८१ |
| ५७ | जय जय जगदानन्ददायिनि ! | | १८६ |
| ५८ | नमः श्रीपार्श्वनाथाय मोक्ष- | | १८७ |
| ५९ | श्रीमद्गीर्वाणचक्रस्फुटमुकुट- | | १९४ |
| ६० | ॐ नमो भगवति ! त्रिभुवन- | | २०४ |
| ६१ | ॐ नमो नेकान्त दुर्वार मत | | २०५ |
| ६२ | जिनशासन अवधारि करेवि | पू. आ. श्रीजिनप्रभसूरि | २०८ |
| ६३ | पणमवि सवि अरिहंत मुणिंद | | २१२ |
| ६४ | जय श्रीमद्युगादीशपदपद्म- | पू.आ.श्री मुनिसुन्दरसूरि | २१४ |
| ६५ | श्रीचक्रेश्वरि चक्रचुम्बितकरे | पू. आ. श्री जिनदत्तसूरि | २१५ |
| ६६ | श्रीचक्रे ! चक्रभीमे ! ललित- | | २१७ |
| ६७ | देवगन्धर्वविद्याधरैर्वन्दिते जय | पू.आ.श्री जिनेश्वरसूरि | २१९ |
| ६८ | पुण्ये गिरीशशिरसि प्रथिताव- | श्री वस्तुपालमन्त्री | २२० |
| ६९ | व्यालोलालम्बमानप्रवणरण- | | २२२ |
| ७० | ॐ महातीर्थरैवतगिरिमण्डने ! | | २२४ |
| ७१ | नमोऽस्तु महामाये, श्रीपीठे | | २२५ |
| ७२ | आद्यं प्रणवसंयुक्तं, माया | | २२९ |
| ७३ | शतमष्टोत्तरं नाम्ना, कमलाया | | २३० |
| ७४ | ॐ नीरनिरमल-सुगन्ध चन्दन | | २३२ |
| ७५ | अथ वक्ष्ये मुनीश्वर ! कवचं | | २३३ |
| ७६ | जयधूम्रभीमाकारा सहस्रवदना- | | २३६ |
| ७७ | आदौ सती सुभद्रा च, पातु | | २३८ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ७८ | सर्व कल्याण जनकं, क्षुद्रो- | | २३९ |
| ७९ | गोवाहना कुन्द समानवर्णा, | | २३९ |
| ८० | मन्त्राधिराजवलये विमले | | २४१ |
| ८१ | संखक्खमाल धणुबाण च | | २४३ |
| ८२ | जिणशासनं च नमिऊण | | २४६ |
| ८३ | सुरराजैः चतुःषष्ठ्या, स्तूय- | पू.आ.श्री मुनिसुन्दरसूरि | २४७ |
| ८४ | जय श्रीगणभृन्मन्त्रविद्यास्थान- | पू.आ.श्री मुनिसुन्दरसूरि | २४८ |
| ८५ | श्री शारदे ! नमस्तुभ्यं जगद्- | | २४९ |
| ८६ | ह्रीङ्कारोदरवाग्भवैकवसतिर्या | | २५६ |
| ८७ | ॐ ह्रीं दिव्ययोगी १ महायोगी | | २५९ |
| ८८ | चउवीसंपि जिणिंदे वंदिय | पू.आ.श्री रत्नसिंहसूरि | २६१ |
| ८९ | श्रीमत्पार्श्वजिनेन्द्रस्य पदपद्म- | | २६२ |
| ९० | नमिऊण पासनाहं असुरिंद- | | २६४ |
| ९१ | प्रणवहृदि यदीयं नाम माया- | पू. आ.श्री देवसूरीश्वर | २६७ |
| ९२ | श्रीमन्त्रपीठनाम्नि प्रतिष्ठितं | पू.आ.श्री मुनिसुन्दरसूरि | २६९ |
| ९३ | पञ्चमे गणभृद्विद्यापीठे श्रीमन्त्र- | पू.आ.श्री मुनिसुन्दरसूरि | २७० |
| ९४ | श्रीमद्युगादिजिनपूजनबद्धकक्षः | श्री वस्तुपालमन्त्री | २७१ |
| ९५ | माणिभद्रं सुरैः पूज्यं, निर्जरं | | २७३ |
| ९६ | ॐ ह्रीँ श्री माणिभद्र इन्द्र ! | | २७७ |
| ९७ | ॐ नमामि माणिभद्रं, वंदे | | २७८ |
| ९८ | शीर्षे फणीन्द्रं गजचर्मराजितं, | | २७८ |
| ९९ | थोसामि जिणे जेहि उ विन्नविया | | २८० |
| १०० | सख्ये सत्यपि दहनाद्रक्षति | पू.मु.श्री धर्मवर्द्धनगणि | २८२ |
| १०१ | प्रथम प्रणव मायाबीजं श्रियं | | २८३ |
| १०२ | संपूजयेत् ततो वास्तुं, स्वासनं | | २८४ |
| १०३ | ॐतरुणोग्रतरकरविसर- | | २८६ |
| १०४ | पद्मप्रभुजिनाधीशं | पू.आ.श्री भद्रबाहुस्वामि | २८८ |

पू.आ. श्री बप्पभट्टसूरिकृतम्

# १. ॥ श्रीसरस्वतीकल्पस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

अन्तः कुण्डलिनि प्रसुप्तभुजगाकारस्फुरद्विग्रहां,
शक्तिं कुण्डलिनीं विधाय मनसा हुङ्कारदण्डाहताम् ।
षट्चक्राणि विभिद्य शुद्धमनसां प्रद्योतनद्योतनीं,
लीनां ब्रह्मपदे शिवेन सहितामेकत्र लीनां स्तुमः ॥ १

कन्दात् कुण्डलिनि ! त्वदीयवपुषा निर्गत्य तन्तुत्विषा,
किञ्चिच्चुम्बितमम्बुजं शतदलं त्वद्ब्रह्मरन्ध्रादधः ।
यश्चन्द्रद्युति ! चिन्तयत्यविरतं भूयोऽत्र भूमण्डले,
तन्मन्ये कविचक्रवर्तिपदवीच्छत्रच्छलाद् वल्गति ॥ २

यस्त्वद्वक्त्रमृगाङ्कमण्डलमिलत्कान्तिप्रतानोच्छल-
च्चञ्चच्चन्द्रकचक्रचित्रितककुप्कन्याकुलं ध्यायति ।
वाणी वाणिविचित्रभङ्गुरपद-प्रागल्भ्यशृङ्गारिणी,
नृत्यत्युन्मदनर्तकीव सरसं त्वद्वक्त्ररङ्गाङ्गणे ॥ ३

देवि ! त्वद्धृतचन्द्रकान्तकरकश्च्योतत्सुधानिर्झर-
स्नानानन्दतरङ्गितः पिबति यः पीयूषधारारसम् ।
तारालङ्कृतचन्द्रशक्तिकुहरेणाकण्ठमुत्कण्ठितो,
वक्त्रेणोद्गिरतीव तं पुनरसौ वाणीविलासच्छलात् ॥ ४

क्षुभ्यत्क्षीरसमुद्रनिर्गतमहाशेषाहिलोलत्फणा-
पत्रोन्निद्रसितारविन्दकुहरैश्चन्द्रस्फुरत्कर्णिकैः ।
देवि ! त्वां च निजं च पश्यति वपुर्यः कान्तिभिन्नान्तरं,
ब्राह्मि ! ब्रह्मपदस्य वल्गति वचः प्रागल्भ्यदुग्धाम्बुधेः ॥ ५

नाभीपाण्डुरपुण्डरीककुहराद् हृत्पुण्डरीके गलत्-
पीयूषद्रववर्षिणि ! प्रविशतीं त्वां मातृकामालिनीम् ।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यया,
निर्ग्रन्थोऽपि शतान्यपि ग्रथयति ग्रन्थायुतानां नरः ॥ ६

त्वां मुक्तामयसर्वभूषणधरां शुक्लाम्बराडम्बरां,
गौरीं गौरिसुधान्तरङ्गधवलामालोक्य हृत्पङ्कजे ।
वीणापुस्तकमौक्तिकाक्षवलयश्वेताब्जवल्गत्करां,
न स्यात् कः शुचिवृत्त-चक्ररचनाचातुर्यचिन्तामणिः ॥ ७

पश्येत् स्वां तनुमिन्दुमण्डलगतां त्वां चाभितो मण्डितां,
यो ब्रह्माण्डकरण्डपिण्डितसुधाडिण्डीरपिण्डैरिव ।
स्वच्छन्दोद्गतगद्यपद्यलहरी लीलाविलासामृतैः,
सानन्दास्तमुपाचरन्ति कवयश्चन्द्रं चकोरा इव ॥ ८

तद्वेदान्तशिरस्तदोङ्कृतिमुखं तत् तत्कलालोचनं,
तत्तद्वेदभुजं तदात्महृदयं तद्गद्यपद्यांऽह्रि च ।
यस्त्वद्वर्ष्म विभावयत्यविरतं वाग्देवि ! तद् वाङ्मयं,
शब्दब्रह्मणि निष्ठितः सः परमब्रह्मैकतामश्नुते ॥ ९

वाग्बीजं स्मरबीजवेष्टितमतो ज्योतिःकलाभृद्बहि-
रष्टद्वादश-षोडशद्विगुणितं द्व्यष्टाब्जपत्रान्वितम् ।
तद्बीजाक्षरकादिवर्णरचितान्यग्रे दलस्यान्तरे,
हंसः कूटयुतं भवेदवितथं यन्त्रं तु सारस्वतम् ॥ १०

ॐ ह्रीं श्रीं स(ह)ह्रीं सबीजकलितां वाग्वादिनीदेवतां,
गीर्वाणासुरपूजितामनुदिनं काश्मीरदेशे भवाम् ।

अश्रान्तं निजभक्तिशक्तिवशतो यो ध्यायति प्रस्फुटं,
बुद्धिज्ञानविचारसारसहितः स्याद् देव्यसौ साम्प्रतम् ॥ ११

स्मृत्वा मन्त्रं सहस्रच्छदकमलमनुध्याय नाभीहृदोत्थं,
श्वेतस्निग्धोर्ध्वनालं हृदि च विकचतां बाष्प निर्यातमास्यात् ।
तन्मध्ये चोर्ध्वरूपामभयदवरदां पुस्तकाम्भोजपाणिं,
वाग्देवीं त्वन्मुखाच्च स्वमुखमनुगतां चिन्तयेदक्षरालीम् ॥१२
(स्रग्धरा)

किमिह बहुविकल्पैर्जल्पितैर्यस्य कण्ठे,
भवति विमलवृत्तस्थूलमुक्तावलीयम् ।
भवति भवति ! नाथे ! भव्यभाषाविशेषै-
र्मधुरमधुसमृद्धस्तस्य वाचां विशेषः ॥ (मालिनी) १३

पू.आ. श्री बप्पभट्टसूरिकृतः

## २. ॥ अनुभूतसिद्धसारस्वतस्तवः ॥

(द्रुतविलम्बित)

कलमरालविहङ्गमवाहना सितदुकूल-विभूषणलेपना ।
प्रणतभूमिरुहामृतसारिणी प्रवरदेह-विभाभरधारिणी ॥ १

अमृतपूर्णकमण्डलुधारिणी त्रिदशदानव-मानवसेविता ।
भगवती परमैव सरस्वती मम पुनातु सदा नयनाम्बुजम् ॥ २

जिनपतिप्रथिताखिलवाङ्मयी गणधराननमण्डपनर्तकी ।
गुरुमुखाम्बुज-खेलनहंसिका विजयते जगति श्रुतदेवता ॥ ३

अमृतदीधिति-बिम्बसमाननां त्रिजगति जननिर्मितमाननाम् ।
नवरसामृतवीचि-सरस्वतीं प्रमुदितः प्रणमामि सरस्वतीम् ॥४

विततकेतकपत्र-विलोचने विहितसंसृति-दुष्कृतमोचने ।
धवलपक्षविहङ्गमलाञ्छिते जय सरस्वति ! पूरितवाञ्छिते ॥५

भवदनुग्रहलेशतरङ्गितास्तदुचितं प्रवदन्ति विपश्चितः ।
नृपसभासु यतः कमलाबला-कुचकलाललनानि वितन्वते ॥६

गतधना अपि हि त्वदनुग्रहात् कलितकोमल-वाक्यसुधोर्मयः ।
चकितबालकुरङ्गविलोचना जनमनांसि हरन्तितरां नराः ॥ ७

करसरोरुह-खेलनचञ्चला तव विभाति वरा जपमालिका ।
श्रुतिपयोनिधिमध्यविकस्वरोज्ज्वल-तरङ्गकलाग्रह-साग्रहा ॥८

द्विरदकेसरिमारिभुजङ्गमासहनतस्कररराजरुजां भयम् ।
तव गुणावलिगानतरङ्गिणां न भविनां भवति श्रुतदेवते ॥ ९

ॐ ह्रीँ क्लीँ ब्लूँ ततः श्रीँ तदनु हसकलह्रीँ अथो ऐँ नमोऽन्ते,
लक्षं साक्षाज्जपेद् यः करसमविधिना सत्तपा ब्रह्मचारी ।
निर्यान्तीं चन्द्रबिम्बात् कलयति मनसा त्वां जगच्चन्द्रिकाभां,
सोऽत्यर्थं वह्निकुण्डे विहितघृतहुतिः स्याद्दशांशेन विद्वान् ॥१०

रे रे लक्षणकाव्यनाटककथाचम्पूसमालोकने
क्वायासं वितनोषि बालिश मुधा किं नम्रवक्त्राम्बुजः ।
भक्त्याराधय मन्त्रराजसहितां दिव्यप्रभां भारतीं
येन त्वं कवितावितानसविताद्वैतप्रबुद्धायसे ॥ ११

चञ्चच्चन्द्रमुखी प्रसिद्धमहिमा स्वाच्छन्द्यराज्यप्रदा-
ऽनायासेन सुरासुरेश्वरगणैरभ्यर्चिता भक्तितः ।

देवी संस्तुतवैभवा मलयजालेपाङ्गरङ्गद्युतिः
सा मां पातु सरस्वती भगवती त्रैलोक्यसञ्जीवनी ॥ १२

स्तवनमेतदनेकगुणान्वितं पठति यो भविकः प्रमनाः प्रगे ।
स सहसा मधुरैर्वचनाऽमृतैर्नृपगणानपि रञ्जयति स्फुटम् ॥१३

ॐ ह्रीँ क्लीँ ब्लूँ श्रीँ हसकल ह्रीँ ऐँ नमः ।

सहस्रावधानी पू. आ. श्री मुनिसुन्दरसूरिकृतम्

## ३. ॥ श्रीशारदास्तवाष्टकम् ॥

कला काचित् कान्ता न विषयमिता वाङ्मनसयोः,
समुन्मीलत्सान्द्रानुपरम-चिदानन्दविभवा ।
निरूपा योगीन्द्रैः सुविशदधिया यात्यवहितै-,
रियं रूपं यस्याः श्रुतजलधिदेवी जयति सा ॥(शिखरणी) १

(शार्दुलविक्रीडितम्)

चञ्चत्कुण्डलिनीविरुद्धपवनप्रोद्दीपितप्रस्फुरत्-,
प्रत्यग्ज्योतिरिताशु भासितमहा हृत्पद्मकोशोदरे ।
शुद्धध्यानपरम्परापरिचिता रंरम्यते योगिना,
या हंसीव मयि प्रसत्तिमधुरा भूयादियं भारती ॥ २

या पूज्या जगतां गुरोरपि गुरुः सर्वार्थपावित्र्यसूः,
शास्त्रादौ कविभिः समीहितकरी संस्मृत्य या लिख्यते ।
सत्तां वाङ्मयवारिधेश्च कुरुतेऽनन्तस्य या व्यापिनीं,
वाग्देवी विदधातु सा मम गिरां प्रागल्भ्यमत्यद्भुतम् ॥ ३

नाभिकन्दसमुद्गता लयवती या ब्रह्मरन्ध्रान्तरे,
शक्तिः कुण्डलिनीति नाम विदिता काऽपि स्तुता योगिभिः ।

प्रोन्मीलन्निरुपाधिबन्धुरपदाऽऽनन्दामृतस्त्राविणी,
सूते काव्यफलोत्करान् कविवरैर्नीता स्मृतेर्गोचरम् ॥ ४

या नम्या त्रिदशेश्वरैरपि नुता ब्रह्मेशनारायणै-
र्भक्तेर्गोचरचारिणी सुरगुरोः सर्वार्थसाक्षात्करी ।
बीजं सृष्टिसमुद्भवस्य जगतां शक्तिः परा गीयते,
सा माता भुवनत्रयस्य हृदि मे भूयात् स्थिरा शारदा ॥ ५

तादात्म्येन समस्तवस्तुनिकरान् स्याद् व्याप्य या संस्थिता
निर्व्यापारतया भवेदसदिवाशेषं जगद् यां विना ।
वीणा-पुस्तक-भृन्मराल-ललितं धत्ते च रूपं बहिः,
पूजार्हं भुवनत्रयस्य विशदज्ञानस्वरूपाऽपि या ॥ ६

साक्षेपं प्रतिपन्थिनोऽपि हि मिथः पस्पर्द्धुः कन्धोद्धुराः,
सर्वे वादिगणाः सतत्त्वममलां यां निर्विवादं श्रिताः ।
विश्वव्यापितया नया अपि समे लीना यदन्तर्गताः,
सार्हद्वक्त्रसुधातटाकविरला वाग्देवता पातु माम् ॥ ७

विश्वव्यापिमहत्त्वभागपि कवीन् हृत्पद्मकोशस्थिता,
या दुष्पारसमग्रवाङ्मयसुधाऽम्भोधिं समुत्तारयेत् ।
भित्त्वा मोहकपाटसम्पुटतरं धृत्वा प्रसत्तिं परां,
देयाद् बोधिमनुत्तरां भगवती श्रीभारती सा मम ॥ ८

इत्यानन्दचिदात्मिकां भगवतीं श्रीभारतीं देवतां,
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमां यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फुर्जत्प्रमोदाद्वयो,
मोहद्वेषजयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ ९

पू. आ. श्री मुनिसुन्दरसूरि-विरचितम्

# ४. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुप्)

आराद्धा श्रद्धया सम्यग्ज्ञानादि-विजयश्रियम् ।
ददती जगतां मातर्जय भारति देवते ! ॥ १

चतुर्वरदवीणाक्ष-सूत्रपुस्तकभृद्भुजे ।
मरालवाहने शक्र-क्रियमाणाश्रयस्तवे ॥ २

आद्ये श्रीसूरिमन्त्रस्य विद्यापीठे पदे स्थिते ।
श्रीमद्गौतमपादाब्जपरिचर्यामरालिके ॥ ३

श्रीजिनेन्द्रमुखाम्भोज-विलासं वसते सदा ।
जिनागमसुधाम्भोधिमध्यासिनि विधुद्युते ॥ (कलापकम्) ४

कविहृत्कमला क्रीडप्रबोधतरणिप्रभे ।
प्रसीद भगवत्याशु देहि भारति मेऽर्थितम् ॥ ५

ऐँ नमः प्रमुखैर्मन्त्रैराराध्ये विश्वदेवते ।
अरुन्मणिलताजैत्र-प्रभावसुभगे जय ॥ ६

आराध्या दर्शनैः सर्वैः सकलाभीष्टदायिनी ।
रातु बोधिं विशुद्धां मे वाग्देवी जिनभक्तिभृत् ॥ ७

स्तूयमाने महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयापि मे देहि प्रार्थितं श्रीसरस्वती ॥ ८

पू. आ. श्रीमल्लिषेणसूरिविरचितः

# ५. ॥ श्रीसरस्वतीमन्त्रकल्पः ॥

(अनुष्टुप्)

जगदीशं जिनं देवमभिवन्द्याभिशङ्करम् ।
वक्ष्ये सरस्वतीकल्पं समासायाल्पमेधसाम् ॥ १

अभयज्ञानमुद्राक्षमालापुस्तकधारिणी ।
त्रिनेत्रा पातु मां वाणी जटाबालेन्दुमण्डिता ॥ २

लब्धवाणीप्रसादेन मल्लिषेणेन सूरिणा ।
रच्यते भारतीकल्पः स्वल्पजाप्यफलप्रदः ॥ ३

दक्षो जितेन्द्रियो मौनी देवताराधनोद्यमी ।
निर्भयो निर्मदो मन्त्री शास्त्रेऽस्मिन् स प्रशस्यते ॥ ४

पुलिने निम्नगातीरे पर्वतारामसङ्कुले ।
रम्यैकान्तप्रदेशे वा हर्म्ये कोलाहलोज्झिते ॥ ५

तत्र स्थित्वा कृतस्नानः प्रत्यूषे देवतार्चनम् ।
कुर्यात् पर्यङ्कयोगेन सर्वव्यापारवर्जितः ॥ ६

तेजोवदद्वयस्याग्रे लिखेद् वाग्वादिनीपदम् ।
ततश्च पञ्च शून्यानि पञ्चसु स्थानकेष्वपि ॥ ७

ॐ वद वद वाग्वादिनी ह्राँ हृदयाय नमः । ॐ वद वद वाग्वादिनी ह्रीं शिरसे नमः । ॐ वद वद वाग्वादिनी ह्रूं शिखायै नमः । ॐ वद वद वाग्वादिनी ह्रौँ कवचाय नमः । ॐ वद वद वाग्वादिनी ह्रः अस्त्राय नमः । इति सकलीकरणं विधातव्यम् ।

रेफैर्ज्वलद्भिरात्मानं दग्धमग्निपुरस्थितम् ।
ध्यायेदमृतमन्त्रेण कृतस्नानस्ततः सुधीः ॥ ८

ॐ अमृते ! अमृतोद्भवे ! अमृतवर्षिणि ! अमृतं स्रावय स्रावय सं सं ह्रीं ह्रीं क्लौं क्लौं ब्लूँ ब्लूं द्रां द्रां द्रीं द्रीं द्रूं द्रूं द्रावय द्रावय स्वाहा । स्नानमन्त्रः । विनयमहा ।

ॐ ह्रीं पद्मयशसे योगपीठाय नमः । पीठस्थापनमन्त्रः ।

पट्टकेऽष्टदलाम्भोजं श्रीखण्डेन सुगन्धिना ।
जातिकास्वर्णलेखिन्या दूर्वादर्भेण वा लिखेत् ॥ ९

ॐकारपूर्वाणि नमोऽन्तगानि शरीरविन्यासकृताक्षराणि ।
प्रत्येकतोऽष्टौ च यथाक्रमेण देयानि तान्यष्टसु पत्रकेषु ॥ १०

ब्रह्महोमनमःशब्दं मध्येकर्णिकमालिखेत् ।
कं कः प्रभृतिभिर्वर्णैर्वेष्टयेत् तन्निरन्तरम् ॥ ११

कं कः, चं चः, टं टः, तं तः, पं पः, यं यः, रं रः, लं लः, वं वः, शं शः, षं षः, सं सः, हं हः, ळं ळः, क्षं क्षः, खं खः, छं छः, ठं ठः, थं थः, फं फः, गं गः, जं जः, डं डः, दं दः, बं बः, घं घः, झं झः, ढं ढः, धं धः, भं भः, ङं ङः, ञं ञः, णं णः, नं नः, मं मः, एतानि केसराक्षराणि ।

बाह्ये त्रिर्मायया वेष्ट्य कुम्भकेनाम्बुजोपरि ।
प्रतिष्ठापनमन्त्रेण स्थापयेत् तां सरस्वतीम् ॥ १२

ॐ अमले ! विमले ! सर्वज्ञे ! विभावरि ! वागीश्वरि ! ज्वलदीधिति ! स्वाहा प्रतिष्ठापनमन्त्रः ॥

अर्चयेत् परया भक्त्या गन्धपुष्पाक्षतादिभिः ।
विनयादिनमोऽन्तेन मन्त्रेण श्रीसरस्वतीम् ॥ १३

ॐ सरस्वती नमः ।

विनयं मायाहरिवल्लभाक्षरं तत्पुरो वदद्वितयम् ।
वाग्वादिनी च होमं वागीशा मूलमन्त्रोऽयम् ॥ १४

ॐ ह्रीँ श्रीँ वद वद् वाग्वादिनी स्वाहा । मूलमन्त्रः ।

यो जपेज्जातिकापुष्पैर्भानुसङ्ख्यसहस्रकैः ।
दशांशहोमसंयुक्तं स स्याद् वागीश्वरीसमः ॥ १५

महिषाक्षगुग्गुलेन प्रतिनिर्मितचणकमानसद्गुटिकाः ।
होमस्त्रिमधुरयुक्तैर्वरदाऽत्र सरस्वती भवति ॥ १६

देहशिरोदृग्नासासर्वमुखाननसुकण्ठहृन्नाभि ।
पादेषु मूलमन्त्रबीजद्वयवर्जितं ध्यायेत् ॥ १७

श्वेताम्बरां चतुर्भुजां सरोजविष्टरस्थिताम् ।
सरस्वतीं वरप्रदामहर्निशं नमाम्यहम् ॥ १८

साङ्ख्यभौतिकचार्वाकमीमांसकदिगम्बराः ।
सौगतास्तेऽपि देवि ! त्वां ध्यायन्ति ज्ञानहेतवे ॥ १९

भानूदये तिमिरमेति यथा विनाशं
क्ष्वेडं विनश्यति यथा गरुडागमेन ।
तद्वत् समस्तदुरितं चिरसञ्चितं मे
देवि ! त्वदीयमुखदर्पणदर्शनेन ॥ (वसन्ततिलका) २०

गमकत्वं कवित्वं च वाग्मित्वं वादिता तथा ।
भारति ! त्वत्प्रसादेन जायते भुवने नृणाम् ॥ २१

सरस्वतीस्तवः ।
जपकाले नमःशब्दं मन्त्रस्यान्ते नियोजयेत् ।
होमकाले पुनः स्वाहा मन्त्रस्यायं सदा क्रमः ॥ २२

सवृन्तकं समादाय प्रसूनं ज्ञानमुद्रया ।
मन्त्रमुच्चार्य सन्मन्त्री श्वासं मुञ्चीत रेचनात् ॥ २३

वाग्भवं कामराजं च सान्तं षान्तेन संयुतम् ।
बिन्द्वोङ्कारयुतं मन्त्रं त्रैपुरं तन्निगद्यते ॥ २४

ऐँ क्लीँ द्व ह्सौँ नमः ।
श्वेतैः पुष्पैर्भवेद् वाचा शोणितैर्वश्यमोहनम् ।
लक्षजापेन संसिद्धिं याति मन्त्रं सहोमतः ॥ २५

ऐं क्लीँ ह्सौँ । मन्त्रः
उष्माणामादिमं बीजं ब्रह्मबीजसमन्वितम् ।
लान्तं रान्तेन संयुक्तं मायावाग्भवबीजकम् ॥ २६

स्व्लाँ ह्रीँ ऐँ सरस्वत्यै नमः ।
मन्त्रं जपति यो नित्यं जातिकाकुसुमैर्वरैः ।
रविसङ्ख्यसहस्राणि स स्याद् वाचस्पतेः समः ॥ २७

सप्त लक्षाणि यो विद्यां मायामेकाक्षरीं जपेत् ।
तस्य सिद्ध्यति वागीशा पुष्पैरिन्दुसमप्रभैः ॥ २८

ह्रीँ झ्रँ ह्रीँ जलभूबीजैर्नाम यत् तत् स्वरैर्वृतम् ।
बाह्ये द्विषड्दलाम्भोजपत्रेषु सकलं नमः ॥ २९

सान्तं सम्पुटमालिख्य इँवी हंसैर्वलयीकृतम् ।
अम्भःपुरपुटोपेतं सद्भूर्जे चन्दनादिभिः ॥ ३०

सिक्थकेन समावेष्ट्य जलपूर्णघटे क्षिपेत् ।
दाहस्योपशमं कुर्याद् ग्रहपीडां निवारयेत् ॥ ३१

शान्तिकयन्त्रम् ।

नाम त्रिमूर्त्तिमध्यस्थं क्लौँ क्रोँ दिक्षु विदिक्षु च ।
बहिर्वह्निपुटं कोष्ठेष्वोँ जम्भे ! होममालिखेत् ॥ ३२

मोहापि च तथा ग्रान्तब्राह्मब्लूँकारमास्थितम् ।
ॐ ब्लैं धात्रे वषट् वेष्ट्यान्तर्बाह्ये क्षितिमण्डलम् ॥ ३३

फलके भूर्यपत्रे वा लिखित्वा कुङ्कुमादिभिः ।
पूजयेद् यः सदा यन्त्रं सर्वं तश्य वशं जगत् ॥ ३४

वश्ययन्त्रम् ॥

मान्तं नामयुतं द्विरेफसहितं बाह्ये कलावेष्टितं
तद्बाह्येऽग्निमरुत्परं विलिखितं ताम्बूलपत्रोदरे ।
लेखिन्यान्यमृताक्षकंटकभुवार्कक्षीरराजीप्लुतं
तप्तं दीपशिखाग्निना त्रिदिवसे रम्भामपीहानयेत् ॥(शा.वि.)३५

रेफद्वयेन सहितं लिख मान्तयुग्मं
षष्ठस्वरस्वरचतुर्दशबिन्दुयुक्तम् ।
बाह्ये त्रिवह्निपुरमालिख चैतदन्तः
पाशत्रिमूर्त्तिगजवश्यकरैश्च वेष्ट्यम् ॥ (वसन्ततिलका) ३६

पुरं हिरण्यरेतसो विलिख्य तद्बहिः पुनः ।
करोतु मन्त्रवेष्टनं ततोऽग्निवायुमण्डलम् ॥ ३७

तद्यथा–
ॐ आँ ह्रीं क्रोँ म्ल्व्यूं जम्भे ! मोहे ! ररर घे घे सर्वाङ्गं
दह दह देवदत्ताया हृदयं मम विश्यमानय ह्रीं यं वौषट् ॥

तं ताम्बूलरसेन हेमगरलब्रह्मादिभिः संयुजा
प्रेतावासनकर्परैः प्रविलिखेत् ताम्रस्य पत्रेऽथवा ।
अङ्गारैः खदिरोद्भवैः प्रतिदिनं सन्ध्यासु सन्तापयेत्
सप्ताहात् वनितां मनोऽभिलषितां मन्त्री हठादानयेत् ॥ ३८
(शा.वि.)

संलिख्याष्टदलाब्जमध्यगगनं कामाधिपेनावृतं
तत्पत्रेषु तदक्षरं प्रविलिखेद् पत्राग्रतोऽग्न्यक्षरम् ।
ब्लें पत्रान्तरपूरितं वलयितं मन्त्रेण वामादिना
द्रां द्रीं ब्लूं स्मरबीजहोमसहितेनैतज्जगत्क्षोभणम् ॥(शा.वि.)३९

जाप्यः सहस्रदशकं सुभगायोनावलक्तकं धृत्वा ।
विद्या नवाक्षरीया तयापसव्येन हस्तेन ॥ ४०

ॐ ह्रीं आँ क्रोँ ह्रीं क्षीँ ह्रीं क्लीँ ब्लूँ द्रां द्रीं ।
ॐ कामिनी रञ्जय होममन्त्रं
यस्या लिखेच्चात्मकरेऽपसव्ये ।
सन्दर्शयेत् सा स्मरबाणभिन्नाऽद्-
भुतं भवत्यत्र किमस्ति चित्रम् ॥ (उपजाति) ४१

विनयं चले चलचित्ते रतौ मुञ्चयुग्मं होमम् ।
द्रावयत्यबलां बलाल्लक्षेणैकेन जाप्येन ॥ ४२

सिन्दूरसन्निभं पिण्डमैवलक्षरनिर्मितम् ।
ध्यातं सबिन्दुकं योन्यां द्रावयत्यबलां बलात् ॥ ४३

सम्पिष्टोतप्तिकामूलं जलशौचं स्वरेतसा ।
भर्तुर्ददाति या षण्ढं सान्यां प्रतिकरोति तम् ॥ ४४

मर्दयेत् पिप्पलाकामं सूतकेन कुरुण्टिका ।
क्षीरेण मधुना सार्धं लिङ्गलेपोऽबलास्मरः ॥ ४५

मधुकर्पूरसौभाग्यं पिप्पिलीकामसंयुतम् ।
द्रावयत्यङ्गनादर्पं लिङ्गलेपनमात्रतः ॥ ४६

एरण्डतेलं फणिकृत्तियुक्तं सन्मातुलिङ्गस्य च बीजमिश्रम् ।
धूपं च दद्याद्रतिहर्म्यमध्ये स्त्रीमोहनं ज्ञानविदो वदन्ति ॥ ४७
(इन्द्रवज्रा)

क्लींँकाररुद्धं लिख कूटपिण्डं नामान्वितं द्वादशपत्रपद्मम् ।
ब्रह्मादिहोमान्तपदेन युक्ताः पूर्वादिपत्रेषु जयादिदेव्यः ॥ ४८
(इन्द्रवज्रा)

ॐ जये स्वाहा । ॐ विजये स्वाहा । ॐ अजिते स्वाहा । ॐ अपराजिते स्वाहा ।

जभमहपिण्डसमेता जम्भाद्याः प्रणवपूर्वहोमान्ताः ।
विदिग्दलेषुः योज्याः स्मरबीजं शेषपत्रेषु ॥ ४९

ॐ ज्म्ल्व्र्युं जम्भे ! स्वाहा ! ॐ भ्म्ल्व्यूँ मोहे ! स्वाहा । ॐ म्म्ल्व्र्युं स्तम्भे ! स्वाहा । ॐ ह्म्ल्व्र्यूं स्तम्भिनी स्वाहा । शेषपत्रेषु क्लीँ।

त्रिधा मायया वेष्टितं क्रोँनिरुद्धं
लिखेद् रोचनाकुङ्कुमैर्भूर्यपत्रे ।
मधुस्थापितं वेष्टितं रक्तसूत्रैर्वशं
याति रम्भापि सप्ताहमध्ये ॥(उपेन्द्रवज्रा) ५० क्लीँरञ्जिका ॥१

यन्त्रं तदेव विलिखेद् वनिताकपाले
गोरोचनादिभिरनङ्गपदे त्रिमूर्त्तिम् ।

सन्ध्यासु सप्तदिवसं खदिराग्नितप्तां
देवाङ्गनामपि समानयतीह नाकात् ॥ ५१ ॥ ह्रींरञ्जिका ॥ २
(वसन्ततिलका)

स्थाने त्रिमूर्तेर्लिख विश्वबीजं कस्तूरिकाद्यैर्वरभूर्जपत्रे ।
बाह्ये वृतं रूपपतङ्गवेष्ट्यं सीमन्तिनीनां विदधाति मोहम् ॥५२
ईरञ्जिका ॥ ३ (इन्द्रवज्रा)

विष्णोः पदे समभियोजय रोषबीजं
मानुष्यचर्मणि विषेण सलोहितेन ।
कुण्डे प्रपूर्य खदिरज्वलनेन तप्तं
शत्रोरकालमरणं कुरुतेऽविकल्पात् ॥ (वसन्ततिलका) ५३ ॥
हूंरञ्जिका ॥ ४

भूर्जेऽरुणेन सविषेण मकारबीजं हूं
स्थानके लिख मलीमलमूत्रेवेष्ट्यम् ।
मृत्पात्रिकोदरगतं निहितं श्मशाने
दुष्टस्य निग्रहमिदं विदधाति यन्त्रम् ॥ मः ॥ ५ ५४
(वसन्ततिलका)

यन्त्रं बिभीतफलके विषलोहिताभ्यां,
मा स्थानकेऽग्निमरुतोः प्रविलिख्य बीजम्
संवेष्ट्य वाजिमहिषोद्भवकेशपाशैः
प्रेतालयस्थमचिरेण करोति वैरम् ॥ र्यः ॥ ६ ५५
(वसन्ततिलका)

अनलपवनबीजे वायुबीजं ससृष्टिं,
चितिजगरकाकामेध्ययुक्तैर्विलै(लि)ख्यम् ।

गगनगमनपक्षेणोद्यखण्डो ध्वजानां
पवनहतमरात्युच्चाटनं तद् विदध्यात् ॥ यः ॥ ७ ५६
(मालिनी)

स्वल्पेन मानुषभुवा नृकपालयुग्मे
पूर्वोदिताक्षरपदे विलिखेत् खबीजम् ।
क्ष्वेडारुणेन मृतकालयभस्मपूर्णे
प्रोच्चाटयेदरिकुलं निहितं श्मशाने ॥ हः ॥ ८ ५७
(वसन्ततिलका)

प्रेताम्बरे व्योमपदे विलेख्यं फडक्षरं निम्बनृपार्कक्षीरैः ।
सिद्धालये तन्निखनेत् क्षपायां
बम्भ्रम्यते काक इवारिरुर्व्याम् ॥ फट् ९ (उपजाति) ५८

कूटं फडक्षरपदे लिखेत् कुङ्कुमाद्यै-
र्भूर्ये वषट्पदयुतं मठितं त्रिलोहैः ।
पुंसां स्वबाहुकटिकेशगले धृतानां
सौभाग्यकृद् युवतिभूपतिवश्यकारि ॥ क्ष वषट् ॥ १० ५९
(वसन्ततिलका)

क्षस्थानकेऽथ लिखितं हरितालकाद्यै-
रिन्द्रं शिलातलपुटे क्षितिमण्डलस्थम् ।
सूत्रेण तत् परिवृतं विधृतं धरायां
कुर्यात् प्रसूतिमुखदिव्यगतेर्निरोधम् ॥ (वसन्ततिलका) ६०

लं ११ रञ्जिका द्वादशयन्त्रोद्धारः ॥

अजपुटे लिखेन्नाम ग्लौँ क्षं पूर्णेन्दुवेष्टितम् ।
वज्राष्टकपरिच्छिन्नमग्रान्तब्राह्मणाक्षरम् ॥ ६१

तद्बाह्ये भूपुरं लेख्यं शिलायां तालकादिना ।
कोषादिस्तम्भनं कुर्यात् पीतपुष्पैः सुपूजितम् ॥ ६२

ॐ ग्लौँ क्षं ठ लं स्वाहा ।

संलिख्य नामाष्टदलाब्जमध्ये
मायावृतं षोडशसत्कलाभिः ।
क्लौँ ब्लूं तथा द्रामथ योजयित्वा
दिक्स्थेषु पत्रेषु सदा क्रमेण ॥ (इन्द्रवज्रा) ६३

होमं लिखेदङ्कुशबीजमुच्चैः किञ्चान्यपत्रेषु बहिस्त्रिमूर्त्तिः ।
भूर्जे हिमाद्यैर्विधृतं स्वकण्ठे
सौभाग्यवृद्धिं कुरुतेऽङ्गनानाम् ॥ सौभाग्यरक्षा ।(इन्द्रवज्रा)६४

क्षजभमहरेफपिण्डैः पाशाङ्कुशबाणरञ्जिकायुक्तैः ।
प्रणवाद्यैः कुरु मन्त्रिन् । षट् कर्माण्युदयमवगम्य ॥ ६५

ॐक्ष्मल्व्र्यूं ज्म्ल्व्र्यूं भ्म्ल्व्र्यूं म्म्ल्व्र्यूं हम्ल्व्र्यूं ड्म्ल्व्र्यूं आँ क्रौँ ह्रीं
क्लौँ ब्लूँ द्रीं द्रीं संवौषट् त्रिभुवन सारः ।
सहस्त्र १२ जपः । दशांशेन होमः ॥

वश्यविद्वेषणोच्चाटे पूर्वमध्यापराह्णके ।
सन्ध्यार्धरात्ररात्र्यन्ते मारणे शान्तिपौष्टिके ॥ ६६

वषड् वश्ये फडुच्चाटे हुं द्वेषे पौष्टिके स्वधा ।
संवौषडाकर्षणे स्वाहा शान्तिकेऽप्यथ मारणे ॥ ६७

पीतारुणासितैः पुष्पैः स्तम्भनाकृष्टिमारणे ।
शान्तिपौष्टिकयोः श्वेतैर्जपेन्मन्त्रं प्रयत्नतः ॥ ६८

कुर्याद् हस्तेन वामेन वश्याकर्षणमोहनम् ।
शेषकर्माणि होमं च दक्षिणेन विचक्षणः ॥ ६९

उदधीन्द्रमारुतान्तकनैर्ऋतकुबेरदिक्षु कृतवदनः ।
शान्तिकरोधोच्चाटनमारणसम्पुष्टिजनवश्यः ॥ ७०

शान्तिपुष्टौ भवेद्धोमो दूर्वाश्रीखण्डतण्डुलैः ।
महिषाक्षरङ्काम्भोजैः पुरक्षोभो निगद्यते ॥ ७१

करवीरारुणैः पुष्पैरङ्गनाक्षोभमुत्तमम् ।
होमैः क्रमुकपत्राणां राजवश्यं विधीयते ॥ ७२

गृहधूपनिम्बपत्रैर्द्विजपक्षैर्लवणराजिकायुक्तैः ।
हुतैस्त्रिसन्ध्यविहितैर्विद्वेषो भवति मनुजानाम् ॥ ७३

प्रेतालयास्थिखण्डैर्बिभीतकाङ्गारसमधूमयुतैः ।
सप्ताहविहितहोमैरशतिमरणं बुधैर्दृष्टम् ॥ ७४

नैवेद्यदीपादिभिरिन्द्रसङ्ख्यैः
सुवर्णपादावभिपूज्य देव्याः ।
स्ववामदेशस्थितसव्यहस्तो
मन्त्री प्रदद्यात् सहिरण्यमम्भः ॥ (उपजाति) ७५

विद्या मयेयं भवते प्रदत्ता
त्वया न देयान्यदृशे जनाय ।
तच् श्रावयित्वा गुरुदेवताना-
मग्रेषु विद्या विधिना प्रदेया ॥ (उपजाति) आज्ञाक्रमः ७६

कृतिना मल्लिषेणेन जिनसेनस्य सुनुना ।
रचितो भारतीकल्पः शिष्टलोकमनोहरः ॥ ७७

सूर्याचन्द्रमसौ यावन्मेदिनीभूधरार्णवाः ।
तावत् सरस्वतीकल्पः स्थेयाच्चेतसि धीमताम् ॥ ७८

पू. आ. श्री जिनप्रभसूरिविरचितम्

सम-विषमपाद-पुनरावृत्तिरूपयमकालङ्कारयुक्तम्

## ६. ॥ श्रीशारदास्तोत्रम् ॥

(उपजाति)

वाग्देवते भक्तिमतां स्वशक्ति-कलापवित्रा सितविग्रहा मे ।
बोधं विशुद्धं भवति विधत्तां कलापवि-त्रासित-विग्रहा मे ॥१

अङ्कप्रवीणा कलहं सपत्राकृतस्मरेणाऽऽनमतां निहन्तुम् ।
अङ्कप्रवीणा कलहंसपत्रा सरस्वती शश्वदपोहतां वः ॥ २

ब्राह्मी विजेषीष्ट विनिद्रकुन्दप्रभावदाता घनगर्जितस्य ।
स्वरेण जैत्री ऋतुना स्वकीयप्रभाऽवदाता घनगर्जितस्य ॥ ३

मुक्ताक्षमाला लसदौषधीशाऽभिशूज्ज्वला भाति करे त्वदीये ।
मुक्ताक्षमालालसदौषधीशा यां प्रेक्ष्य भेजे मुनयोऽपि हर्षम् ॥४

ज्ञानं प्रदातुं प्रवणा ममाऽतिशया लुनाना भवपातकानि ।
त्वं नेमुषां भारति ! पुण्डरीक-शया लुनाना भवपातकानि ॥५

प्रौढप्रभावाऽसमपुस्तके न ध्याताऽसि येनाऽम्ब विराजिहस्ता ।
प्रौढप्रभावासमपुस्तकेन विद्या-सुधापूरसुदूर-दुःखा ॥ ६

तुभ्यं प्रणामः क्रियतेऽनघेन मरालयेन प्रमदेन मातः ।
कीर्तिप्रतापौ भुवि तस्य नम्रेऽमरालये न प्रमदेन मातः ॥ ७

रुच्या रविन्दभ्रमदं करोति वेलं यदि योऽर्चति तेऽङ्घ्रियुग्मम्।
रुच्याऽरविन्दभ्रमदं करोति स स्वस्य गोष्ठीं विदुषां प्रविश्य ॥८

पादप्रसादात्तव रूपसम्पल्लेखाभिरामोदितमानवेशः ।
भवेन्नरः सूक्तिभिरम्ब ! चित्रोल्लेखाभिरामो दितमानवेशः ॥ ९

सितां शुकान्ते नयनाभिरामां मूर्तिं समाराध्य भवेन्मनुष्यः ।
सितांशुकान्ते नयनाऽभिरामाऽन्धकारसूर्यः क्षितिपाऽवतंसः॥ १०

येन स्थितं त्वामनु सर्वतीर्थ्यैः सभाजितामानतमस्तकेन ।
दुर्वादिनां निर्दलितं नरेन्द्र-सभाजिता मानत मस्तकेन ॥ ११

सर्वज्ञवक्त्रवरतामरसाङ्कलीना-
मालीं घ्नती प्रणयमन्थरया दृशैव ।
सर्वज्ञवक्त्रवरतामरसाङ्कलीना,
प्रीणातु विश्रुतयशाः श्रुतदेवता नः ॥ (वसन्ततिलका) १२

क्लृप्तस्तुतिर्निबिडभक्तिजडत्वपृक्तै-
र्गुम्फैर्गिरामिति गिरामधि देवता सा ।
बालोऽनुकम्प्य इति रोपयतु प्रसाद-
स्मेरां दृशं मयि जिनप्रभसूरिवर्ण्या ॥ (वसन्ततिलका) १३

पू. आ. श्री जिनप्रभसूरिविरचितम्

## ७. ॥ मन्त्रगर्भितश्रीशारदास्तवनम् ॥

(रथोद्धता)

ॐ नमस्त्रिदशवन्दितक्रमे ! सर्वविद्वज्जनपद्मभृङ्गिके ।
बुद्धिमान्द्यकदलीदलक्रियाशस्त्रि ! तुभ्यमधिदेवते गिराम् ॥१

कुर्वते नभसि शोणरोचिषो भारति ! क्रमनखांशवस्तव ।
नम्रनाकिमुकुटांशुमिश्रिता ऐन्द्रकार्मुकपरम्परामिव ॥ २

दत्तह्रीन्दु–कमलश्रियो मुखं यैर्व्यलोकि तव देवि ! सादरम् ।
ते विविक्तकवितानिकेतनं के न भारति ! भवन्ति भूतले ॥ ३

श्रीन्द्रमुख्य–विबुधार्चितक्रमे ! ये श्रयन्ति भवतीं तरीमिव ।
ते जगज्जननि जाड्यवारिधिं निस्तरन्ति तरसा रसास्पृशः ॥४

द्रव्यभावतिमिरापनोदिनीं तावकीनवदनेन्दुचन्द्रिकाम् ।
यस्य लोचनचकोरकद्वयी पीयते भुवि स एष पुण्यभाक् ॥ ५

बिभ्रदङ्ककमिदं त्वदर्पितस्नेहमन्थरदृशा तरङ्गितम् ।
वर्णमात्रवदनाक्षमोऽप्यहं स्वं कृतार्थमवयामि निश्चितम् ॥ ६

मौक्तिकाक्ष–वलयाब्जकच्छपी पुस्तकाङ्कितकरोपशोभिते ।
पद्मवासिनि ! हिमोज्ज्वलाङ्गि !
वाग्वादिनि ! प्रभव मे भवच्छिदे ॥ ७

विश्व–विश्वभुवनैकदीपिके ! नेमुषां मुषितमोहविप्लवे ।
भक्तिनिर्भरकवीन्द्रवन्दिते ! तुभ्यमस्तु गिरिदेवते नमः ॥ ८

उदार–सारस्वतमन्त्रगर्भितं जिनप्रभाचार्यकृतं पठन्ति ये ।
वाग्देवतायाः स्फुटमेतदष्टकं
भवन्ति तेषां मधुरोज्ज्वला गिरः ॥ ९

पू.आ.श्री रत्नसिंहसूरिविरचितम्

## ८. ॥ श्रीभारतीस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

यन्नामस्मृतिरप्यशेषजगतीसङ्कल्पकल्पद्रुमः
सद्बोधाम्बुधिवृद्धिपार्वणविधुर्मेधासुधासारिणः ।
खेलल्लक्ष्मिविलासकेलिवलभीसत्काव्यपण्यापण-
स्तामुद्दाममुदाऽवदातहृदयः स्तोतुं यते भारतीम् ॥ १

आनन्दाम्बुधिमध्यमग्नहृदयः प्रोद्भूतरोमाङ्कुरः
प्रोत्सर्पत्सरितोषबाष्पसलिलैरालुप्यमानेक्षणः ।
देवि ! त्वत्पदपङ्कजभ्रमरतां धत्ते जनो यः सदा
तस्याशेषसमीहितानि सपदि क्रीडन्ति हस्ताम्बुजे ॥ २

श्रीमद्देवि ! तव प्रसादसुभगा दृष्टिः किरन्ती सुधां
मूर्तिं चुम्बति भाविभाग्यललितां धन्यस्य यस्य क्षणम् ।
उद्यद्वादिविनिद्रदर्प्पदलना प्रोद्भूतसत्तेजस-
स्तस्यालिङ्गनमातनोति रभसाद्विद्या जगत्कार्म्मणम् ॥ ३

डिम्भेनापि च शारदे ! तव वरान्मूर्द्धिन प्रदत्ते करे
काव्यं कारयते कृती मदहरं श्रीकालिदासस्य यत् ।
सम्प्राप्यातिशयं कुतोऽपि निखिलत्रैलोक्यविस्मापकं
कुम्भोद्भूरथवा पपौ न जलधीन् सप्तापि किं हेलया ? ॥ ४

निःश्वासोद्गतगन्धबन्धुरतया सोत्कण्ठबद्धस्पृहा
धावन्ती मधुपालिरास्यकमले ब्राह्मि ! त्वया कौतुकात् ।
नूनं या करपल्लवेन विधृता प्राप्य स्मितैः शुभ्रतां
ब्रूतेऽसौ कथमत्र मूढहृदयस्तामक्षमालां जनः ॥ ५

एतद्भारति ! पङ्कजं तव कराम्भोजे दधन् मित्रतां
यत्पश्यामि हरिप्रियैकसदनं सच्छाययालङ्कृतम् ।
तन्मन्येऽस्मि करोषि यत्र मनुजे वासं प्रसन्ना सती
तत्राद्यापि रुषा विषण्णहृदया धत्ते न लक्ष्मीः स्थितिम् ॥ ६

पाणिः सूर्यसमस्तमःपरिभवी ते वाणि ! यस्य क्षणं
साम्मुख्यं भजते स्म नेत्रनलिनस्यानन्दमुद्रां दधत् ।
तस्याशाः सकलाधिकश्वरदशां सम्प्रापयन्नन्वहं
धत्तां मा वरदाभिधां कथमसावुत्तानलीलां वहन् ॥ ७

दोषाश्लेषजुषोपि विश्वमखिलं प्रीतिं नयन्तः परां
राकाचन्द्रगभस्तयो जडतया सन्तप्तपद्मश्रियः ।
चञ्चत्पुस्तककैतवादहमिदं शङ्के गिरामीश्वरि !
पिण्डीभूय जडत्वसङ्गहतये भेजुस्त्वदीयं करम् ॥ ८

इत्थं निर्यदमन्दभूरिपुलकः प्रीतिप्रसन्नाशयः
पाण्यम्भोजयुगं ललाटसरिति प्राप्य स्थितस्ते पुरः ।
देवि ! प्रार्थयते वरं प्रविदधच्छ्रीरत्नसूरिः स्तवं
विश्वं क्षिप्तसमस्तमोहगहनं सर्व्वत्र भूयादिति ॥ ९

पू.आ.श्री जिनवल्लभसूरिकृतः

## ९. ॥ श्रीसरस्वतीस्तवः ॥

(हरिणी)

सरभसलसद्-भक्तिप्रह्वीभवत्त्रिदशांशनां,
मुकुटविसरन्नाना-रत्नच्छविच्छुरितक्रमाम् ।

कविशतनुतां स्तोष्ये भक्त्या किलास्मि सरस्वतीम्,
त्रिभुवनवनस्फुर्जन्मोहप्ररोहकुठारिकाम् ॥ १

निपुणधिषणोऽनन्तान् कान्तान् गुणान् विदंस्तव,
स्तवकृतमपि तूष्णीकत्वं प्रयात्यपि वाक्पतिः ।
चरमजलधेर्यद्वा कः स्यात् कणान्पयसोऽखिलान्,
गणयितुमलं जन्तुर्वाग्मी पटुश्चिरजीव्यपि ॥ २

तदपि गुणसन्दोहादंशप्रकीर्तनतोऽप्यहं,
स्वमभिलषितं लिप्सुर्बुद्धिं तव स्तवनेऽधराम् ।
गतमतिलवोऽप्यन्तःपुष्यन्-मतार्थमनोरथा-
कुलितमनसो यद् वा किञ्चित् प्रवेविदति क्वचित् ॥ ३

स्मरणजनित-क्लेशावेशाद् ददत्यभिवाञ्छितं,
कियदपि जडांश्चिन्तारत्न-प्रकल्पलतादयः ।
तव पदयुगं चिन्तातीतं किमप्यति बन्धुरं,
जगति फलति ध्वस्तध्वान्त-प्रवर्धितसम्पदे ॥ ४

सितकजकरादिग्-व्यासर्पिस्वकायसितप्रभा,
पटलपयसिस्फारोत्फुल्लत्-सिताम्बुरूहस्थिता ।
नतसुरनरैः क्षीराम्भोधि-प्रकाशजलोल्लसद्-
विमलकमलालीना-लक्ष्मीरिव त्वमुदीक्ष्यसे ॥ ५

नतिपरसुरस्त्रीसङ्घट्टच्युतश्रवणासितो-
त्पलमतिरसाद्यपादाब्जं त्वदीयमतोऽद्रवत् ।
सततविकचं तन्नाश्चर्यं यतश्चिरभाविनीं,
मलिनतनवोऽन्यस्य द्रष्टुं न सम्पदमीशते ॥ ६

स्वचरणयुगन्यासाद्देवि ! प्रतीतमिलातलैः,
कमलनिलयं यत्त्वं लक्ष्मीं निरुध्य किल स्थिता ।
अनुशयवती मन्ये चैतन्निःक्रयाय कृतोद्यमा,
क्षणमपि भवद्भक्तानां सा गृहाणि न मुञ्चति ॥ ७

स्फुरितकिरणावंसाभोगे कपोलतलस्पृशौ,
शशधररुचे राजेते ते चलश्रुतिकुण्डलौ ।
सममुभयतः सूर्याचन्द्रौ लसद्द्युतिमण्डलौ,
हिमगिरिशिरोदोला-लीला विलासपराविव ॥ ८

विशद-वदनश्वेताभीषुं सिषेविषुरीश्वरं,
समभिपतिता सर्वाप्येषा किमृक्षपरम्परा ।
त्रिभुवनजनस्तुत्यां देवीं प्रसादयितुं गिरां,
प्रणतिविधयेऽभ्याजग्मुः किं नु चित्रशिखण्डिनः ॥ ९

सिततनुलसल्लावण्याम्भः कणाः किमु पूजिताः,
विमलहृदयान्तःस्थज्ञानाङ्कुरा नु विनिर्गताः ।
मुखशशिगलत्पीयूषाच्छ-छटा बत ते हृदि,
स्फुरदुरुरुचं हारं दृष्ट्वेति सन्दिहते जनाः ॥ (युग्मम्) १०

करसरसिजस्योर्ध्वं वर्तेऽहमस्मि सरस्वती-,
मुखजितरुचा ह्रीतेनाराद् विमुक्तमयीन्दुना ।
कुवलयरुचां जेतुश्चाक्ष्णेः सक्षेनिसुदेविते,
करतलगतः पद्मं शश्वद् विकस्वरमद्युतत् ॥ ११

दुरितमलभित्ताप-क्षिप्नुः सुरासुरसुन्दरी,
जननतशिरोराजद्-रश्मिस्फुरन्मकरीसना ।

सुविकचकजा लावण्योद्यत्पयःप्लववाहिनी,
मदनवगमोदन्यां हन्यात्त्वदंह्रियुगानदी ॥ १२

विशदिततदिशं विश्वाकाशावकाश-विसृत्वरीं,
द्विरदरदनच्छेदोद्यत्सच्छुचिच्छविजित्वरीम् ।
रसवशलसच्चञ्चच्चन्द्र-चकोर-रुचीचण,
स्तवमुखशशिज्योत्स्नां धन्योदृगञ्जलिना पिबेत् ॥ १३

हृदिजविविधध्यान्ध्य-ध्वान्तप्रबन्धविजृम्भण-
च्छिदुरतरणिं वन्दारूणां शरारुचराकताम् ।
परमगरिमस्फूर्जज्जाड्यक्षितिध्रपरम्परा,
विदुरभिदुरं च त्वन्नामा मनन्ति मनीषिणः ॥ १४

नृपतिसदसि द्यूते वादे विवाद- विचारणे,
समद-कविषु क्रीडाकाव्येऽथवा विषमे परे ।
स्मरति तव चेद् जन्तुर्दत्ताऽखिलेऽप्सितसम्पदः,
प्रभवति तदा सर्वारम्भोल्लसद्विजयोज्ज्वलः ॥ १५

जगति विबुधास्त्वां कल्याणीं शुभां विजयां जयां,
सुमनसमुमां सिद्धिं वृद्धिं जयत्यपराजिताम् ।
जगदुरभयां शान्तां भद्रां शिवामथ मङ्गलां,
रति-मति-धृति-स्वस्तिश्रीकीर्तितुष्टिसुपुष्टिदाम् ॥ १६

जगदवमतो वलाज्जाड्यस्खलद्वचनश्रुति
र्गलितसकलप्रज्ञालेशो गतप्रतिभोऽपि सन् ।
शरदि यशसि श्वेतं रूपं तवाम्ब ! हृदि स्थिरं,
दधदधरयत्युद्यत्कीर्तितमप्यधिपं गिराम् ॥ १७

ललितवलितैर्मुग्धस्निग्धैर्मिलत्पुटकुड्मलै-,
र्मसृण मधुरैः स्मेरस्फारैर्विवर्तिततारकैः ।
मृगशिशुदृशस्तानच्छिन्नं पिबन्ति विलोचनैः,
दधति सुधियो ये त्वच्चिन्तावशीकरणं हृदि ॥ १८

रुचिररचना-चञ्चच्चारूच्चरत्पदबन्धुर-
स्फुटरसबहुच्छन्दोभाषाभिराम-लसद्द्युति ।
विविधरुचितालङ्काराच्यैः समुच्छलति स्मृतिं,
तव विदधतां चार्वीचञ्चुः प्रपञ्च्य वचश्चयः ॥ १९

तमसि रवयो भीतौ रक्षा घना मरुषु क्षयो,
रिपुषु निधयो दारिद्र्येषु भ्रमेषु सुबुद्धयः ।
अहिषु गरुडाः सत्रेष्वर्था रुजासु महौषधाः,
विपदि सदयाश्चित्राकाराः प्रसादलवास्तव ॥ २०

जनयसि मुदं धत्से कीर्तिं बिभर्षि गुणावलीं,
वितरसि मतिं दत्से कामान्प्रवर्धयसि श्रियः ।
दलयति तमो यस्मान्मान्द्यं ध्वंसिष्यसि शात्रवं
त्वमिति वदतो दीनं मातः समेधय मे धियः ॥ २१

भुवनविजयिप्राज्यच्छायो गुणान्वयमीश्महे,
न तव भणितुं ज्ञातुं चातः प्रसीद सरस्वति !।
जननि ! तनुतां तां मे वाचं त्वमेव पटीयसी-,
मलमहमपि स्यां ते वक्तुं यया गुणगौरवम् ॥ २२

जय कविचमूचेतोरङ्गत्सरःकलहंसिके,
गुणिजनमनःपाथोनाथ-क्षपाकरलेखिके ।

जिनविभुमुखोज्जृम्भाम्भोज-भ्रमद्भ्रमरिनिभे,
विनतजनताहृत्पद्मली-विबोधरविद्युते ॥ २३

रुचिरपि न मे राज्ये नम्रापरा जिनवल्लभा-
प्रमदमथनोद्दामस्त्रैणे न चोन्मुदि सम्पदि ।
परम विरतं याचेऽदस्त्वां शिरोरचिताञ्जलि-
र्जननि ! जनय द्राग्वाग्देवि ! प्रसादमलं मयि ॥ २४

इति नुतिमिमां श्रीभारत्या विमूढधिया मया,
विरचितपदां तस्या एव प्रसर्पदनुग्रहात् ।
प्रणिहितमना श्रद्धावान् यः पठत्यशठः सदा,
स भवति भुवि श्रीमान् धीमान् पुमान् सुकृती कृती ॥ २५

पू.आ.श्री बालचन्द्रसूरिविरचितम्

(वसन्तविलास-अन्तर्गतम्)

## १०. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(उपजाति)

''अथैकदा विश्वविहङ्गवंशो-त्तंसेन हंसेन समुह्यमाना ।
भासां भरैः सम्भृतशारदाभ्र-शुभ्रैः ककुब्भासमदभ्रयन्ती ॥ १

तुषारभासाऽऽतपवारणेन, विराजिताऽऽकारवतीव राका ।
संवर्गिता स्वर्गिवधूभिरारात्-ताराभिराराद्धुमुपागताभिः ॥ २

स्ववरिनारीधुतचामराली-मिलन्मरालीकुलसङ्कुलश्रीः ।
गङ्गेव मूर्ताऽनिलनर्तितोर्मि-चलानि चेलानि समुद्वहन्ती ॥ ३

नितान्तमन्त्याक्षरिकानवद्यैः, पद्यैश्च गद्यैश्च नवोक्तिहृद्यैः ।
अनुक्रमेणोभयपार्श्वगाभ्यां, संस्तूयमाना शिव-केशवाभ्याम् ॥४

मुरारिनाभीनलिनान्तराल-निलीनमूर्तेरलिनिर्विशेषम् ।
आकर्णयन्ती श्रुतमुञ्जकुञ्ज-समानि सामानि चतुर्मुखस्य ॥ ५

कण्ठाहिफुङ्कारविमिश्रशुण्डा-सुङ्कारचित्रीकृतचित्कृतानि ।
सुचारुचारीणि सुहस्तकानि, गणेशनृत्यानि विलोकयन्ती ॥ ६

वीणाक्वणाकृष्टमृगानुरोधान्-मृगाङ्कमायान्तमिवाधिशीर्षम् ।
छत्रीं दधानस्य सुधाशनर्षेः, स्फीतानि गीतानि विचारयन्ती ॥७

सुरासुरैः स्वस्वमनोमतार्थो-पलम्भसंरम्भकृताभियोगैः ।
तीरावनीकल्पितधोरणीकैः, क्षीरोदवेलेव निषेव्यमाणा ॥ ८

शरन्कुहूधिष्ण्यसमूहगौरा-मेकत्र हस्ते स्फटिकाक्षमालाम् ।
दातुं नतेभ्यः कवितालतायाः, सुबीजराजीमिव धारयन्ती ॥९

करे परस्मिन् प्रणतार्त्तलोक-दारिद्र्यकन्दैकनिषूदनाय ।
प्रसह्य बन्दीकृतपद्मवासा-निवासमम्भोरुहमुद्वहन्ती ॥ १०

अन्यत्र पाणौ विकचारविन्द-समापतद्भृङ्गविघट्टनेन ।
वीणां रणन्तीं नमतोऽनुवेलं, निवेदयन्तीमिव धारयन्ती ॥११

विद्यात्रयीसर्वकलाविलास-समग्रसिद्धान्तरहस्यमूर्त्तेः ।
वाग्वीरुधः कन्दमिवेतरस्मिन्, हस्ताम्बुजे पुस्तकमादधाना ॥१२

सारस्वतध्यानवतोऽस्य योग-निद्रामुपेतस्य मुहूर्त्तमेकम् ।
स्वप्नान्तरागत्य जगत्पुनाना, श्रीशारदा सादरमित्युवाच ॥१३

पू.आ.श्री विजयरत्नसूरिविरचितम्

## ११. ॥ श्रीशारदास्तोत्रम् ॥

(शार्दूलविक्रीडित)

श्रीमाता श्रुतदेवता भगवती, वाग्देव्यपि भारती
धाताधीशुचिबुद्धिदा सरस्वती, विश्वोपकारी महत् ।
विश्वाधार विशुद्धविश्वमहिमा, विश्वाम्ब विश्वेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ (ध्रुवपद)१

ब्राह्मी त्वं जननी जगत्सु वरदा, भाषा च गो शारदा
कौमारी ब्रह्मचारिणी सुनयना, वाणी च हंसासना ।
ब्रह्माणी विदुषा(षी) त्वमेव त्रिपुरा, देवीश वागेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ २

षट्(ड)भाषाष्टदशालिपि च बहुधा, द्विबाण वर्णोदधि
विद्यावेददशाष्टविंशतिधिया, रागादिवाद्यं कलाम् ।
प्राप्नोति यदि त्वत्कृपां स भवतं(भवति), वाग्मी च विद्येश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ३

तीर्थकृत् प्रतिचक्री चक्री हलभृत्, विष्णुर्शिवाद्या नरा
इन्द्रो वेधस वाग्पतीन्द्रवुशना, सौम्यादया देवता ।
वासं तत्(द्)वदने च तेभिः ? (तैः) प्रणीता, त्वं पञ्चतत्त्वेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ४

के के मूर्खजना महाजडधिया, ये कालिदासादय-
स्ते सर्वस्य ददावुदारधीषणा-मुद्दामविद्वत्कृताः ।
त्वं गीर्ज्ञसिमति च षोडशसुरी, विद्यामहत्वेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ५

लब्ध्वाभूधरशङ्करानुभूतयाचार्या सुबोधादयः
हेमाद्यावृद्धिवादिसूरिप्रभृति, श्रीसिद्धसेनस्तथा ।
एतदन्यप्रसादतस्त्वदभवत्, सभ्यत्वदेवेश्वरी ।
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ६

त्वं श्रीधीधृतिकीर्त्तिकान्तिमहिमा, त्वं शेमुखी (षी) व्रीडया
सिद्ध्यष्टाष्टधिया च नन्दनिधय-स्त्वं लब्धिसमृद्धयः ।
सर्वैस्त्वत्कृपया प्रसाद लभते, इष्टार्थ इष्टेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ७

त्वं मरुतोद्धतजाड्यतापटलतं, हर्तुं हृदि व्योमत-
स्त्वं मित्रोभिनवः जडत्वतमसा, हर्त्ता हृदिमन्दिरात् ।
मूर्खत्वावकरोघप्लावनकरी, त्वं नद्य गङ्गेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ८

दुर्बुद्धि(र्ज)जडता च नागविष तत्, त्वं हर्तुं सौपर्णवत्
नाविद्या विपनस्य ज्वालन शिखिवत्, त्वं च शुभ्रानने ।
मूर्च्छां हर्तुं शठत्व पीयूषसमा, त्वं शुभ्रध्यानेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ९

मालैकं करयोश्च मौक्तिकवरो, जप्तुं पिता(र)महवयम्
वीणाकच्छपी धारितापरकरै-श्चैकं धृतं पुस्तिकाम् ।
हस्तैकं वरदाश्चतुष्कररिव, बालास्वरूपेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ १०

त्वन्मन्त्राक्षरसप्रभावमहतां, वर्णाधनुर्विंशति-
स्तत्राद्याप्रणवानुनासिकयुतां, मायारमावाग्भवम् ।

कर्मो राजततश्चवर्णत्रिपुरा-रेवं च बीजेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ ११

षड्बीजेव पुरो ततस्वद वद वाग्वादिनी संयुता
भगवत्यापि च तुभ्यमग्रनमसौ, स्वाहारिति वर्णयुग् ।
ये शुद्धाक्षरतरं यं पठित(पठन्ति) सत्, मन्त्रं च मन्त्रेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ १२

सद्ध्यानैर्शुचिचेलतस्त्रिकरणैर्सद्धूपसत्पूजितैः
सत्पञ्चामृतहोमभिश्च पठितै-र्लक्षासपाद ध्रुवम् ।
सो स्यादिन्दुविधीज्यवित् कविसमा, धीमन्त ज्ञानेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ १३

त्वं वृन्दारकधेनुनिर्ज्जरद्रुम-स्त्वं देवकुम्भोपमम्
त्वं कम्बूत्रिदशास्तथासुरलता-स्त्वं शब्दक्षीरोदधि ।
सर्वाभीष्टफलार्थदा सुमनसः, रत्नत्वमिन्द्रेश्वरी
हे देवी ! सुमुखे भवन्तु सततं, सन्तुष्ट मातेश्वरी ॥ १४

प्रशस्तिश्लोक-

स्तवमिदं तव एव कृतं मया,
जननि मे विहितं शिशुलीलया ।
विजयरत्नभुजिष्यसुरोऽवदत्,
भवतु मां त्वर पातु सुदृष्टितः ॥ (द्रुतविलम्बित) १५

पू.उपा. श्रीयशोविजय-कृतम्

## १२. ॥ श्रीसरस्वती-अष्टकम् ॥

प्रणमतानर्गलज्ञानसञ्जीवनीं भारतीं सारतरभक्तियुक्त्या ।
बोधसंबोधितस्वीयपरिचारकां चारुकान्ति तमश्चारमुक्त्या ॥१

वेदगर्भात्मजां गर्भितार्थस्फुरद्धृतवृत्तस्तुता म्लानवृत्ताम् ।
उद्यतान्तष्कृतिप्राज्ञमल्लाननमण्डपानीतकौशल्यनृत्ताम् ॥ २

यत्प्रसत्त्या सतां मण्डलीमध्यगोऽसाध्यविद्योमतैर्दुर्ग्रहः स्यात् ।
मानवो वर्णहीनोऽपि वर्ण्योच्छ्रित-
प्रोच्चवाग्मोहवृद्धिर्निहन्यात् ॥ ३

चन्द्रिकाधौतशृङ्गारसारद्युतिः शुभ्रपक्षाधिरोहिण्यघानि ।
हस्तकृतपुस्तका कच्छपीवादनस्पष्टबुद्धिश्छिन्नत्यंसलानि ॥४

यां स्तुवन्त्यात्मनीनेच्छवोऽहर्निशं स्वर्गुरुप्राग्रहरनाकिसङ्घाः ।
भालपट्टा लघु व्यक्तरत्नच्छविच्छन्नकामाङ्कुशा लब्धरङ्वा ॥५

मल्लिकास्रग्भरा पारसद्वासना-प्रीणिताल्यालिरालम्बिकीर्तिः ।
पूर्णचन्द्रानना प्रैष्यकृतमानना वर्वृतीतीह या दिव्यमूर्तिः ॥ ६

वेदनं स्याद्यतस्तत्त्वमार्गस्ततः सत्क्रियातस्ततो मोक्षसम्पत् ।
सौख्यमस्यामजर्यं यतस्तस्य तु कारणं केवला या निरापत् ॥७

इत्थमच्छाकृतिः कान्तिविजय-
स्मृतीः सारदा सारदा सञ्चिनोतु ।
भूरि भाग्योदयोत्ताललीलाप्रदा सेवितुर्मोहनिद्रां धुनोतु ॥ ८

इदमष्टकं पठति यः प्रमनाः उषसि प्रसूतसुयशस्तनुजः ।
स गिरा गिरः सुरगुरुप्रतिभः सुधयेव तोषयति सूरिगणान् ॥९
(प्रमिताक्षरा)

पू.मु. श्री पद्मसुन्दरकविकृतम्

## १३. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(शिखरिणी)

........................................
........................................ ॥ १

........................................
........................................ ॥ ५

वपुः कूर्माकारं हरिरनुचकार प्रसभतुः,
त्वदीयांह्रि द्वन्द्वोन्नतिमभिलषन्नस्तधिषणः ।
ततः स्पर्द्धीकाराध्रुवमनु वराहत्यवगमा-
न्महद्भिस्तुल्यत्वं भवति परितापाय महते ॥ ६

रणत्सिञ्जीरन्ते चरणमरुणालक्तकरसा,
च्छविद्वेषि क्वाणक्वणितसुभसौभाग्यसुभगम् ।
ततश्च्योतद्रोचिः प्रकरझरधारं सममुखं,
सुखं ताम्बूलेन स्वयमिव कवेर्मण्डय शिवे ! ॥ ७

गतं मन्दं मन्दं रणरणितझङ्कारसुभगं,
पदं सम्यग्मार्गव्यवहरणसंसूचककलम् ।
चरीकर्ति स्वैरं तवचरणयोः शिक्षितुमलं,
सलीलाविन्यासं किमपि कलहंसः कलकलम् ॥ ८

त्वदीये जङ्घे वै स्मरशरनिषङ्गाकृतिधरे,
नखव्याजार्द्धेन्दुद्विगुणितशरोऽसौ स्मरभटः ।
निरीक्ष्य त्रैलोक्यं व्यथयितुमहो वेद्यमनयद्,
विभुः को वा न स्यात् तव, जननि ! संसर्गवसतः ॥ ९

तपस्यामभ्यस्यत् पदनितलमाधाय निजकं,
शिरः शीतोष्णादिर्व्यसनमधिसोढुं वनगता ।
त्वदूर्व्वोरुर्व्वीशे म्रदिमगुणितां स्वस्य कदली,
दलीकारात्तत्किं ध्रुवमियमलम्भिद्युतिजुषोः ॥ १०

सुनाशीरस्फूर्जत्करिपरिवृडप्रांशु शितिमा,
स्फुरच्छुण्डादण्डः कवलितकरो ह्रीत इव ते ।
यदूरुसंवीक्ष्याप्रतिमतम–सौन्दर्यसुभगे !
भवत्याः सौभाग्यं भगवति ! बतानन्यसदृशम् ॥ ११

अलङ्कुर्वन्नास्ते भगणकटिसूत्रव्यतिकरं,
कटि प्रस्थं दिव्यद्युमणिगुणितान्तर्मणिमयम् ।
मुहुः स्पर्द्धां धत्ते तव जघनविस्तारगुरुता,
गुणाभ्यर्थीव्यर्थीकृतसुकृतकः काञ्चनगिरिः ॥ १२

नितम्बप्राग्भारः सहजनिजशृङ्गारसुभगो,
नगेशःपुण्यार्थी जननि ! तुलयामः कमपराम् ।
अपि स्यात् सादृश्यं सुकविरचितानामिहगिरां,
महाभाष्यार्थेषु द्वयमितियतस्त्वत्क्रमजुषाम् ॥ १३

गिरामीशे यन् मां तव कनककाञ्चीमणिमयी,
रणत्कारैः स्फारैः स्फुरितमतिमुच्चैः प्रकुरुते ।
लसत्तर्कोल्लासैः मधुरिमविलासैर्विलसितं,
वचोभिः प्रव्यक्तं कविजनमनोहारिभिरिव ॥ १४

गभीरं ते नाभी बिलमलसमह्माय नितरां,
मराला रोमाली तरुणभुजगीव प्रविशति ।
तमः स्निग्धामुग्धाकुटिल-कचकेकिप्रतिभयात्
कटीस्तत्रस्यान्तः शितमणिशिखावद् विजयते ॥ १५

समुत्खातालानप्रतिभसुभनाभी विलगलत्,
तनुत्वद्रोमाली सृणिरिव ममादोद्धुरमदः ।
कृतं तारुण्याख्यद्विरदनपतिस्तेनकुचयो-
र्द्वयं वास्तुं वास्तु क्ष्मथकटिमृगेन्द्रप्रतिभयात् ॥ १६

हविः कुण्डं रम्यं विषमविशिखश्रोतियपते-
स्तव श्यामारोमावलिरजनिधूमभ्रमकरी ।
ततो वश्यं चक्रे सकलमपि शक्रेश्वरपदं,
पदं चेदं नाभीपदमिव जगन्मोहनविधेः ॥ १७

त्वदीया यां रोमावलिवलित रज्जौसतिसति,
त्वदीयैर्लावण्यद्युतिभरजलैः पूर्णहृदये ।
पुरो नाभीकूपे कुचकलशयुग्मेषितृषितः,
पयःपानैरानन्दय तनयभूतस्य जननि ॥ १८

गभीरे त्वन्नाभी हृदि जलदनीलद्युतिजुषिः,
भूमावर्त्तज्योतिर्जलकिरणजम्बालकलिते ।
लसन्ती त्वद्रोमद्युतिविततधूमावलिरहो,
विपर्यस्ते हेतावनुमितिमतां सम्भ्रमपदम् ॥ १९

अहो मध्ये मध्यं करतलमलम्भित् त्रिवलितं,
त्रयी सोपानानामकृतसुकृते नाभिसरसि ।
यतः स्नात्वा कामस्तनरुहकुशार्ध्याञ्जलिविधे-
र्विधानात् त्रैलोक्ये मदयति मुनीनामपि मनः ॥ २०

तवामन्दानन्दस्फुरितमकरन्दैकरसिकै-
रमन्दानां वृन्दैरनुभवनसाम्राज्यभवनैः ।
विशङ्कं प्रत्यङ्गं स्तुतिगुणगणोद्गीतिमुखर-
प्रवृत्तिं कुर्व्वद्भिः कृशमुदरमाख्य सदसदी ॥ २१

अमन्दं मन्दारस्तकमनुचक्रे तव नवं,
स्तनद्वन्द्वं दीप्यत्कनककलशभ्रान्तिजनकम् ।
यतः कुम्भाकारं करिकलभकुम्भद्वयमथो,
ध्रुवं पूर्वाभ्यासे जननि करलेखोऽजनि विधेः ॥ २२

स्वयं तन्वी मध्ये धरणिधरपीनं कुचयुगं,
शरद्राकाश्वेतद्युतिसुमुखि ! तत् किं शितिमुखम् ।
नितान्तं मृद्वङ्गी तदधिकमधिस्तब्धकठिनं,
बहिस्तान्निर्यातं सुहृद इव वैधर्म्यवशतः ॥ २३

सरस्तीरे नीरे करशशशिरश्वेतशिशिरे,
वसच्चक्रद्वन्द्वं निशिशिशिरभानूत्थविरहात् ।
ततस्तस्थौ वक्षःसरसि तव चक्रेन्दुरुदगात्,
विधानं वा जातु प्रतिफलति धातुर्न वितथम् ॥ २४

कुचद्वन्द्वं चैतत् कुसुमशरतारुण्यनृपयोः,
सुमुक्तास्रग् गङ्गातटपटकुटीयुग्ममभितः ।
बभौ मुक्तादामत्रिदशतटिनी नीरनिकरा-
यितश्रीभिः पूर्णकलशयुगलं मुद्रितमिव ॥ २५

असौ सौवर्णाद्रिस्तुहिनगिरिरेतद्द्वयमथो,
मिथोऽप्येकीभूय स्वगरिमतुलामञ्चति यदि ।

विभुर्न स्वर्गङ्गाधवललहरीद्योतशिखरः,
पराजेतुं हारावलिविलसितं त्वत्कुचयुगम् ॥ २६

विभुः कम्बुः किं वा भवति भवती कण्ठकदली,
व्यलीकं त्रैलोक्यं तिसृभिरपि रेखाभिरकृत ।
विपञ्ची वादित्रे सरसरस-सङ्गीतरचना,
विधौ वेधाग्रामत्रिकनिकरविश्राममकरोत् ॥ २७

कलं कण्ठान्मन्ये मधुमधुरकूजत्कलकलं,
समाकर्ण्याकर्णं पिककुलमलं शिक्षितुमतः ।
समैच्छन् माधुर्यध्वनिमनुकुहूरात्रिजनिता,
ध्रुवं सिद्धिस्तस्मादिति खलु चुकूजेहि किल कुहूः ॥ २८

दूयन्ते दोर्वल्लीकरकमललीलाकुसुमिता,
ददाने वाऽजस्रं प्रणतजनताभीप्सितफलम् ।
न तस्यै तन्मातः करतलमलं त्वच्चरणयोः,
प्रसादार्हं भूयान्मम शिरसि कोटीरसदृशम् ॥ २९

इयं रेखारोम्नां तरलतरदण्डं हृदि पुनः,
कुचालाबुद्वन्द्वं वसति सुतरां वृत्तमतुलम् ।
गले तन्त्रीरेखा त्रितयमति वैदग्ध्यमधुरा,
रणद्वीणावक्त्रात् तव ननु किरन्तीव सुगिरः ॥ ३०

मृणालं यद्बालं करकमलमम्भोजतुलया,
त्वदीयाभ्यां दोर्भ्यां कतमकविरैक्यं तुलयति ।
प्रकृत्या यद् धत्ते जडजनितमन्तर्जडिमतां,
शशे वागीशानां प्रणिगदति पञ्चावयवताम् ॥ ३१

सदेतद्वासत्स्यात्सदसदपि वस्तुत्रिजगति,
त्रिधैतत्सापेक्षं प्रणयनयवादैकविदुषाम् ।
इतीव स्याद्वादं वदति सुदति ब्रह्मगदितं,
सुकण्ठि ! त्वत्कण्ठे स्फुरघटित-रेखात्रिकमिदम् ॥ ३२

यतो बिम्बं बिम्बं समजनि ततस्तेन सदृशं,
प्रवालं कः कुर्यात् त्वदधरसुधान्धः श्रुतविदा ।
त्वदीयो यद्योष्टस्तुलयतु मिथः सूक्तिरचना-
प्रवादैः सादृश्यं घटयतु यदन्योन्यविषयम् ॥ ३३

कराङ्गुल्यावेधास्तव मुखमिवाधाय निभृतो,
निरैक्षिष्ट स्पष्टं ननु तनुविधान व्युपरमे ।
कदोत्पन्नं भेजे चिबुकमतिसौन्दर्यसुभगं,
प्रयत्नो मध्यस्थः सफलयति कार्यं हि महताम् ॥ ३४

स्मितव्याजाद्दन्तच्छदरुचिमिवादाय चक्रु वा,
उभे सन्ध्ये बालातपतपनशोणाधरलते ।
तयोरन्तर्वेधाः प्रतिदिनमिदं भ्रामयति चेत्,
तथापि त्वन्नापि स्मितरुचि-पराध्यामपि कलम् ॥ ३५

व्ययीकारात्कामो द्वितय-शरशेषस्तु शरधीः,
चकार त्वन्नासां तिलकुसुम-नालावयविनीम् ।
त्रिविश्वव्यामोहे त्रितयविशिखानां विजयिनां,
समुख्यो वैमुख्यस्तदनिल इतीष्टे श्रुतिमिव ॥ ३६

अहं मन्ये धन्ये त्वदधरसुधाशीकरशर-
स्तटे चक्रद्वन्द्वं मुखविधुवियोगव्यसनिताम् ।

इतश्चेतश्चैतन्नयनयुगमुच्चैः प्रकुरुते,
चलल्लोलापाङ्गत्वरतरललीलाविलसितम् ॥ ३७

विवादे त्वन्नेत्रद्युतिभिरभितः सम्प्रतितरां,
पराजित्वा चक्रे शितिकमलमानीलवदनाम् ।
कटाक्षव्याक्षेप-क्षपितहरिणीलोचनयुगं,
श्रितश्रीभिः श्रीभिः सुखय सुखमासुन्दरमुखि ॥ ३८

शशद् छद्मच्छायामिषमुखशलाकांजितदृगा-
कृतीकारौपम्यप्रतिम-मुकुरुन्दीकृतविधुम् ।
शशाङ्को वैणाङ्कस्त्रिभुवनजनख्यातमहिमा,
हिमांशूच्चैर्वेधाः विघटयति चैनं घटयति ॥ ३९

जगज्ज्योतिर्ज्वालारुचिरुचिरजालो ज्वलमहः
सुधापुञ्जीकारद्युतिपतितिरस्कारनिपुणैः ।
कथं ते साधर्म्यं मुखमुखरतेजोभिरभितः,
समस्तं वा व्यस्तं त्रिजगदभिभूतं सुखमयाम् ॥ ४०

सुधांशुश्चण्डांशुः सुरपतिसुधाकुण्डमथवा,
मुधा यद् वाचार्यः किमुत विबुधानामथ सुधा ।
मदीयं चेतश्चेन्मधुमधुरशोणाधरमुदा,
रसैः सान्द्रासूक्तिः किरति तव वक्त्रात् नवनवा ॥ ४१

भ्रुवौ सज्जीभूतं धनुरतनुवीरस्य निशितैः
कटाक्षेषु क्षेपैस्त्रिजगदपि वेद्यं कलयति ।
परागस्तस्यायं हरनयनहव्यासनहुतं,
धनुः पौष्पं पूर्व्वं भवतु भवभङ्गाय भवताम् ॥ ४२

शिरः कण्ठादीनां प्रभवपदमासाद्य बहुशः,
समाकीर्णाः वर्णाः कथमपि न मान्ति स्म भुवने ।
श्रवः कूपेपालिश्रवणशरणीभूयवचनः,
प्रवाहा गच्छन्ति त्वदधरसुधासिन्धुजनिताः ॥ ४३

स्मितस्मेरोल्लास-प्रसृमरकपोलद्वयगुरुः
प्रभाभारैर्भग्नावरुणशशिनौ निर्मलरुची ।
चलत्ताराकारभ्रमजनकमुक्तापरिवृतौ,
तरां दोलायेते घनकनकताडङ्कमिषतः ॥ ४४

त्वदीये यद्भालस्थलविमलचन्द्रस्य तमसा,
गृहीत(ता)र्द्धे बिम्बे धनुरतनुसज्जीकृतमिदम् ।
भ्रुवोर्युग्मं तस्माद् ध्रुवमखिलविश्वस्य जयिनी,
महासिद्धिस्तस्याप्यजनि वितनोर्विस्मयपदम् ॥ ४५

सह स्पर्द्धां चक्रे त्वदलककलापैरथ मिथः,
कलापैर्मायूरैस्तव रुचिकलापेन विजितैः ।
अपूजि त्वत्केशग्रथितकुसुमैस्तेष्वपि च तै-
र्ददे वार्द्धं चन्द्रं करकृतमनादृत्य नितराम् ॥ ४६

शिरोजा राजन्ते तव शिरसि लावण्यसरसि,
जलानां जम्बालाः किमथ करवालाः स्मरपतेः ।
चमर्योऽधःपुच्छैर्निजचमरबालत्वजनितं,
ब्रुवाणाश्चापल्यं कथमथ बुधस्तेन तुलयेत् ॥ ४७

शिरोजव्यानद्धप्रगुणमणिमन्दारलतिका,
प्रसूनव्यामिश्रच्छविरजनिवेणी शबलिता ।
तमोवा वाहिन्याः कुसुममविशिष्यद्रुततमं,
विलीनं वा शङ्के तव नवमुखेन्दोरुदयनात् ॥ ४८

विशङ्के निःशङ्के चिकुरनिकुरम्बद्युतितति-
प्रवाहानां मार्गं समसृजत सीमन्तशिखतः ।
विधिः किं वाऽनङ्गो रतिमधुसखोऽनेन सुपथा,
जगज्जेतुं गन्ता कचकुसुम-मन्दारगहने ॥ ४९

भ्रुवौ नीलः शङ्खस्तव जननि ! शङ्खौ मुखकरौ,
महापद्मः पद्मो नयनयुगमुद्दिश्यमकरः ।
मुकुन्दः कुन्दो वा दशनततिरंह्री तु कमठो,
वपुर्वर्चोजालं तव नव निधीनां प्रतिनिधिः ॥ ५०

गदायाव्याघातैर्जनयसि भयं वैरिमनसां,
त्रिशूलेन प्रोतास्त्रिभुवनजनद्वेषिजननाः ।
परानन्दीभूय स्वमनसि ममोन्मेषितदृशोः,
सुधीभूय स्वाद्यं जननि ! तव रूपं विलसिताम् ॥ ५१

कथञ्चिद् वार्कौश्चत् कविभिरनुभूता भगवती,
कवित्वे वक्तृत्वे किल कमलवासातदपरैः ।
न चास्माभिस्तावत् परिचितचिदानन्दलहरी,
परीरम्भस्यूता ध्वनिपथमती तां परिचिता ॥ ५२

स्वतन्त्रा ते शक्तिः स्मरहरजटाजूटतटिनी,
तरङ्गव्यासङ्गामलकमललीला लसवती ।
सहार्थालङ्कारैर्नवनवमहाशास्त्रकरणे,
पराधीना तेषां भवतु भवती नाधिवसति ॥ ५३

यदग्रे ग्रावाणो गिरिगिरिषु गुर्व्वीं निजगिरं,
गृणन्तु ब्रह्माण्डोदरविवरकुक्षिम्भरितया ।
तदन्ये वैदग्ध्यं तव नवसुधासिन्धुलहरी,
परिस्यूतं वाचं पदललितलीलाविलसितम् ॥ ५४

त्वमम्बा त्वं तातस्त्वमसि परमं मित्रमधिकः,
सखा त्वं भ्राता त्वं भगिनि वरबन्धुस्त्वमसि मे ।
यशः ख्यातिर्लक्ष्मीः परमतमविद्या त्वमपरां,
किमद्वैतब्रह्मत्वमिव मम चित्तेऽधिवससि ॥ ५५

नृलोके लोकेषु ध्वनिजननिभाषात्मकतया,
दिवि स्वर्गेहानां स्फुटमुकुटमाणिक्यमणिभिः ।
नभस्ताराकारद्युमणिरमणीयं त्वदनुभि-
र्जगद्व्यासं दिव्यैर्मणिभिरिव पर्यासमभितः ॥ ५६

जगन्मातः प्रातः समुदितसहस्रांशुकिरणा-
रुणाङ्गीमानङ्गी जपति सुभगाद्याभिरभितः ।
तदा लोकादेव स्मरशरभरक्षोभितदृशां,
वशीकारः साक्षादमरतरुणीनां प्रभवति ॥ ५७

परविद्या विद्या त्वमसि वरदानप्रणयिनी,
चिदाकाराशक्तिसकलभुवनव्यापकतया ।
परानन्दस्यन्दामृतरससुधाम्भोधिलहरी,
सदा नन्दा वेद्या जगति जयति ब्रह्मपरमा ॥ ५८

अहो पूर्वं रम्यं नववदनपद्मं स्मितशित,-
प्रभा नित्योद्भिन्नं विधुरितरवीन्दुद्युतिभरम् ।
चिदानन्दामोदस्वरस-मकरन्दैकरसिकं,
मदीयं दृग्द्वन्द्वं भ्रमर इव तत्रैव रमतात् ॥ ५९

कलानां पारीणात् कविजनधुरीणाः नृपतिभिः,
सदामान्या धन्या गुणगणमणिव्रातनिधयः ।
स्मरन्त्येके केचित् सकलजनशृङ्गारलहरी-,
मिव पृथ्वीं बीजस्फुरितरुचिरूपां तव तनुम् ॥ ६०

नचार्व्वाचां वाचां तव जननि ! गम्यास्तुतिरिति,
प्रयासो नास्माकं भगवति ! भवत्या भवतु ते ।
कृतो गाङ्गैर्गङ्गामतनुत रमद्याञ्जलिविधिः,
पयःपूरैः सर्वं तव चतुरवाचां विलसितम् ॥ ६१

विद्या ताण्डवमण्डनाय कवितालङ्कारचूडामणिः,
विश्वेषामनुरञ्जनाय जनताशृङ्गारहारोपमः ।
ख्यातः पार्थिव एष बीजमिव यः शब्दागमानां निधि-
र्जीयाच्चेतसि पद्मसुन्दरकवेराचन्द्रतारावधिः ॥(शा.वि.) ६२

पू.मु. श्री जयवर्धनकविजयविरचितम्

## १४. ॥ श्रीसरस्वती-स्तोत्रम् ॥

जय जय वागीशे जये दात्रि ज्ञप्तिं देहि ।
कुरु कुरु कमलासिनि कृपां धाम स्वं सन्धेहि ॥ १

विश्वं वागुपवेणिता प्रीणयसि त्वं वाणि ।
अधरितसुधामधु ह्यन्तो वीणां किं करवाणि ॥ २

कालिदासप्रमुखान्पुरा मन्दान्मतिभारेण ।
व्यधिया गुरुतुल्यान्वरे साधितबहुसारेण ॥ ३

तव देवि क्षणतो द्रुतं कीटः करितामेति ।
तस्य न चित्रं किल कृतौ मनसा यदभिप्रैति ॥ ४

श्रुत्वा त्वापि समागमं लघुशिशुकं विज्ञाय ।
चिनु मे कामितसञ्चयं विधिवद्रतिं विधाय ॥ ५

पू.मु. श्री जयवर्धनकविजयविरचितम्

## १५. ॥ श्रीसरस्वती-स्तोत्रम् ॥

(अथ त्रिभङ्गीवृत्तम्)

हरिहरधात्राद्या जगदभिवाद्यास्तैरभिवाद्या सुस्मार्या,
जनजनितानन्दा मुखारविन्दा भासितचन्दा हृदि धार्या ।
अद्भुतवागीशा प्रणतदिगीशा श्रितभूमीशा भक्तिभरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥१

जगती विख्याता जगतां माता शब्दव्राता निष्णाता,
सेवककृतसाता योगिध्याता सदावदाता स्वाम्नाता ।

विद्वज्जनसेव्या जनतासेव्या बोधैर्भव्या विगतदरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥२

विकसितकजनेत्रा परिहितनेत्रा पूतक्षेत्राऽभ्यस्तकला,
गतिजितकलहंसा शिरोवतंसा यानितहंसा गुणविमला ।
अमृतद्युतिवदना मौक्तिकरदना धृतधीसदना सुखनिकरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥३

कलकण्ठीकण्ठा गेयोत्कण्ठा सुन्दरकण्ठा प्रियतालैः,
सङ्गीतविभेदा वेदितवेदा खेदितखेदाऽङ्गुलिचालैः ।
स्वररसझरवाहाऽतिशयवगाहा यदुपाविणयदुदितकरं, (?)
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥४

प्रतिवर्णविकल्पाः स्वरविधिकल्पाः कल्पाकरविस्पष्टा,
जातिव्यक्तिभ्यां सद्युक्तिभ्यामस्तस्फोटिभुवि शिष्टा (?) ।
यद्यानादिस्थं सर्वं सुस्थं व्यक्तीचक्रे परमपरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥५

जाड्याम्बुधिमग्ना-लाकृतिभुग्ना स्नेहाभुग्ना जननिचया,
अज्ञानतमोन्धा यथा दिवान्धा लसदमृताम्भा विधिनिचया ।
सर्वांस्तान् क्षणतः सद्वीक्षणतस्सल्लक्षणतस्त्वित्सुवरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥६

सत्पुस्तकहस्ता चेतःशस्ता बुद्धिनिरस्ता बुधताया,
वाग्भङ्गीतरङ्गा निर्जितगङ्गा सत्कतरङ्गा सच्छाया ।
उपनिषदादाना वरं ददाना तत्त्वनिदाना मुत्प्रकरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥७

सारस्वतरूपा ज्योतीरूपा भास्वद्रूपा नित्यस्था,
देवेन्द्रैर्नूता शुद्धाकूता विद्यापूता मध्यस्था ।
ओङ्कारोदारा चेष्टेस्फारा ज्ञानद्वारा घनरुचिरं,
त्वं कुरु गीर्वाणी श्रेयस्कारिणी दुःखनिवारिणी बुद्धिवरम् ॥८

(षट्पदकवित्वम्)
विदिता कल्पलतेव सिद्धिवृद्धेः पूरणतः,
क्षोणिजनतायाश्च देव्यसि त्वां मे भणतः ।
शुभवति शुभभावेन नयनप्राघुणकीकृत्यं,
वितर वितर मे मुहुः तत्त्वरायं संस्कृत्य ।
विजयादिहर्षमुत्कर्षतः सविजयवर्द्धनकं सदा ।
सद्ज्ञानतिलकदायं ततं ज्ञत्वसौख्यकरण मुदा ॥ ९

पू. पं. श्री दानविजयविरचितम्

## १६. ॥ श्रीसरस्वतीस्तोत्रम् ॥

सम्पूर्णशीतद्युति वक्त्रकान्ते !
लावण्यलीला-कमलानिशान्ते !।
त्वत्पादपद्मं भजतां निशाऽन्ते,
मुखे निवासं कुरुतात् सुकान्ते ! ॥ (इ.व्रजा) १

समञ्जुलं वादयती कराभ्यां,
यत् (सा?) कच्छपीं मोहितविश्वविश्वा ।
शक्तित्रिरूपा त्रिगुणाभिरामा,
वाणी प्रदेयात् प्रतिभां भजत्सु ॥ (उ.जा.) २

विद्यानिधेर्गौरिव गौर्विभाति,
कुक्षिम्भरिः सार्वजनीनचेताः ।

यस्या महिम्ना वदतां वरेण्य-
भावं भजन्ते पुरुषा विवर्णाः ॥ (इ.व्रजा) ३

सितपतत्त्रिविहङ्गमपत्रका
दनुजमानुजदेवकृताननतिः ।
भगवती परब्रह्ममहानिधिः,
वदनपङ्कजमेव पुनातु मे ॥ (द्रु.वि.) ४

विविधभूषणवस्त्र-समावृतां,
नवरसामृतकाव्यसरस्वतीम् ।
बहुजनान् ददतीं प्रतिभां मुहुः,
प्रमुदितः प्रतिनौमि सरस्वतीम् ॥ (द्रु.वि.) ५

ऐँकाररूपे ! त्रिपुरे ! समाये !,
ह्रीँकारवर्णाङ्कितबीजरुपे !।
निशासु शेते (ऽवसाने) चरणारविन्दं,
भजे सदा भक्तिभरेण देवि ! ॥ (उपजाति) ॥ ६

त्वद्ध्यानतः संस्मरणात् प्रकामं,
भवन्ति ते स्वर्भुवि कीर्तिपात्रम् ।
विद्याचणा ह्यैहिककीर्तिभाजो,
यथा हि दृष्टाः कवि कालिदासाः ॥ (उपजाति) ७

ॐ ह्राँ ह्रीँ मन्त्ररुपे ! विबुधजनहिते ! देवि देवेन्द्रवन्द्ये !,
चञ्चच्चन्द्रावदाते ! क्षपितकलिमले ! हारनीहारगौरे ! ।
भीमे भीमाट्टहासे ! भवभयहरणे ! भैरवे ! भैरवेशे !,
ॐ ह्राँ ह्रीँ हुङ्कारनादे ! मम मनसि सदा शारदे ! देहि तुष्टिम् ॥८
(स्रग्धरा)

इत्थं भक्तिभरेण मङ्क्षु मयका नीता स्तुतेः पद्धतौ
तत्तत्पाठवतां करोतु सुतरां विद्यामिमां भारती ।
विद्वद्‌वृन्दमनीषिदानविजयाऽशंसा ययाऽपूरि च
वाचालैककथा-कथङ्कथिकता यस्या निसर्गं फलम् ॥ ९
(शा.वि.)

पू. मु. श्री मुक्तिविमलगणिविरचितम्

## १७. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

ॐ ह्रीँ श्रीँ प्रथमा प्रसिद्धमहिमा विद्वद्‌जनेभ्यो हिता,
ऐँ क्लीँ ह्लीँ सहिता सुरेन्द्रमहिता-विद्याप्रदानान्विता ।
शुच्याचारविचारचारु-रचना चातुर्यचक्राञ्चिता,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ १

ॐ ह्रीँ श्रीँ सहिता वषड्द्वययुता स्वाहा नमः संयुता,
ह्रीँ क्लीँ ब्लीँ चरमा गुणानुपरमा भास्वत्तनुसद्‌रमा ।
ह्रीँ खीं ह्रीँ वरजापदत्त सुमतिः स्तों ऐँ सुबीजान्विता,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ २

क्षाँ क्षीँ क्षूँ लसदक्षराक्षरगणै र्या ध्येयरुपा सदा,
ह्रीँ ह्रीँ हूँ कलिता कला सुललिता ह्रीँ ह्रीँ स्वरूपा मुदा ।
चञ्चच्चन्द्रमरीचिचारुवदना स्वेष्टार्थसार्थप्रदा,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ३

ऐँ क्लीँ क्रूँ वरयोगिगम्यमहिमा नौकाभवाम्भोनिधौ,
वीणावेणुकणक्वणातिसुभगा सौभाग्यभाग्योदया ।

संसारार्णवतारिणी सुचरिणी श्रीकारिणी, धारिणी,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ४

श्राँ श्रीँ श्रूँ सहिता सिताम्बरधरा साध्या सदा साधुभिः,
देवानामपि देवता कुविपदां छेत्त्री पदं सम्पदाम् ।
दिव्याभूषण-भूषितोज्ज्वलतला कल्याणमालालया,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ५

हस्ते शर्मदपुस्तिकां विदधती सज्ज्ञानवृन्दप्रदा,
या ब्राह्मी श्रुतदेवता विदधते सौख्यं नृणां शारदा ।
सद्वादे प्रसरन्तु मे स्फुटतरं शास्त्रे कवित्वे धियो,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ६

भव्यानां सुखदा प्रभूतवरदाऽनन्दर्द्धिकीर्तिप्रदा,
भ्राजद् वीरमहोदयोत्करकरा स्फूर्जत्प्रमोदप्रदा ।
मण्युद्योत-सुदानदा शुभदया सौभाग्यसद्भाग्यदा,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ७

भूपश्रीसुकुमारपालसुगुरोः श्रीहेमसूरिप्रभो-
राम्नायादधिगम्य मन्त्रसुविधिं मन्त्राक्षरैस्तैः स्तुताः ।
प्रख्याताख्ययुता सुमुक्तिविमलाख्यर्षेः प्रबुद्धिप्रदा,
जिह्वाग्रे मम सा वसत्वविरतं वाग्देवता सिद्धिदा ॥ ८

संवत् क्ष्मायुगनन्दभूपरिमिते चैत्रासितैकादशी,
घस्त्रे वारशनौ सुदर्शनमिदं वाग्देवतायाः कृतम् ।
क्लृप्तं स्तोत्रमिदं सुमुक्तिविमलेनाऽऽजारिसञ्ज्ञे पुरे,
सन्मन्त्रादियुतं सदा विजयतां यावन्मृगाङ्कारुणौ ॥ ९

पू.मु. श्री लक्ष्मीविजयकृतम्

## १८. ॥ श्रीशारदास्तोत्रम् ॥

(स्रग्धरा)

श्रीमत्यम्बे ! नमस्ते भगवति ! वरदे ! शारदा देव्यमन्दे !,
श्रीमत्काश्मीरदेशोद्भवघुसृणलसद् वासना वासिनीने ।
नाथे त्वां प्रार्थयेऽहं सुरनरमुकुटस्पृष्टपादारविन्दे,
विद्यादानं प्रदेहि प्रगलिततमसे मे सदा बुद्धिवृद्ध्यै ॥ १

भेजे हृत्पद्मकोशे प्रथममिहशुचि भारती नाम मुख्यं,
स्मृत्वा नाम द्वितीयं मम सुहृदि सरस्वत्यमेयं च शुद्धम् ।
हर्षोल्लासात् तृतीयं वचनकरि विभुं शारदा देव्यपूर्वं,
नाम ध्येयं चतुर्थं वरगुणसदनं हंसगामिन्यनूनम् ॥ २

माता विद्वद्जनानां व्रतिहृदयलसत्पञ्चमं नाम भव्यं,
षष्ठं वाघेश्वरी तद् रविहयमुखमिन्नाम चोक्तं कुमारी ।
सम्यग्गेयाष्टमन्नामगददलवितिब्रह्मचारिण्यमायम्,
प्रोत्तुङ्गं नन्दसङ्ख्यं त्रिपुरसुजननी नाम पङ्कापहारि ॥ ३

सानन्दं ब्रह्मपुत्रि दसमममितिमतं नाम चैकादशं हि,
ब्रह्माणी नाम नूनं सुरनरसुखकृद् द्वादशं ब्रह्मवक्त्री ।
वाणी श्रद्धाभिजसं त्रिदसममरनुतयोगिगम्यस्वरूपम्,
भाषालोक प्रमाणं श्रुतवचनसुयुग् देव्यधीशेन्दुपञ्च ॥ ४

श्रीमद् गौषोडशंसद्विकटकभयभिन्नाम शत्रुप्रमर्दि,
प्रातश्चैतानि भव्यो निजहृदयकजे शुद्धनामानि मातुः ।

धन्योजस्त्रं प्रमोदात् स्मरति शुचिमनो यः पुमान् भूरिभक्त्या,
देवी श्री शारदा कविजन वरदा तस्य सन्तुष्यते द्राक् ॥ ५

या देवी स्तूयतेऽर्हद् विबुध-जनगणैर्वेदवेदान्तविज्ञै,-
र्जिह्वाग्रे सुप्रसन्ना भवतु मम सदा दानवेन्द्रादिमान्या ।
भाग्यैर्दृष्टा मया या कजदलनयना हंसयानाधिरूढा,
सद्वीणा पुस्तिकाक्ष-द्युतिभरविलसत्पाणि-रक्तोत्पलाभा ॥६

या कुन्देन्दुप्रभांशुप्रचलदधिकभा शुभ्रवस्त्रावृताङ्गी,
या तन्त्री दण्डहस्ता, प्रकलितरचना पूज्य-पूजाभि पूज्या ।
या ब्रह्मेन्द्रेश-विष्णुप्रमुखसुरलसद्वन्द्यपादाब्ज-सद्मा,
सा मां सम्पातु देवी परमसुखकरा शारदा विघ्नहन्त्री ॥ ७

याऽऽनन्दानन्दकन्दा दलितहरिहरा दत्त-विद्यैकदाना,
या धन्या धन्यरूपा धनदनतपदा तेजसा द्योतितास्या ।
रम्भारूपाभिरामा सुरमणिरुचिरा रङ्गरङ्गायमाना,
कुम्भीकुम्भस्थलाभा कुचयुगलहरी पूर्यमाणार्द्धहारा ॥ ८

या श्रीभालस्थलाङ्कप्रचित-तिलका कुण्डलाकीर्णकर्णा,
चञ्चद्हारार्धहाराऽवनतसुहृदया नासिकामौक्तिकाढ्या ।
ग्लौमार्तण्डोडुपङ्क्तिरचितकरलसत्कङ्कणस्वर्णचूडी,
कूजत्काञ्चीकलापा कुलकलित-कटी पादमञ्जीरशब्दा ॥ ९

चन्द्रास्या भानुतेजा कनककलसजित् सुस्तनाकारद्वीपा,
बिम्बोष्ठी रक्तपाणी कजदलसमदृग्बालबाहू प्रसिद्धा ।
शुण्डादण्डोरुयुग्मा चरणनखविभाद्योतिताऽभ्रोडुमाला,
सेयं श्रीकामदात्री भवतु मम सदा शारदा सुप्रसन्ना ॥ १०

मातस्त्वन्नाममन्त्रस्मरणसुवसतः क्षुद्रजन्त्वादिपीडा,
सङ्ग्रामाग्नीभसिंहोदरभय-जलयुग्चौरदावानलाहि ।
पारावारप्रकर्षोत्कट-विकटभराक्रान्तरोगारिदुष्टा,
भूतप्रेतादियक्षः प्रमुखविसुरक्षत् बन्धनोत्था क्षयं स्यात् ॥११

स्फूर्जन्मत्तेभघण्टक्वणितबधिरितो दिग्गजश्रोत्रमध्या,
हेषागर्ज्जत्तुरङ्गत्वरितपवनजिद् वेगदर्प्पाभिसस्याः ।
सौधश्रेणीसुदीप्रप्रचुरधनभृतोत्सङ्गसङ्गीतहृद्याः,
तेषां स्युः सम्पदस्ते प्रतिदिनमुदयत् संस्तवं ये स्मरन्ति ॥१२

ये ध्यायन्ति त्वदीयं श्रवणसुखकरं स्तोत्रमेतद् गुणाढ्यम्,
गोदन्त्यश्वादिजन्तु-प्रजसदनजनाकीर्णशृङ्गारभास्वत् ।
कान्तिप्रोत्तुङ्गदीप्ति-प्रबलगृहमणिध्वस्त-रात्र्यन्धकाराः
तेषां धिष्णे सदैवं भवति तवमयी पर्वदीपालिकोच्चा ॥ १३

युष्मद् गाम्भीर्ययुक्तं विमलतरमति कण्ठपीठे स्तवं ते,
धत्ते यो सत्सुरम्यं विविधविपुलसद्वर्णपुष्पाद (व) कीर्णाम् ।
गौरी गङ्गोर्वशी त्वच्छुचिचरणपदाम्भोजभृङ्गीसमाना,
श्रीमद्ध्यानाच्च चित्तं तमिह सुपुरुषं सद्वरोपैतिवाणी ॥ १४

ये योगीन्द्रासनस्था अरुणगुणलसत्त्वत्पदाम्भोजभृङ्गा,
ॐ ह्राँ ह्रीँ जापमन्त्रं हृदयसुकमले शारदायाः स्मरन्ति ।
प्रज्ञा-तुष्टिप्रपुष्टि विजय-जयभृता प्राप्नुवन्तीह ते शं,
मातस्तेषां जडानां दह दह जडतां देहि बुद्धिं च तस्मै ॥ १५

त्वद्वेणीजितशेषनागनिपुणः पातालमध्यस्थितः,
युष्मदास्य मुनिर्जितोऽत्र भुवने चन्द्रो भ्रमच्चाम्बरे ।

तत्त्वल्लोचनतर्जितश्च हरिणो वासं श्रितकानने,
त्वच्छोणीजितकेसरी-लघुभयप्राप्तोऽविशत्कन्दराम् ॥ १६

श्रीमन्माघकवीश्वराप्तविजयस्त्वद्-ध्यानकल्पद्रुतः,
त्वत्सेवाति सुसम्यगाप्तवरभाग् श्री कालिदासोऽभवत् ।
हेमाचार्य-सुबप्पभट्ट विदतामर्त्येन्द्र-पूज्यक्रमाः
जातास्ते भवदीयशक्तिवशतः लब्धोदया भूतले ॥ १७

सूरिश्रीविजयप्रभाप्तमहिमन् कान्तिप्रभावाद्भुताः,
श्रीहर्षाभिधपण्डितेन्द्रविजयास्तच्छिष्यभक्त्यान्विताः ।
विद्वद्रञ्जित पर्षदालिमहिता लीलाङ्गनाभ्यर्चिताः,
स्युर्लक्ष्मीविजयाभिसेवितपदो वाचंयमा नन्दिताः ॥ १८

इत्थं विख्यातसिद्धं प्रकटित-विभवं वर्णराजिविचित्रं,
संपूर्ण स्तोत्रमेतद् दुरितनिकरच्छित्ते मयाऽकारि शुद्धम् ।
द्वाषष्टीवत्सराह्वे शरदमदयुते चाश्विने मासि दर्शे,
हर्षोत्कर्षप्रकर्षप्रमुदितमनसा भक्तिप्रह्वेन लक्ष्म्या ॥ १९

सज्ज्ञानभास्करकरोदयवेदिसंस्थ,-
मासाद्य मानवगणोऽत्र तव प्रसादम् ।
कुर्वन्ति मन्दमतयो भवदीयशक्त्या,
भास्वत्सुकाव्यममलं कविचित्तहारि ॥ २०

सरस्वती संस्तवनं प्रभाते, गणत्यधीते मतिमान् मुदा यः ।
ददाति विद्यां सुरधेनुरूपा, सरस्वती तस्य महोदयाय ॥ २१

पू. श्री मलयकीर्तिमुनीश्वरविरचितम्

## १९. ॥ श्रीशारदाष्टकम् ॥

(द्रुतविलम्बित)

जननमृत्यु-जराक्षयकारणं सकलदुर्नय-जाड्यनिवारणम् ।
विगतपारभवाम्बुधितारणं समयसारमहं परिपूजये ॥ १

(इत्युच्च्यार्य पुस्तकोपरि पुष्पाञ्जलिं क्षिपेत् श्रुतिपूजनप्रतिज्ञा।)

जलधिनन्दन-चन्दनचन्द्रमः सदृशमूर्तिरियं परमेश्वरी ।
निखिलजाड्यजटोग्रकुठारिका दिशतु मेऽभिमतानि सरस्वती॥ २

विशदपक्ष-विहङ्गमगामिनी विशदपक्ष-मृगाङ्कमहोज्वला ।
विशदपक्ष-विनेयजनार्चिता दिशतु मेऽभिमतानि सरस्वती ॥३

वरददक्षिणबाहुधृताक्षका विशदवामकरार्पितपुस्तिका ।
उभयपाणिपयोजधृताम्बुजा दिशतु मेऽभिमतानि सरस्वती ॥४

मुकुटरत्नमरीचिभिरूर्ध्वगैर्वदति या परमां गतिमात्मनि ।
भवसमुद्रतरी तु नृणां सदा दिशतु मेऽभिमतानि सरस्वती ॥५

परमहंस-हिमाचलनिर्गता सकलपातक-पङ्कविवर्जिता ।
अमृतबोधपयः परिपूरिता दिशतु मेऽभिमतानि सरस्वती ॥६

परमहंसनिवास-समुज्वला कमलया कृतिपाशमनोत्तमा ।
वहति या वदनाम्बुरुहं सदा दिशतु मेऽभिमतानि सरस्वती ॥७

सकलवाङ्मयमूर्तिधरापरा सकलसत्त्वहितैकपरायणा ।
सकल-नारदतुम्बरुसेविता दिशतु मेऽभिमतानि सरस्वती ॥८

मलयचन्दनचन्द्ररजःकणप्रकरशुभ्रदुकूलपटावृता ।
विशदहंसकहारविभूषिता दिशतु मेऽभिमतानि सरस्वती ॥ ९

मलयकीर्तिकृतामपि संस्तुतिं पठति यः सततं मतिमान्नरः ।
विजयकीर्तिगुरोः कृतिमादरात् सुमतिकल्पलताफलमश्नुते ॥१०

ॐ ह्रीँ श्रीँ क्लीँ ऐँ नमः सरस्वती भगवती बुद्धिवर्द्धिनी स्वाहा

पू. श्री सुमतिसागरमुनिविरचितम्

## २०. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(द्रुतविलम्बित)

सकललोकसुसेवितपत्कजा वरयशोजितशारदकौमुदी ।
निखिलकल्मषनाशनतत्परा, जयतु सा जगतां जननी सदा ॥१

कमलगर्भविराजितभूवना, मणीकिरीटसुशोभितमस्तका ।
कनककुण्डलभूषितकर्णिका, जयतु सा जगतां जननी सदा ॥२

वसुहरिद्गजसंस्नपितेश्वरी विधृतसोमकला जगदीश्वरी ।
जलजपत्रसमानविलोचना, जयतु सा जगतां जननी सदा ॥ ३

निजसुधैर्यजितामरभूधरा निहितपुष्करवृन्दलसत्करा ।
समुदितार्कसदृक्तनुवल्लिका, जयतु सा जगतां जननी सदा ॥४

विविधवाञ्छितकामदुघाम्बुता विशदपद्मनदान्तरवासिनी ।
सुमतिसागरवर्द्धनचन्द्रिका, जयतु सा जगतां जननी सदा ॥५

पू.मु. श्री साधुकीर्तिकृतः

## २१. ॥ श्रीभारतीस्तवः ॥

(उपजाति)

श्री शारदा शास्त्रसुबुद्धिदाता, मनोरमा सर्वजनस्य माता ।
समस्त मूर्खत्वभयाच्च पाता श्रियेऽस्तु सा मे पटुता विधाता॥१

नीहारमुक्तावलिहारशुद्धा, विश्वत्रये या सकले प्रसिद्धा ।
नरेन्द्र-नागेन्द्र-सुरेन्द्रसेव्या, विद्या विशुद्धा च सदातिभव्या ॥२

संसारभीमार्णवतारका सा, भव्याङ्गिनां पूरितसर्वथाशा ।
गुणाकराच्छेदित सर्वपाशा, न वन्दिता यैर्भुवि ते हताशा ॥ ३

कल्याणमालाकरणेतिदक्षा, ददाति भक्तस्य सदैव शिक्षा ।
सम्मोहनी कामित-कल्पवल्ली, दुर्बुद्धिसारङ्ग विनाशभल्ली ॥४

आनन्द-भूमीरुहवारिधारा, विज्ञान-सद्ध्यानधरातिसारा ।
मातङ्गवेतालपिशाचमानी, निर्नाशिनी भासुरहंसयानी ॥ ५

शुद्धकर्पूरसच्चन्दनैश्चर्चिता, निष्प्रभावादिकैर्दोषभिर्वर्जिता ।
पुस्तकन्यस्तहस्ताख्यमालान्विता,
पङ्कजं बिभ्रती सत्सुधासंयुता ॥ (स्त्रग्विणी) ६

दीप्तिसौभाग्यलावण्यगुणराजिता,
स्वस्वरूपेण देवीगणास्तर्जिता ।
सज्जनानेकलोकैः समावर्जिता,
स्वर्गपातालभूमस्तके गर्जिता ॥ (स्त्रग्विणी) ७

श्रीशारदायाः स्तवनं पठन्ति, प्रभातकालेऽत्र नरोत्तमा ये ।
तेषां गृहे स्यात्सुखसाधुकीर्तिः सञ्जायते निर्मलकाव्यशक्तिः ॥८

पू.श्री सागरमुनिविरचितम्

## २२. ॥ श्रीसरस्वतीस्तोत्रम् ॥

नमोऽस्तु वचनं श्रुत्वा देहस्थाः पञ्चदेवताः ।
तुष्यन्ति तत्क्षणादेव ह्रीश्रीधीधृतिकीर्तयः ॥ (अनुष्टुप्) १

हंसारूढा वसुभुजां काश्मीराद्रिनिवासिनी ।
ऐँ नमः शारदे तुभ्यं विद्यां देहि ममेश्वरी ॥ (अनुष्टुप्) २

सरस्वतीं नौमि समस्तपूजितां,
सुरासुरेन्द्रैर्विधिवन्दिताक्रमम् ।
वीणाधरां पुस्तकधारिणीं वरां,
मरालयानां वरदायिनीं शुभाम् ॥ (उपजाति) ३

मुखे मुखे यद्वसनं प्रसिद्धं, कवित्वदं हर्षकरां नृणां च ।
सा गीः सदा मे दुरितौघहर्त्री,
वासं विधत्ता हृदयाम्बुजे हि ॥ (उपजाति) ४

जगन्मातस्त्वां ये परमतरभक्त्या प्रतिदिनं,
स्मरन्ती(न्ति)चाभीष्टं फलमतुलमायान्ति सह ते ।
सतीभिर्लक्ष्मीभिर्मुनिजनस्तु वीक्ष्यास्यकमलां,
जिनेन्द्रास्योद्भूतां गणधरगणार्च्यां सविनयम् ॥(शिखरिणी) ५

भो मातस्तवपादपद्मवसनं याचेऽनिशं भावतः,
किं राज्येन धनेन किं प्रमदया सुबुद्धि–सौख्यप्रदम् ।
एतस्मादधिकं सुखं न जगतीहामुत्र जानेऽन्वहं,
त्वद्भक्तं परिपालयाशु भवभी–कष्टं हर श्रीगिरे ॥(शा.वि.) ६

वरमौक्तिकहारसुशोभिकुचां, कमनीयसुकोमलदेहलताम् ।
कनकाभरणां धृतचन्द्रकलां,
शुभशारदचन्द्रमुखीं प्रभजे ॥ (तोटक) ७

यदीयं वपुः सूर्यबिम्बानुकारी, स्फुटानिष्टजाड्यान्धकारापहारि।
वरीवर्ति तीर्थोपमं ध्यानगम्यं,
जगत्कारणं तारकं सर्वरम्यम् ॥ (भुजङ्गप्रयात) ८

प्रणवाक्षरवाग्भवमन्त्रपदं, कथितं समये नमसा सहितम् ।
गुरुवक्त्रकजान्निहितं हृदये,
विदधासि बृहस्पतितुल्यधियम् ॥ (तोटक) ९

सपादलक्षं प्रजपेत्सुशीलो, मन्त्रो वृतस्थो विधिपूर्वकं यः ।
तस्मै ददात्येव कलिन्दिकाङ्गीः,
सद्भाववृद्ध्या परिशीलिताम्बा ॥ (उपजाति) १०

प्रसन्नभावं कुरु नन्दनोपरि, श्रुतेश्वरी त्वच्चरणारविन्दयोः ।
गुणस्तुति संविदधानके मयि,
परिस्फुरत्युग्रसुखं सदेप्सितम् ॥ (वंशस्थ) ११

त्वन्नाममन्त्रस्मरणाज्जडो ना, सञ्जायते ग्रन्थकरः कवीन्द्रः ।
वाग्देवता सा निजरूपलाभं,
मह्यं प्रदत्तात् करुणां विधाय ॥ (इन्द्रवज्रा) १२

सरस्वतीसेवकसागरेण व्यधायि वाण्याः स्तव उत्तमोऽयं ।
त्वल्लाभवित्तात् पठितो विशुद्धा-
ज्ज्ञानं समुत्पादयतीह शश्वत् ॥ (उपजाति) १३

पू. आचार्य श्री पद्मनन्दीकृतम्

## २३. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(वंशस्थ)

जयत्यशेषामरमौलिलालितं
सरस्वति ! त्वत्पदपङ्कजद्वयम् ।
हृदि स्थितं यज्जनजाड्यनाशनं
रतो विमुक्तं श्रयतीत्यपूर्वताम् ॥ १

अपेक्षते यत्र दिनं न यामिनी
न चान्तरं नैव बहिश्च भारति !।
न तापकृज्जाड्यकरं न तन्महः
स्तुवे भवत्याः सकलप्रकाशकम् ॥ २

तव स्तवे यत्कविरस्मि साम्प्रतं
भवत्प्रसादादिव लब्धपाटवः ।
सवित्रि गङ्गासरितेऽर्घदायको
भवाम्यहं तज्जलपूरिताञ्जलिः ॥ ३

श्रुतादि केवल्यपि तावकीं श्रियं
स्तुवन्नशक्तोऽहमिति प्रपद्यते ।
जयेति वर्णद्वयमेव मादृशा
वदन्ति यद्देवि ! तदेव साहसम् ॥ ४

त्वमत्र लोकत्रयसद्मनि स्थिता
प्रदीपिका बोधमयी सरस्वति ।
तदन्तरस्थाऽखिलवस्तु सञ्चयं
जनाः प्रपश्यन्ति स दृष्टयोप्यतः ॥ ५

नभः समं वर्त्म तवातिनिर्मलं
पृथु प्रयातं विबुधैर्न कैरिह ।
तथापि देवि ! प्रतिभासतेतरां
यदेतदक्षुण्णमिव क्षणेन तत् ॥ ६

तदस्तु तावत्कवितादिकं नृणां
तव प्रभावात्कृतलोकविस्मयम् ।
भवेत्तदप्याशु पदं यदिष्यते
तपोभिरुग्रैर्मुनिभिर्महात्मभिः ॥ ७

भवत्कला यत्र न वाणि मानुषे
न वेत्ति शास्त्रं स चिरं पठन्नपि ।
मनागपि प्रीतियुतेन चक्षुषा
यमीक्षसे कैर्न गुणैः स भूष्यते ॥ ८

स सर्ववित्पश्यति वेत्ति चाखिलं
नवा भवत्या रहितोऽपि बुध्यते ।
तदत्र तस्यापि जगत्त्रये प्रभो-
स्त्वमेव देवि ! प्रतिपत्तिकारणम् ॥ ९

चिरादतिक्लेशशतैर्भवाम्बुधौ
परिभ्रमन् भूरि नरत्वमश्नुते ।
तनूभृदेतत्पुरुषार्थसाधनं
त्वया विना देवि ! पुनः प्रणश्यति ॥ १०

कदाचिदेवं त्वदनुग्रहं विना
श्रुते ह्यधीतेऽपि न तत्त्वनिश्चयः ।

ततः कुतः पुंसि भवेद्विवेकिता
त्वयि विमुक्तस्य तु जन्म निष्फलम् ॥ ११

विधाय मातः ! प्रथमं त्वदाश्रयं
श्रयन्ति तन्मोक्षपदं महर्षयः ।
प्रदीपमाश्रित्य गृहे समस्तते
यदीप्सितं वस्तु लभेत मानवः ॥ १२

त्वयि प्रभूतानि पदानि देहिनां
पदं तदेकं तदपि प्रयच्छति ।
समस्तशुक्लापि सुवर्णविग्रहा
त्वमत्र मातः ! कृतचित्रचेष्टिता ॥ १३

समुद्रघोषाकृतिरर्हति प्रभौ
यदा त्वमुत्कर्षमुपागता भृशम् ।
अशेषभाषात्मतया त्वया तदा
कृतं न केषां हृदि मातरद्भुतम् ॥ १४

स चक्षुरप्येष जनस्त्वया विना
यदन्ध एवेति विभाव्यते बुधैः ।
तदस्य लोकत्रितयस्य लोचनं
सरस्वति ! त्वं परमार्थदर्शने ॥ १५

गिरा नरप्राणितमेति सारतां
कवित्ववक्तृत्वगुणे च सा च गीः ।
इदं द्वयं दुर्लभमेव ते पुनः
प्रसादलेशादपि जायते नृणाम् ॥ १६

नृणां भवत्सन्निधिसंस्कृतं श्रवो
विहाय नान्यद्धितमक्षयं च तत् ।
भवेद्विवेकार्थमिदं परं पुन-
र्विमूढतार्थं विषयं स्वमार्प्यत ॥ १७

कृत्वापि ताल्वोष्ठपुटादिभिर्नृणां
त्वमादिपर्यन्तविवर्जितस्थितिः ।
इति त्वयापीदृशधर्मयुक्तया
स सर्वथैकान्तविधिर्विचूर्णितः ॥ १८

अपि प्रयाता वशमेकजन्मनि
द्युधेनुचिन्तामणिकल्पपादपाः ।
फलन्ति हि त्वं पुनरत्र चापरे
भवे कथं तैरुपमीयसे बुधैः ॥ १९

अगोचरो वासरकृन्निशाकृतो
जनस्य यच्चेतसि वर्तते तमः ।
विभिद्यते वागधिदेवते त्वया
त्वमुत्तमज्योतिरिति प्रगीयसे ॥ २०

जिनेश्वर स्वच्छसरः सरोजिनी
त्वमङ्गपूर्वादिसरोजराजिता ।
गणेशहंसव्रजसेविता सदा
करोषि केषां न मुदं परामिह ॥ २१

परात्मतत्त्वप्रतिपत्तिपूर्वकं
परं पदं यत्र सति प्रसिद्ध्यति ।

कियत्ततस्ते स्फुरतः प्रभावतो
नृपत्वसौभाग्यवराङ्गनादिकम् ॥ २२

त्वदङ्घ्रिपद्मद्वयभक्तिभाविते
तृतीयमुन्मूलति बोधलोचनम् ।
गिरामधीशे सह केवलेन यत्
समाश्रितं स्पर्धमिवेक्षतेऽखिलम् ॥ २३

त्वमेव तीर्थं शुचिबोधवारिमत्-
समस्तलोकत्रयशुद्धिकारणम् ।
त्वमेव चानन्दसमुद्रवर्धने
मृगाङ्कमूर्त्तिः परमार्थदर्शिनाम् ॥ २४

त्वयादिबोधः खलु संस्कृतो व्रजेत्
परेषु बोधेष्वखिलेषु हेतुतां ।
त्वमक्षि पुंसामिति दूरदर्शने
त्वमेव संसारतरोः कुठारिका ॥ २५

यथाविधानं त्वमनुस्मृता सती
गुरूपदेशोयमवर्णभेदतः ।
न ताः श्रियस्ते न गुणा न तत्पदं
प्रयच्छसि प्राणभृते न यच्छुभे ॥ २६

अनेकजन्मार्जितपापपर्वतो
विवेकवज्रेण स येन भिद्यते ।
भवद्वपुः शास्त्रघनानिरेति तत्
सदर्थवाक्यामृतभारमेदुरात् ॥ २७

तमांसि तेजांसि विजित्य वाङ्मयं
प्रकाशयद्यत्परमं महन्महः ।
न लुप्यते तैर्न च तैः प्रकाश्यते
स्वतः प्रकाशात्मकमेव नन्दतु ॥ २८

तव प्रसादः कवितां करोत्यतः
कथं जडस्तत्र घटेत मादृशः ।
प्रसीद यत्रापि मयि स्वनन्दने
न जातु माता विगुणेपि निष्ठुरा ॥ २९

इमामधीते श्रुतदेवतास्तुतिं
कृतिं पुमान् यो मुनिपद्मनन्दिनः ।
स याति पारं कवितादि सद्गुण-
प्रबन्धसिन्धोः क्रमतो भवस्य च ॥ ३०

कुण्ठास्तेऽपि बृहस्पतिप्रभृतयो यस्मिन् भवन्ति ध्रुवं,
तस्मिन् देवि तव स्तुतिव्यतिकरे, मन्दा नराः के वयम् ।
तद्वाकचापलमेतद् श्रुतवतामस्माकमम्ब ! त्वया,
क्षन्तव्यं मुखरत्वकारणमसौ येनातिभक्तिग्रहः ॥ ३१

श्री रत्नवर्धनकविविरचितम्

## २४. ॥ श्रीभारतीस्तोत्रम् ॥

सद्भावभासुर-सुरासुरवन्द्यमाना
मानासमानकलहंसविशालयाना ।
या नादबिन्दुकलयाकलनीयरुपा,
रूपातिगाऽस्तु वरदास्फुरदात्मशक्तिः ॥ (वसन्ततिलका) १

कुन्देन्दुहारघनसारसमुज्ज्वलाभा
विश्राणिताश्रितजनश्रुतसारलाभा ।
मुक्ताक्षसूत्रवरपुस्तकपद्मपाणी
राज्याय सा कविकुले जिनराजवाणी ॥ (वसन्ततिलका) २

चूडोत्तंसितचारुचन्द्रकलिकाचिद्रूपचक्रे चिरम्,
चेतश्चित्रदचातुरी चयचितं चित्तामृतं चिन्वती ।
चातुर्वर्ण्यचटूक्तिचर्च्यचरणाऽचण्डी चरित्राञ्चिता,
चञ्चच्चन्दनचन्द्रचर्चनवती पातु प्रभोर्भारती ॥ (शार्दूल.) ३

कमलाऽलङ्कृत(वर)करकमला
करकमलाऽलङ्कृत करकमला ।
या सा ब्रह्मकलाकुल कमलात् श्रुतदेवी दिशतु श्रुतकमलाः ॥१

कमलासनकमलनेत्र मुख्यामल सुरनरवन्दितपदकमला ।
कमलाजक्षेत्रनेत्रनिर्वर्णन निर्जित मृगपुङ्गवकमला ॥ २

कमलाधववर्या दिशतु सपर्यां श्रुतव (च) र्यां निर्यदकमला ।
कमलाकृ(ङिक?)तरोलविलोल
कपोलकरुचिजित कमलाकरकमला ॥ ३

जिनराजवदनपङ्कजविलासरसिका मरालबालेव ।
जयति जगज्जनजननी श्रुतदेवी विनमदमरजनी ॥ ४

रजनीवरपीवरप्रवरशचीवरसिन्धुर-बन्धुरगुणनिलया ।
लयलीन-विलीनपीनमीनध्वजयति जनजनिता शुभविलया ॥५

लयतानवितानगानगायन सखिवीणा-वादविनोदमनाः ।
मननात्मकचरिता-विदलित-
दुरिता जननि ! त्वं जय निर्वृजिना ॥ ६

तव भारति ! पदसेवारेवामासाद्य कोविदद्विरदाः ।
नवरस-ललनविलोलाः कोलाहलमुल्लपन्ति सूक्तरसैः ॥ ७

रससङ्गतिचङ्गसूक्तमुक्तामणि-शुक्तिरुरीकृतमुक्तिकला ।
कलि(वि)तौघ विमोघ सारसारस्वत-
सागरवृद्धि विधे(धी?)न्दुकला ॥ ८

कलनाद-विभेदबिन्दुवृन्दारक विदितब्रह्मज्ञानशुभा ।
शुभि (सुमि)ताङ्गोपाङ्गकसुभगे !
त्वं मयि देवि ! प्रसीदकैत(र)वभा ॥ ९

करपङ्कजाग्रजाग्रज्जपदामनिका ममाहकमलम् ।
वीणापुस्तक-कमलं हेतु(हे.सु) तनो !
ते धिनोतु मम कमलम् ॥ १०

कमलच्छदसत्पदविद्रुमकन्दल-सरलाङ्गुलिमणिसखरनखरा ।
न खरा क्रमवर्तुलमृदुजङ्घोज्ज्वलरम्भास्तम्भशुभोरुवरा ॥ ११

वरभा वरगतिरतिविततश्रोणीपुलिना तलिनोदरमधुरा ।
मधुरावधिवचनालाप-कलापा
त्वं जय जय नतसुरनिकरा ॥ (यु.) १२

सुविशाल-भुजमृणालं मृदुपाणि-पयोजयामलं विमलम् ।
तव देवि ! तुष्टमनसः शिरसि निविष्टं न न वहेम ॥ १३

नवहेम-विनिर्मितविविधविभूषण-विलसद्वाहाऽनन्यसमा ।
समवृत्तस्फारतारहाराञ्चितपीनपयोधरकुम्भयमा ॥ १४

यमिनां शशिवदन शुक्तिजदशना
निभसुम (शुकनिभ?) नासा ततलाभा(भाला)।

भालङ्कृत कज्जल-कुन्तलहस्ता
पातु कलश्रुतिसुविशाला ॥ १५

तरुणयति कविकुलानां कलङ्कविकलं कलाकलानन्दम् ।
यच्चलनभनलिनभक्तिः श्रुतशक्तिं नमत तां कवयः ॥ १६

कवयोवरशंसहंसमारुढा प्रौढप्रासगुणावलिका ।
बलिकाममधुव्रतचम्पककलि-
कारुचिवञ्चितगृहमणिकलिका ॥ १७

कलिकामदुघाऽस्तु सारश्रुतपयसां दाने विजितत्रिदशमणी ।
मणिमण्डित-नूपुरसुरणझणत्कृति
निष्कृतजडसा (ता) वरतरुणी ॥ १८

गिरिजागुरुगिरिगौरशरीरे !
सितिरुचिसितरुचिमु (सु) रुचिरचीरे !॥
भजमाना भवतीं भवतीरे देवि ! भवन्ति वराः कविवीरे ॥१९

वीराकृति-निष्कृतिकृति(त) धिक्काराः सारोङ्कारोच्चारपराः ।
परमैन्द्रपदं ते सपदि लभन्ते
ह्रीमति ! ये त्वयि विनयधराः ॥ २०

धरणीधवधीरैः श्रीमति ! वन्द्ये !
वदवद वाग्वादिनि ! वरजाम् ।
मयि तुष्टिं भगवति ! देवी !
सरस्वति ! मायानमनागतगिरिजाम् (!) ॥ २१

गुरुगुम्फित गुणमाले ! बाला (ले) अयिते प्रसादमधिगम्य ।
सुरभितभुवना भोगा भवन्ति कवयः श्रुताभोगाः ॥ २२

भोगायतनं सा लटभश्रीणां सकलकलानां निधिरपरः ।
परमार्थ-परीक्षाबुद्धिकषपट्टः सकलस्तेजोऽवधिरतरः ॥ २३

तरणी श्रुतसिन्धोः शुभफलफलदः कन्दः कविताकल्पतरोः ।
तरसामिह मूलं यशसामादिर्जय जय भारति ! भुवनगुरोः ॥२४

कुसुमामोदा विमो(नो)दप्रमोदमद मेदुराऽदुराशाया ।
दूरं दुरन्तदुरितं देवी दावयतु सा त्वरितम् ॥ २५

त्वरितागति (त?) सङ्गतरङ्ग तरङ्गित हरिणाक्षी ।
महितपदात्तपदारुणदीधिति पवनपथध्वजपुण्यप्रतापा ॥ २६

देवि ! सदा विशदांशुमयि ! त्वं ललितकवित्वं श्रुतममलम् ।
मम देहि तमां हितमार्गमयत्नरत्न-
वधर्नकविरोपितसंस्तवनकुसुमा ॥ (यु.) २७

कमलदलदीर्घनयना श्रुति-दोलालोलकुण्डलकपोला ।
शुक्तिज सङ्कुलचोला शुभा सलोलोक्ति कल्लोला ॥ २८

कल्लोल-विलोलितजलधि कफो-
ज्ज्वलाकीर्तिकलाढ्या श्रुतजननी ।
जननीवन्निरुपधिवत्सल-
पिच्छलचिताकुमतद्विक(र)रजनी ॥ २९

रजनीकर-दिनकररुचिरिव रचितजडिमतमोहरणा ।
हरिणाश्रितचरणा शरणं भव मे
त्वं भयभञ्जनधृतकरुणा विशेषकम् ॥ ३०

करुणामलकोमलमनस्क-निर्मितपरिचरणा ।
चरणाश्रितजनदत्त विविध विद्यासंवरणा ॥ ३१

वरुणायातसमस्तरु(ऋ)द्धिरुल(ऌ)सदुपकरणा ।
करणाङ्कुश कुशलासिविहितदुष्कृतभरहरणा ॥ ३२

तनुसे त्वमद्य सौहार्दवति ! मातरात्तगुणगणमतनु विशेषकम् ।
हरिणाङ्क सुशिरसत्पाद-विशदवचनविजृम्भितममलतनु ! ॥३३

श्री वस्तुपालमन्त्रिकृतम्

## २५. ॥ अष्टोत्तरशत ( १०८ ) नामयुक्त-श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुप्)

धिषणा धीर्मतिर्मेधा वाग् विभवा सरस्वती ।
गीर्वाणी भारती भाषा ब्रह्माणी मागधप्रिया ॥ १

सर्वेश्वरी महागौरी शङ्करी भक्तवत्सला ।
रौद्री चाण्डालिनी चण्डी भैरवी वैष्णवी जया ॥ २

गायत्री च चतुर्बाहुः कौमारी परमेश्वरी ।
देवमाताऽक्षया चैव नित्या त्रिपुरभैरवी ॥ ३

त्रैलोक्यस्वामिनी देवी माङ्का कारुण्यसूत्रिणी ।
शूलिनी पद्मिनी रुद्री लक्ष्मी पङ्कजवासिनी ॥ ४

चामुण्डा खेचरी शान्ता हुङ्कारा चन्द्रशेखरी ।
वाराही विजयाऽन्तर्धा कर्त्री हर्त्री सुरेश्वरी ॥ ५

चन्द्रानना जगद्धात्री वीणाम्बुजकरद्वया ।
सुभगा सर्वगा स्वाहा जम्भिनी स्तम्भिनी स्वरा ॥ ६

काली कापालिनी कौली विज्ञा रात्री त्रिलोचना ।
पुस्तकव्यग्रहस्ता च योगिन्यमितविक्रमा ॥ ७

सर्वसिद्धिकरी सन्ध्या खड्गिनी कामरूपिणी ।
सर्वसत्त्वहिता प्रज्ञा शिवा शुक्ला मनोरमा ॥ ८

माङ्गल्यरुचिराकारा धन्या काननवासिनी ।
अज्ञाननाशिनी जैनी अज्ञाननिशिभास्करी ॥ ९

अज्ञानजनमाता त्व-मज्ञानोदधिशोषिणी ।
ज्ञानदा नर्मदा गङ्गा सीता वागीश्वरी धृतिः ॥ १०

ऐँकारा मस्तका प्रीतिः ह्रीँकारवदनाहुतिः ।
क्लीँङ्कारहृदयाशक्ति-रष्टबीजानिराकृति ॥ ११

निरामया जगत्संस्था निष्प्रपञ्चा चलाऽचला ।
निरुत्पन्ना समुत्पन्ना अनन्ता गगनोपमा ॥ १२

पठत्यमूनि नामानि अष्टोत्तरशतानि यः ।
वत्सं धेनुरिवायाति तस्मिन् देवी सरस्वती ॥ १३

त्रिकालं च शुचिर्भूत्वा अष्टमासान् निरन्तरम् ।
पृथिव्यां तस्य बम्भ्रम्य तन्वन्ति कवयो यशः ॥ १४

द्रुहिणवदनपद्मे राजहंसीव शुभ्रा,
सकलकलुषवल्ली कन्दकुद्दालकल्पा ।
अमरशतनताऽङ्घ्रि कामधेनुः कवीनां,
दहतु कमलहस्ता भारती कल्मषं नः ॥ (मालिनी) १५

श्री वस्तुपालविरचितम्

## २६. ॥ श्रीभारतीस्तवाष्टकम् ॥

(शार्दूलविक्रीडितम्)

व्योमव्याप्तमिवैन्दवेन महसा दूरं दिशश्चन्दन-
स्यन्देन स्नपिता इव स्मितसिताम्भोजैर्भृतेव क्षितिः ।
ध्यायन्तीति बुधाः सुधारसनिधौ यत्तत्त्वचिन्ताविधौ
तज्ज्योतिर्जगतोऽस्तु निस्तुषपदाऽऽलोकाय सारस्वतम् ॥ १

यः कण्ठद्वयसे प्रविश्य पयसि स्वर्गापगायाश्चिरं
तत्ते चिन्तयति प्रबाधितमहामोहप्ररोहं महः ।
मात ! नूतनवाच्यवाचकरसाऽन्युस्यूतसूक्तक्रमः
शब्दब्रह्मणि वाणि ! पाणिनिरिव प्रागल्भ्यमभ्येति सः ॥ २

अम्ब ! त्र्यम्बकमौलिलालितधुनीधौतेन्दुधामोज्ज्वलं
तेजस्ते परिशीलयन्ति शुचयः शैलाग्रशृङ्गेषु ये ।
तेषां निस्तु[ष]नव्यकाव्यकलया लोकः खलोऽपि स्तव-
प्रह्वश्च प्रमदप्रदर्शितशिरःकम्पश्च सम्पद्यते ॥ ३

नम्राऽनैकसुरासुरेश्वरशिरःकोटीरकोटीप्रभा-
सम्भिन्नं तव सर्वदा पदयुगं धातुःसुते ! यः स्तुते ।
वर्षाऽऽहर्षितषण्मुखाशनशिखिव्याहारसारैर्गिरा-
मुद्गारैः कदयन्नयं जनयति प्रीतिं पशूनामपि ॥ ४

देवि ! ब्रह्मसमुद्भवे ! भवति ! यस्त्वन्नामसङ्कीर्त्तन-
क्रीतस्फीतकवित्वकीर्त्तिलतिकाव्युत्पन्नविद्याफलः ।

श्रीभोगानुपभु [ज्य] भूमिवलये भूपालदत्तैर्धनैः
सार्द्धं दिव्यकवीश्वरैः स रमते सारस्वते सद्मनि ॥ ५

शश्वद् विश्वसवित्रि ! पुत्र इव यस्त्वामत्र शुश्रूषते
निःशेषं स नरः करामलकवत् त्रैलोक्यमालोकते ।
किञ्चैतस्य गृहाङ्गणे गुणवता सूक्तेन सम्पादिता
सम्पत्तिः स्वयमेति याति सहसा कीर्तिश्च दिग्मण्डले ॥ ६

आकारोऽस्तु यथा-तथा भवतु वा लक्ष्मीर्गृहे माऽथवा
श्रीमद्भिः पुरुषैः समं परिचयः सम्पद्यतां वा न वा ।
पुंसां हंसविमानवासिनि ! यदि त्वं सुप्रसन्नाऽसि तत्-
ते रम्याऽऽकृतयः प्रभूतविभवास्ते पूजनीयाश्च ते ॥ ७

जन्तुः कोऽपि स नास्ति चेतनतया यस्याऽसि नाऽन्तर्गता
शास्त्रं तच्च न किञ्चिदस्ति भुवने यद्देवि ! न त्वन्मयम् ।
सा काचित् क्वचनापि नास्ति च कला या सिद्ध्यति त्वां विना
मिष्टं वस्तु तदस्ति न, स्तुतिकृतां तुष्टा न दत्से न यत् ॥ ८

स्तोत्रं श्रोत्ररसायनं सुमनसां वाग्देवता दैवतं
चक्रे गूर्जरचक्रवर्त्तिसचिवः श्रीवस्तुपालः कविः ॥
प्रातर्प्रातरधीयमानमघां यच्चित्तवृत्तिं सता-
माधत्ते विभुतां च ताण्डवयति श्रेयः श्रियं पुष्यति ॥ ९

# २७. ॥ श्रीसरस्वतीस्तुतिः ॥

(अनुष्टुप्)

ॐ ह्रीं अर्हँ मुखाम्भोज-वासिनीं पापनाशिनीम् ।
सरस्वतीमहं स्तौमि श्रुतसागर-पारदाम् ॥ १

लक्ष्मी-बीजाक्षरमयीं मायाबीज-समन्विताम् ।
त्वां नमामि जगन्मात-स्त्रैलोक्यैश्वर्यदायिनीम् ॥ २

सरस्वति वद वद वाग्वादिनि मिताक्षरैः ।
येनाहं वाङ्मयं सर्वं जानामि निजनामवत् ॥ ३

भगवति सरस्वति, ह्रीं नमोंऽह्रि-द्वयप्रगे ।
ये कुर्वन्ति न ते हि स्युर्जाड्यान्ध-विधुराशयः ॥ ४

त्वत्पादसेवी हंसोऽपि विवेकीति जनश्रुतिः ।
ब्रवीमि किं पुनस्तेषां येषां त्वच्चरणौ हृदि ॥ ५

तावकीना गुणा मातः सरस्वति । वदामि किम् ।
यैः स्मृतैरपि जीवानां स्युः सौख्यानि पदे पदे ॥ ६

त्वदीय-चरणाम्भोजे मच्चित्तं राजहंसवत् ।
भविष्यति कदा मातः सरस्वति वद स्फुटम् ॥ ७

श्वेताब्ज-मध्यचन्द्राश्म-प्रासादस्थां चतुर्भुजाम् ।
हंसस्कन्ध-स्थितां चन्द्रमूर्त्युज्ज्वल-तनुप्रभाम् ॥ ८

वामदक्षिण-हस्ताभ्यां बिभ्रतीं पद्मपुस्तिकाम् ।
तथेतराभ्यां वीणाक्षमालिकां श्वेत-वाससाम् ॥ ९

उद्गिरन्तीं मुखाम्भोजादेनामक्षर-मालिकाम् ।
ध्यायेद् योगस्थितां देवीं स जडोऽपि कविर्भवेत् ॥ १०

यथेच्छया सुरसन्दोहसंस्तुता मयका स्तुता ।
तत्तां पूरयितुं देवि प्रसीद परमेश्वरि ॥ ११

इति शारदास्तुतिमिमां हृदये निधाय,
ये सुप्रभातसमये मनुजाः स्मरन्ति ।
तेषां परिस्फुरति विश्वविकासहेतुः,
सज्ज्ञान-केवलमहो महिमानिधानम् ॥ (वसन्ततिलका) १२

## २८. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(द्रुतविलम्बित)

सकल-मङ्गल-वृद्धिविधायिनी,
सकल-सद्गुण-सन्ततिदायिनी ।
सकल-मञ्जुल-सौख्यविकाशिनी,
हरतु मे दुरितानि सरस्वती ॥ १

अमर-दानव-मानवसेविता, जगति जाड्यहरा श्रुतदेवता ।
विशद-पक्ष-विहङ्गविहारिणी, हरतु मे दुरितानि सरस्वती ॥२

प्रवर-पण्डितपुरुषपूजिता, प्रवरकान्तिविभूषणराजिता ।
प्रवर-देहविभाभर-मण्डिता, हरतु मे दुरितानि सरस्वती ॥३

सकल-शीत-मरीचिसमानना,
विहित-सेवक-बुद्धिविकाशना ।
धृत-कमण्डलु-पुस्तकमालिका,
हरतु मे दुरितानि सरस्वती ॥ ४

सकल-मानस-संशयहारिणी,
भवभवोर्जित-पापनिवारिणी ।
सकल-सद्‌गुण-सन्ततिधारिणी,
हरतु मे दुरितानि सरस्वती ॥ ५

प्रबल-वैरि-समूहविमर्दिनी, नृपसभादिषु-मानविवर्धिनी ।
नतजनोदत-सङ्कटभेदिनी, हरतु मे दुरितानि सरस्वती ॥ ६

सकल-सद्‌गुण-भूषितविग्रहा, निजतनु-द्युतितर्जितविग्रहा ।
विशद-वस्त्रधरा-विशदद्युति, हरतु मे दुरितानि सरस्वती ॥७

भवदवानल-शान्ति-तनूनपा-,
द्भितकरैङ्कृतिमन्त्रकृतकृपा ।
भविक-चित्त-विशुद्धविधायिनी,
हरतु मे दुरितानि सरस्वती ॥ ८

तनुभृतां जडतामपहृत्य या, विबुधतां ददते मुदिताऽर्चया ।
मतिमतां जननीति मताऽत्रसा, हरतु मे दुरितानि सरस्वती ॥९

सकल-शास्त्र-पयोनिधि-नौःपरा,
विशद-कीर्त्तिधराऽङ्गितमोहरा ।
जिन-वरानन-पद्मनिवासिनी,
हरतु मे दुरितानि सरस्वती ॥ १०

इत्थं श्रीश्रुतदेवता-भगवती विद्वद्-जनानां प्रसूः,
सम्यग्ज्ञान-वरप्रदा घनतमो-निर्नाशिनी देहिनाम् ।
श्रेयः-श्रीवरदायिनी सुविधिना सम्पूजिता संस्तुता,
दुष्कर्माण्यपहृत्य मे विदधतां सम्यक्श्रुतं सर्वदा ॥ ११

(शा.वि.)

## २९. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(उपजातिः)

त्वं शारदादेवि ! समस्तशारदा, विचित्ररूपा बहुवर्णसंयुता ।
स्फुरन्ति लोकेषु तवैव सूक्तयः,
सुधास्वरूपा वचसां महोर्मयः ॥ १

भवद्विलोलाम्बक-दर्शनादहो, मन्दोऽपि शीघ्रं कविरेव जायते ।
तवैव माहात्म्यमखण्डमीक्ष्यते, तवार्थवादः पुनरेव गीयते ॥२

कर्पूरनीहार-करोज्ज्वला तनु-, र्विभाति ते भारति शुक्ल-नीरजे ।
कराग्रभागे धृतचारु-पुस्तका,
डिण्डीर-हीरामल-शुभ्रचीवरा ॥ ३

मरालबालामलवामवाहना, स्वहस्तविन्यस्त-विशाल-कच्छपी।
ललाटपट्टे कृतहेमशेखरा, सन्ना प्रसन्ना भवतात्सरस्वती ॥ ४

सद्विद्याजलराशि-तारणतरी सद्रूपविद्याधरी,
जाड्यध्वान्तहरी सुधाब्धिलहरी श्रेयस्करी सुन्दरी ।
सत्या त्वं भुवनेश्वरी शिवपुरी सूर्यप्रभा-जित्वरी,
स्वेच्छादानवितान-निर्झरगवी सन्तापतां छित्वरी ॥(शा.वि.)५

सुरनर-सुसेव्या सेवकेनाऽपि सेव्या,
भवति यदि भवत्या किं कृपा कामगव्या ।
जगति सकलसूर्यास्तवत्समाना न भव्या,
रुचिर-सकलविद्या दायिका त्वं तु नव्या, ॥ (मालिनी) ६

यो भक्त्या सुरितो नवीति सततं स्फूर्जन्ति मौठ्यम्महः,
त्वत्सेवां च चरीकरीति तरसा बोभोति शं श्रेयसाम् ।

त्वां मातर्दरिधर्ति चेतसि निजे दर्दष्टि रोचिर्म्मयं,
तस्याग्रे नरिनर्ति याजितकरो भूपो नटीवत् स्वयम् ॥ ७

(शा.वि.)

आख्यातुं तव देवि ! कोऽपि न विभुर्माहात्म्यमामूलतो,
नो ब्रह्मा न च शङ्करो न हि हरिर्नो वाक्पतिः स्वर्पतिः ।
स्वच्छक्ति-वीरवर्ति-विश्वजननी लोकत्रय-व्यापिनी,
सा त्वं काचिदगम्यरम्य-हृदया-वाग्वादिनि ! पाहि माम् ॥८

(शा.वि.)

स्तोत्रं पठेद् यः श्रुतदेवतायाः,
भक्त्या युतः शुद्धमनाः प्रभाते ।
विद्याविलासं विपुलं प्रकाशं,
प्राप्नोति पूर्णकमलानिवासम् ॥ (इन्द्रवज्रा) ९

साध्वीशिवार्याविरचितपठित-

## ३०. ॥ सिद्धसारस्वतस्तवः ॥

(शार्दुलविक्रीडितम्)

व्याप्ताऽनन्त-समस्तलोकनिकरैङ्कारा समस्ता स्थिरा,
याऽऽराध्या गुरुभिर्गुरोरपि गुरुदेवैस्तु या वन्द्यते ।
देवानामपि देवता वितरतां वाग्देवता देवता,
स्वाहान्तः क्षिप ॐ यतः स्तवमुखं यस्याः स मन्त्रोवरः ॥१

ॐ ह्रीँ श्रीँ प्रथमा प्रसिद्धमहिमा सन्तप्तचित्ते हिमा,
स्तौँ ऐँ मध्यहिता जगत्त्रयहिता सर्वज्ञनाथा हिता ।

ह्रीँ क्लीँ ब्लीँ चरमा गुणानुपरमा जायेत यस्या रमा,
विद्यैषा वषडिन्द्रगीष्पतिकरी वार्णीं स्तुवे तामहम् ॥ २

ॐ कर्णे ! वरकर्णभूषिततनुः कर्णेऽथ कर्णेश्वरी,
ह्रीँ स्वाहान्तपदां समस्तविपदां छेत्री पदं सम्पदाम् ।
संसारार्णवतारिणी विजयतां विद्याभिधाने शुभे,
यस्याः सा पदवी सदा शिवपुरे देवी वतंसीकृता ॥ ३

सर्वाचारविचारिणी प्रतरिणी नौर्वाग् भवाब्धौ नृणां,
वीणा–वेणुवरक्वणातिसुभगा दुःखाद्रिविद्राविणी ।
सा वाणी प्रवणा महागुणगणा न्यायप्रवीणाऽमलं,
शेते यस्तरणी रणीषु निपुषा जैनी पुनातु ध्रुवम् ॥ ४

ॐ ह्रीँ बीजमुखा विधूतविमुखा संसेविता सन्मुखा,
ऐँ क्लीँ ह्रीँ सहिता सुरेन्द्रमहिता विद्वद्जनेभ्यो हिता ।
विद्या विस्फुरति स्फुटं हितरतिर्यस्या विशुद्धा मतिः,
सा ब्राह्मी जिनवक्त्रवज्रललने लीना तु लीनातु माम् ॥ ५

ॐ अर्हन्मुखपद्मवासिनि शुभे ज्वालासहस्रांशुभे,
पापप्रक्षयकारिणी श्रुतधरे पापं दहत्याशु मे ।
क्षां क्षीं क्षूं वरबीजदुग्धधवले वं वं व हं सम्भवे,
श्री वाग्देव्यमृतोद्भवे यदि भवे मन्मानसे सम्भवे ॥ ६

हस्ते शर्मद– पुस्तकं विदधती शतपत्रकं चापरं,
लोकानां सुखदं प्रभूतवरदं सज्ज्ञानमुद्रं परम् ।
तुभ्यं बालमृणाल–कन्दललसल्लीलाविलोलं करं,
प्रख्याता श्रुतदेवता विदधतां सौख्यं नृणां सूनृतम् ॥ ७

हंसोऽहं सोऽतिगर्वं वहति हि विधृता यन्मयैषा मयैषा,
यन्त्रं यन्त्रं यदेतत् स्फुटति सिततरं सैव यक्षावयक्षा ।
साध्वी साध्वी शिवार्या प्रविधृतभुवना दुर्धरा या धराया,
देवी देवीजनार्घ्या रमतु मम सदा मानसे मानसे सा ॥ (स्रग्धरा) ८

स्पष्टपाठं पठत्येतद् ध्यानेन पटुनाऽष्टकम् ।
अजस्रं यो जनस्तस्य भवन्त्युत्तमसम्पदः ॥ ९

## ३१. ॥ श्रीभारतीस्तवनम् ॥

(स्रग्विणी)

राजते श्रीमती भारती देवता,
शारदेन्दुप्रभाविभ्रमं बिभ्रती ।
मञ्जुमञ्जीरझङ्कारसञ्चारिणी,
तारमुक्तालताहारशृङ्गारिणी ॥ १

चारुचूडं दुकूलं दधाना घनं,
केतकीगन्धसन्दर्भितं चन्दनम् ।
मालतीपुष्पमालालसत्कन्धरा,
कुन्द–मन्दार–बन्धूकगन्धोद्धुरा ॥ २

स्फारशृङ्गारविस्तारसञ्चारिणी,
रौद्रदौर्भाग्यदारिद्र्यनिर्नाशिनी ।
शोभनालोकना लोचनानन्दिनी,
कोमलालापपीयूषनिस्यन्दिनी ॥ ३

सारकर्पूरकस्तूरिकामण्डिता,
सर्वविज्ञानविद्याधरी पण्डिता ।

हस्तविन्यस्तदामाक्षमालाम्बुजा,
कङ्कणश्रेणिविभ्राजितश्रीभुजा ॥ ४

राजहंसाङ्गलीलाविमानस्थिता,
वीणया लालिता पुस्तकालङ्कृता ।
भास्वरा सुस्वरा पक्वबिम्बाधरा,
रूपरेखाधरा दिव्ययोगीश्वरा ॥ ५

सर्वकामप्रदा सर्वगा सर्वदा,
कल्पवृक्षस्य लक्ष्मीं हसन्ती सदा ।
त्वत्प्रसादं विना देहिनां का गतिः,
का मतिः का रतिः का धृतिः का स्थितिः ? ॥ (पं. कु) ६

लाटकर्णाटकाश्मीरसम्भाविनी,
श्रीसमुल्लाससौभाग्यसञ्जीवनी ।
मेखलासिञ्जितैरुद्गिरन्ती प्रियं,
सेवकानामिवाहं ददामि श्रियम् ॥ ७

कस्य किं दीयते कस्य किं क्षीयते,
कस्य किं वल्लभं कस्य किं दुर्लभम् ? ।
केन कः बाध्यते केन को साध्यते,
केन को जीयते को वरो दीयते ? ॥ (युग्मम्) ८

भारति ! यस्तव पुरतः, स्तोत्रमिदं पठति शुद्धभावेन ।
स भवति सुरगुरुतुल्यो, मेधामावहति सततमिह ॥ (आर्या)९

मन्त्र : ॐ ह्रीँ हंस प्रत्यङ्गिरे हस्फ्लौँ महाविद्ये ।
सर्वशङ्करी मम शान्तिं कुरु कुरु ऐँ ह्रीँ स्वाहा ॥

## ३२. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(शार्दुलाविक्रीडितम्)

ज्ञानानन्दकरी सदा सुखकरी विश्वेश्वरी श्रीधरी,
साक्षात् मोक्षकरी ह्यघाक्षयकरी प्रत्यक्षमाहेश्वरी ।
कौमारी कलुषो(षौ)घपावनकरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ १

साक्षाद्वृद्धिकरी तपःफलकरी विज्ञानदीपङ्करी,
काश्मीरी त्रिपुरेश्वरी हितकरी ब्रह्माण्डभण्डोदरी ।
स्वर्ग-द्वार-कपाट-पाटनकरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ २

योगानन्दकरी रिपुक्षयकरी सौन्दर्यरत्नोत्करी,
नानारत्नविचित्रभूषणधरी सद्ज्ञान-विद्येश्वरी ।
ब्रह्माणी खगवाहिनी भगवती काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ ३

वीणा पुस्तकपाशकाङ्कुशधरी जाड्यान्धकारोद्धरी,
वाराही तु सरारिनाशनकरी ॐकाररूपाक्षरी ।
सर्वानन्दकरी परा भयहरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ ४

पूर्णेन्दुद्युतिशालिनी जयकरी (ह्रीं) ह्रौँकारमन्त्राक्षरी,
मातङ्गी विजया जया भगवती देवी शिवा शङ्करी ।
सम्यग्ज्ञानकरी ध्रुवं शिवकरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ ५

सर्वारम्भकरी गदक्षयकरी सद्धर्म-मार्गेश्वरी,
रूपारूपप्रकाशिनी विजयिनी लक्ष्मीकरी धीःकरी ।
धर्मोद्योतकरी सुधारसभरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ ६

नानालोक-विचित्रभासनकरी ऐँकार बीजाक्षरी,
चन्द्रार्कद्युतिकर्णकुण्डलधरी श्रींकारवागीश्वरी ।
ब्रह्मज्ञानकरीयशःशुभकरी काशीपुराधीश्वरी,
विद्यां देहि कृपाऽविलम्बनकरी माता च हंसेश्वरी ॥ ७

ज्ञानपूर्णे दयापूर्णे सततं जगदम्बिके ! ।
ज्ञानप्रतापसिद्ध्यर्थं विद्यां देहि महेश्वरी ॥ (अनुष्टुप्) ८

## ३३. ॥ श्रीसरस्वतीस्तवः ॥

(स्रग्धरा)

ऐँ ह्रीँ श्रीँ मन्त्ररुपे विबुधजननुते देवदेवेन्द्रवन्द्ये,
चञ्चच्चन्द्रावदाते क्षिपितकलिमले हारनीहारगौरे ।
भीमे भीमाट्टहास्ये भवभयहरणे भैरवे भीमवीरे,
ह्राँ ह्रीँ हूँकारनादे मम मनसि सदा शारदे देवि तिष्ठ ॥ १

हा पक्षे बीजगर्भे सुरवररमणी-चर्चितानेकरूपे,
कोपं वं झं विधेयं धरित धरिवरे योगनियोगमार्गे ।
हं सं सः स्वर्गराजप्रतिदिननमिते प्रस्तुतालापपाठे,
दैत्येन्द्रैर्ध्यायमाने मम मनसि सदा शारदे देवि तिष्ठ ॥ २

दैत्यैर्दैत्यारिनाथैर्नमितपदयुगे भक्तिपूर्वं त्रिसन्ध्यम्,
यक्षैर्सिद्धैश्च नम्रैरहमहमिकया देहकान्त्याऽतिकान्तैः ।
आँ इँ ॐ विस्फुटाभाक्षरवरमृदुना सुस्वरेणासुरेणा-
त्यन्तं प्रोद्गीयमाने मम मनसि सदा शारदे देवि ! तिष्ठ ॥ ३

क्षाँ क्षीँ क्षूँ क्षः स्वरूपे हन विषमविषं स्थावरं जङ्गमं वा,
संसारे संसृतानां तव चरणयुगे सर्वकालं नराणाम् ।
अव्यक्ते व्यक्तरूपे प्रणतनरवरे ब्रह्मरूपे स्वरूपे,
ऐँ ऐँ ब्लूँ योगिगम्ये मम मनसि सदा शारदे देवि तिष्ठ ॥ ४

सम्पूर्णाऽत्यन्तशोभैः शशधरधवलै रासलावण्यभूतैः,
रम्यैः स्वच्छैश्च कान्तैः निजकरनिकरैश्चन्द्रिकाकारभासैः ।
अस्माकीनं भवाब्जं दिनमनुसततं कल्मषं क्षालयन्ती,
श्राँ श्रीँ श्रूँ मन्त्ररूपे मम मनसि सदा शारदे देवि तिष्ठ ॥ ५

भाषे पद्मासनस्थे जिनमुखनिरते पद्महस्ते प्रशस्ते,
प्राँ प्रीँ प्रूँ प्रः पवित्रे हर हर दुरितं दुष्टजं दुष्टचेष्टम् ।
वाचां लाभाय भक्त्या त्रिदिवयुवतिभिः प्रत्यहं पूज्यपादे,
चण्डे चण्डीकराले मम मनसि सदा शारदे देवि तिष्ठ ॥ ६

नम्रीभूतक्षितीश-प्रवरमणिमुकुटोद्घृष्टपादारविन्दे,
पद्मास्ये पद्मनेत्रे गजगतिगमने हंसयाने विमाने ।
कीर्तिश्रीबुद्धि -चक्रे जयविजयजये गौरीगं धारीयुक्ते,
ध्येयाध्येयस्वरूपे मम मनसि सदा शारदे देवि तिष्ठ ॥ ७

विद्युज्ज्वालाप्रदीप्तां प्रवरमणिमयीमक्षमालं सुरूपां,
रम्यावृत्तिर्धरित्री दिनमनुसततं मन्त्रकं शारदं च ।

नागेन्द्रैरिन्द्रचन्द्रैर्मनुजमुनिजनैः संस्तुता या च देवी,
कल्याणं सा च दिव्यं दिशतु मम सदा निर्मलं ज्ञानरत्नम् ॥८

करबदरसदृशमखिलभुवतलं यत् प्रसादतः कवयः ।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी ॥ ९

## ३४. ॥ श्रीशारदाष्टकम् ॥

प्राग् वाग्देवी जगज्जनोपकृतये वर्णान् द्विपञ्चाशतं,
यावाप्सीन्निजभक्तदारकमुखे केदारके बीजवत् ।
तेभ्यो ग्रन्थगुलुञ्छुकाः शुभफला भूताः प्रभूतास्तकान्,
सैवाद्यापि परः शतान् गणयसे स्नक् स्फोटणच्छद्मतः ॥ १
(शा.वि.)

यैर्ध्यातेति प्रातः प्रातर्मा तुर्मात र्वाग् मात-
र्विद्याव्रातः स श्रीसातस्तेषां जातः प्रख्यातः ।
ऐतां भ्रातर्भक्त्या घ्रातः स्नेहस्नातः, स्वाख्यातः,
सेवस्वातश्चित्तृष्णातः शास्त्रेषु स्तान्निष्णातः ॥ (कामक्रीडा) २

शिक्षाच्छन्दश्च कल्पः सुकलितगणितं शब्दशास्त्रनिरुक्ति-
र्वेदाश्चत्वार इष्टा भुवि विततमते धर्मशास्त्रं पुराणम् ।
मीमांसान्वीक्षिकीति त्वयि निचितिभृतास्ताः षडष्टापि विद्या-
स्तत्त्वं विद्या निषद्या किमु किमसि
धियां सत्रशाला विशाला ॥ (स्रग्धरा) ३

सुवृत्तरूपसकलः सुवर्णः प्रीणन् समाशा अमृतप्रसूगीः ।
तमःप्रहर्ता शुभेषु तारके हस्ते विधुः
किं किमु पुस्तकस्ते ॥ (उपजाति) ४

पदार्थसार्थ-दुर्घटार्थ-चित्समर्थनक्षमा,
सुयुक्तिमौक्तिकैकशुक्तिरत्र मूर्तिमत्प्रमा ।
प्रशस्तहस्तपुस्तका समस्तशास्त्रपारदा,
सतां सका कलिन्दिका सदा ददातु शारदा ॥ (पञ्चचामर) ५

मन्दैर्मध्यैश्च तारैः क्रमततिभिरुहः कण्ठमूर्ध्वप्रवाहैः,
सप्त-स्वर्याप्रयुक्तैः सरगमपधनेत्याख्ययान्योन्यमुक्तैः ।
स्कन्धे न्यस्य प्रबालं कलललितकलं कच्छपीं वादयन्ती,
रम्यास्या सुप्रसन्ना वितरतु वितते भारति ! भारतीं मे ॥ ६
(शा.वि.)

भातो भातः श्रवणयुगले कुण्डले मण्डले वै,
चान्द्राकीये स्वत उत ततो निःसृतौ पुष्पदन्तौ ।
श्रावं श्रावं वचनरचनां मेदुरीभूय चास्याः,
संसेवे ते चरणकमलं राजहंसाभिधानः ॥ (मन्दाक्रान्ता) ७

अमित-नमितकृष्टे तद्धियां सन्निकृष्टे,
श्रुतसूरि-शुभदृष्टे सदृशानां सुवृष्टे ।
जगदुपकृतिसृष्टे सज्जनानामभीष्टे,
तव सकलपरीष्टे को गुणान् वक्तुमीष्टे ॥ (मालिनी) ८

स्तुतेऽल्पमष्टकेन नष्टकष्ट-केन चष्टके,
सतां गुणर्द्धिगर्धनः सदैव धर्मवर्धनः ।
सखे सुबुद्धि-वृद्धि-सिद्धिरीप्स्यते यदासती,
नमस्यता मुखस्य साववश्यमों सरस्वती ॥ (पञ्चचामर) ९

## ३५. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुपम्)

वाग्वादिनी नमस्तुभ्यं वीणापुस्तकधारिणी ।
मह्यं देहि वरं नित्यं हृदयेषु प्रमोदतः ॥ १

काश्मीरमण्डनी देवी हंसस्कन्धसुवाहने ।
ममाऽज्ञानं विनाशाय कवित्वं देहि मे वरम् ॥ २

जयत्वं विजयादेवी कवीनां मोदकारिणी ।
देहि मे ज्ञान-विज्ञानं वाग्वादिनी सरस्वती ॥ ३

ॐ ह्रीँ श्रीभगवती देवी श्रीं देहि वरानने ।
वाञ्छितार्थं प्रदात्री च वद वद वाग्वादिनी नमः ॥ ४

लक्षजापेन मन्त्रोऽयं गणित्वैकादशाचाम्लैः ।
इति स्तुता महादेवी सर्वसिद्धिप्रदायिका ॥ ५

इदं स्तोत्रं पवित्रं च ये पठन्ति नरः सदा ।
तस्य नश्यन्ति मूढत्वं प्राप्नोति मङ्गलावलीम् ॥ ६

सरस्वतीस्तोत्रमिदं पवित्रं गुणैर्गरिष्ठं निजमन्त्रगर्भितम् ।
पठन्ति ये रम्यमहर्निशं जनाः
लभन्ते ते निर्मलबुद्धिमन्दिरम् ॥ (उपेन्द्रवज्रा) ७

# ३६. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(वसन्ततिलका)

चन्द्रार्ककोटिघटितोज्ज्वलदिव्यमूर्ते,
श्रीचन्द्रिका कलितनिर्मलशुभवस्त्रे ।
कामार्थदायिकलहंससमाधिरूढे,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ १

देवासुरेन्द्रनतमौलिमणिप्ररोचिः,
श्रीमञ्जरी निबिडरञ्जितपादयुग्मे ।
नीलालके प्रमदहस्तिसमानरूपे,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ २

केयूरहारमणिकुण्डलमुद्रिकाद्यैः,
सर्वाङ्गभूषणमुनीन्द्रनरेन्द्रवन्द्ये ! ।
नानासुरत्नवरनिर्मलमौलियुक्ते,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ३

कङ्केल्लिपल्लवविनिन्दितपादयुग्मे,
पद्मासने दिवसपद्मसमानवस्त्रे ।
जैनेन्द्रवक्त्रभवदिव्यसमस्तभाषे,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ४

मञ्जीरकोत्कनककेकणकिङ्कणीनां,
काञ्च्याश्च झङ्कृतरवेण विराजमाने ।
सद्धर्मवारिनिधिसन्ततवर्द्धमाने,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ५

अर्धेन्दुमण्डित जटाललितस्वरूपे,
शास्त्रप्रकाशिनि समस्तकलाधिनाथे ! ।
चिन्मुद्रिका-जपसराऽभय-पुस्तकाङ्के,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ६

डिण्डीरपिण्डहिमशङ्खसितांशु हारे,
पूर्णेन्दुबिम्बरुचिशोभित-दिव्यवाचे ।
चाञ्चल्यमानमृगशावललाटनेत्रे,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ७

पूज्ये पवित्रकरणोन्नतकामरूपे,
नित्यं फणीन्द्रगरुडाधिपकिन्नरेन्द्रैः ।
विद्याधरेन्द्रसुरयक्षसमस्तवृन्दैः,
वागीश्वरि ! प्रतिदिनं मम रक्ष देवि ! ॥ ८

## ३७. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुप्)

नमामि भारतीं देवीं चतुर्भुजां महाबलाम् ।
काश्मीरे वसति नित्यं ब्रह्मरूपा सरस्वती ॥ १

बालानां ज्ञानदात्री च दुर्बुद्धिध्वंसकारिणी ।
त्रिनेत्रा पातु मे देवी वीणा-पुस्तकधारिणी ॥ २

श्वेताम्बरा श्वेतवर्णा श्वेतचन्दनचर्चिता ।
हंसस्य वहते नित्यं पद्मासनोपवेशिता ॥ ३

मालिकां दक्षिणे हस्ते वामहस्ते कमण्डलुम् ।
संयुक्तेन्दुं च मुकुटे मुक्ताहारैर्विभूषिता ॥ ४

परिहीतान्यलङ्काराण्येतद् द्युतिप्रकाशिता ।
सौन्दर्येण समायुक्ता सर्वाभरणभूषिता ॥ ५

ॐकारम् आदिमं बीजं मायाबीजं समीरितम् ।
तृतीयं लक्ष्मीबीजं च वाग्वादिनी चतुर्थकम् ॥ ६

ॐ ह्रीँ श्रीँ च क्लीँ मन्त्रं वाग्वादिनी च संयुताम् ।
एकलक्षं जपेत्मन्त्रं स स्याद् वाचस्पतिः समः ॥ ७

इत्यनेन प्रकारेण सरस्वत्या समं जपेत् ।
त्रिसन्ध्यं पठते नित्यं तस्य कण्ठे सरस्वती ॥ ८

ज्ञानार्थी लभते ज्ञानमर्थार्थी लभते धनम् ।
मोक्षार्थी लभते मोक्षं रामार्थी लभते स्त्रियम् ॥ ९

## ३८. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुप्)

नमस्ते शारदादेवी काश्मीरपुरवासिनी ।
त्वामहं प्रार्थये मातर्विद्यादानं प्रदेहि मे ॥ १

सरस्वती मया दृष्टा देवी कमललोचना ।
हंसयान समारूढा वीणापुस्तकधारिणी ॥ २

सरस्वतीप्रसादेन काव्यं कुर्वन्ति मानवाः ।
तस्मान्निश्चलभावेन पूजनीया सरस्वती ॥ ३

प्रथमं भारती नाम द्वितीयं च सरस्वती ।
तृतीयं शारदा देवी चतुर्थं हंसवाहिनी ॥ ४

पञ्चमं विदुषां माता षष्ठं वागीश्वरी तथा ।
कौमारी सप्तमं प्रोक्ता अष्टमं ब्रह्मचारिणी ॥ ५

नवमं त्रिपुरा देवी दशमं ब्रह्मणी तथा ।
एकादशं तु ब्रह्माणी द्वादशं ब्रह्मवादिनी ॥ ६

वाणी त्रयोदशं नाम भाषा चैव चतुर्दशम् ।
पञ्चदशं श्रुतदेवी षोडशं गौरी निगद्यते ॥ ७

एतानि शुद्धनामानि प्रातरुत्थाय यः पठेत् ।
तस्य सन्तुष्यते देवी शारदा वरदायिनी ॥ ८

या देवी श्रूयते नित्यं विबुधैः वेदपारगैः ।
सा मे भवतु जिह्वाग्रे ब्रह्मरूपा सरस्वती ॥ ९

या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना,
या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रावृता ।
या ब्रह्माऽच्युतशङ्करप्रभृतिभिः देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेषजाड्यपहा ॥ (शा.वि.) १०

## ३९. ॥ अष्टोत्तरशतनामशारदादेवीस्तोत्रम् ॥

शारदा विजया नन्दा जया पद्मा शिवा क्षमा ।
दुर्गा गौरी महालक्ष्मी कालिका रोहिणी परा ॥ १

माया कुण्डलिनी मेधा कौमारी भुवनेश्वरी ।
श्यामा चण्डी च कामाक्षा रौद्री देवी कला इडा ॥ २

पिङ्गला सुषुम्णा भाषा ह्रींकारी धिषणाम्बिका ।
ब्रह्माणी कमला सिद्धा उमा पर्णा प्रभा दया ॥ ३

भर्भरी वैष्णवी बाला वश्ये मन्दिरा च भैरवी ।
जालया शाम्भवा यामा सार्वाणि कौशिकी रमा ॥ ४

चक्रेश्वरी महाविद्या मृडानी भगमालिनी ।
विशाली शङ्करी दक्षा कालाग्नी कपिला क्षया ॥ ५

ऐँद्री नारायणी भीमा वरदा शाम्भवी हिमा ।
गान्धर्वी चारणी गार्गी कोटिश्री नन्दिनी सूरा ॥ ६

अमोघा जाङ्गुली स्वाहा गण्डनी च धनार्जनी ।
कबर्यश्च विशालाक्षी सुभगा चकरालिका ॥ ७

वाणी महानिशा हारी वागेश्वरी निरञ्जना ।
वारुणी बदरीवासा श्रद्धा क्षेमङ्करी क्रिया ॥ ८

चतुर्भुजा च द्विर्भुजा शैला केशी महाजया ।
वाराही यादवी षष्ठी प्रज्ञा गी गौं र्महोदरी ॥ ९

वाग्वादिनी क्लीँ कारी ऐँकारी विश्वमोहिनी ।
सर्व-सौख्यप्रदां नित्यं नामोच्चारणमात्रतः ॥ १०

पावनानि प्रसिद्धानि तकार रहिता. [नि च]...।
त्रिसन्ध्यं (यः) पठेद्धीमान् स्यादम्बा तद्वरप्रदा ॥ ११

(अनुष्टुप्)

# ४०. ॥ श्रीसरस्वतीस्तोत्रम् ॥

शब्दात्मिका या त्रिजगद्बिभर्ति,
स्फुरद्विचित्रार्थसुधां स्रवन्ती ।
या बुद्धिरीड्या विदुषां हृदब्जे,
मुखे च सा मे वशमस्तु नित्यम् ॥ (उपजाति) १

(अनुष्टुप्)

जिनराजमुखाम्भोज-राजहंसी सरस्वती ।
कुन्देन्दुविशदा नित्यं मानसे रमतां मम ॥ २

सद्वाग्वृत्तपदन्यास-वर्णालङ्कारधारिणी ।
सन्मार्गाङ्गी सदैवाऽस्तु प्रसन्ना नः सरस्वती ॥ ३

सरस्वत्याः प्रसादेन काव्यं कुर्वन्ति मानवाः ।
तस्मान्निश्चलभावेन पूजनीया सरस्वती ॥ ४

श्रीसर्वज्ञमुखोत्पन्ना भारती बहुभाषिणी ।
अज्ञानतिमिरं हन्ति विद्याबहुविकासिनी ॥ ५

सतीं श्रुतस्कन्धवने विहारिणी-
मनेकशाखागहने सरस्वतीम् ।
गुरुप्रवाहेण जडानुकम्पिना,
स्तुवेऽभिनन्द्ये वनदेवतामिव ॥ (वंशस्थ) ६

मातेव या शास्ति हितानि पुंसो,
रजः क्षिपन्ती दधती सुखानि ।
समस्तशास्त्रार्थविचारदक्षा
सरस्वती सा तनुतां मतिं मे ॥ (उपजाति) ७

वीतरागमुखोद्गीर्णामङ्गपूर्वादि विस्तृताम् ।
आराध्यां मुनिभिर्वन्दे ब्राह्मीं प्रज्ञाप्रसिद्धये ॥ ८

जगदानन्दिनीं ताप-हारिणीं भारतीं सतीम् ।
श्रीमतीं चन्द्ररेखाभां नमामि विबुधप्रियाम् ॥ ९

देवेन्द्रादिसुरैर्नताङ्घ्रिकमला ध्याता मुनीन्द्रैः सदा,
नागेन्द्राम्बरभूमिराजनिवहैः संसेविता सर्वदा ।
हंसस्था सुविशालहस्तकमला विद्वज्जनानां मुदा,
वीणा-पुस्तकशोभिता जनहिता भूयात् सदा शारदा ॥ १०
(शा.वि.)

नमस्ते शारदादेवी काश्मीर प्रतिवासिनी ।
त्वां प्रार्थयाम्यहं मातः विद्यादानं च देहि मे ॥ ११

सरस्वति ! नमस्तुभ्यं वरदे ! कामरूपिणि !।
विद्यारम्भं करिष्यामि, सिद्धिर्भवतु मे सदा ॥ १२

वाणी कर्मकृपाणी द्रोणी संसारजलधिसन्तरणे ।
वेणीजितघनमाला, जिनवदनाम्भोजभासुरा जीयात् ॥ १३

जनयति मुदमन्तर्भव्यपाथोरुहाणां,
हरति तिमिरराशिं या प्रभा भानवीव ।
कृतनिखिलपदार्थद्योतना भारतीद्धा,
वितरतु धुतदोषा सार्हती भारतीं वः ॥ (मालिनी) १४

नमामि भारतीं जैनीं सर्वसन्देहनाशिनीम् ।
भानुभामिव भव्यानां मनःपद्मविकासिनीम् ॥ १५

वाचं वाचंयमीन्द्राणां वक्त्रवारिजवाहनाम् ।
वन्दे नयद्वयायत्त वाच्यसर्वस्वपद्धतिम् ॥ १६

यत् सर्वात्महितं न वर्णसहितं न स्पन्दितोष्ठद्वयं,
नो वाञ्छा कलितं न दोषमलिनं न श्वासरुद्धक्रमम् ।
शान्तामर्षविषैः समं पशुगणैराकर्णितं कर्णिभिः
तन्नः सर्वविदः प्रणष्टविपदः पायादपूर्वं वचः ॥(शा.वि.) १७

गम्भीरं मधुरं मनोहरतरं दोषैरपेतं हितम्,
कण्ठौष्ठादिवचो निमित्तरहितं नो वातरोधोद्गतम् ।
स्पष्टं तत्तदभीष्टवस्तुकथकं निःशेषभाषात्मकम्,
दूरासन्नसभं श्रुतं निरुपमं जैनं वचः पातु नः ॥(शा.वि.) १८

## ४१. ॥ श्रीसरस्वतीस्तवनम् ॥

(द्रुतविलम्बित)

त्रिजगदीश जिनेन्द्रमुखोद्भवा,
त्रिजगति जनजाति हितङ्करा ।
त्रिभुवनेशनुता हि सरस्वती,
चिदुपलब्धिमियं वितनोतु मे ॥ १

अखिलनाकशिवाध्वनिदीपिका,
नवनयेषु विरोधविनाशिनी ।
मुनिमनोऽम्बुजमोहनभानुभा,
चिदुपलब्धिमियं वितनोतु मे ॥ २

यतिजनाचरणादिनिरूपणा,
त्रिदशभेदगता गतदूषणा ।
भवभयातपनाशनचन्द्रिका,
चिदुपलब्धिमियं वितनोतु मे ॥ ३

गुणसमुद्रविशुद्धपरात्मना,
प्रकटनैककथा सुपटीयसी ।
जितसुधानिजभक्तशिवप्रदा,
चिदुपलब्धिमियं वितनोतु मे ॥ ४

विविधदुःखजले भवसागरे,
गदजरादिकमीनसमाकुले ।
असुभृतां किल तारणनौसमा,
चिदुपलब्धिमियं वितनोतु मे ॥ ५

गगनपुद्गलधर्मतदन्यकैः
सह सदा सगुणांश्चिदनेहसः ।
कलयतीह नरो यदनुग्रहात्,
चिदुपलब्धिमियं वितनोतु मे ॥ ६

गुरुरयं हितवाक्ययमिदं गुरोः,
शुभमिदं जगतामथवा शुभम् ।
यतिजनो हि यतोऽत्र विलोकते
चिदुपलब्धिमियं वितनोतु मे ॥ ७

त्यजति दुर्मतिमेव शुभे मतिं प्रतिदिनं कुरुते च गुणे रतिम् ।
जडनरोऽपि ययार्पितधीधन-
श्चिदुपलब्धिमियं वितनोतु मे ॥ ८

खलु नरस्य मनो रमणीजने न रमते रमते परमात्मनि ।
यदनुभक्ति परस्य वरस्य वै,
चिदुपलब्धिमियं वितनोतु मे ॥ ९

विविधकाव्यकृते मतिसम्भवो,
भवति चापि तदर्थविचारणे ।
यदनुभक्तिभरान्वितमानवे,
चिदुपलब्धिमियं वितनोतु मे ॥ १०

योऽहर्निशं पठति मानसमुक्तभारः
स्यादेव तस्य भवनीरसमुद्रपारः ।
युङ्क्ते जिनेन्द्रवचसां हृदये य हारः
श्री ज्ञानभूषणमुनिः स्तवनं चकार ॥ (वसन्ततिलका) ११

## ४२. ॥ श्रीभारतीस्तवः ॥

(शार्दूलविक्रीडित)

ये त्वाम्पाण्डुर पुण्डरीक पटल स्पष्टाभिरामप्रभाम्
सिञ्चन्ती-ममृतद्रवैरिव शिरो ध्यायन्ति मूर्ध्नि स्थिताम् ।
अस्रान्तं विकटस्फुटाक्षर पदान्निर्याति वक्रोदरात्
तेषां भारती भारती सुरसुरिल्कल्लोललोलोर्मिभिः ॥ १

क्षुभ्यत्क्षीर समुद्र निर्गत महाशेषाहि लोलत्फणा-
पत्रोन्निद्रशतारविन्द कुहरे चन्द्र स्फुरत्कर्णिके ।
देवि ! त्वां च निजं च पश्यति वपु र्यः कान्ति भिन्नान्तरम्
ब्राह्मी ! ब्रह्मवदस्य याति च वचः प्रागल्भ्य दुग्धां निधेः ॥२

नाभी पाण्डुर पुण्डरीक कुहरात् हृत्पुण्डरीके गलत्-
पीयूषद्रव वर्षिणीं प्रविशतीं त्वां मातृकामालिनीम् ।
दृष्ट्वा भारति ! भारती प्रभवति प्रायेण पुंसो यथा
या निग्रन्थशतान्यपि ग्रथयति ग्रन्थायुतानां नरः ॥ ३

त्वां मुक्तामय सर्वभूषणगणां शुक्लाम्बराडम्बराम्
गौरीं गौरि ! सुधातरङ्गधवलामालोक्य हृत्पङ्कजे ।
वीणापुस्तकमौक्तिकाक्षवलयश्वेताब्जलस्यत्करां
न स्यात्कः स्फुटवृत्तचक्ररचनाचातुर्यचिन्तामणिः ॥ ४

ये सिन्दुर परागपुञ्ज विहितां तत्तेजसा द्यामिवा
नुर्वीञ्चापि विलीनयावक रस प्रस्तार मालामिव ।
पश्यन्ति क्षणमप्यनन्य-मनसस्तेषामनङ्गज्वर
क्लान्तास्तत्रकुरङ्गदारकदृशो वश्याभवन्ति ध्रुवम् ॥ ५

प्राचीन हस्त लिखित रखलिताक्षर श्री
सारस्वतं सरस सारस गर्भ कुक्षिम् ।
श्री कृष्णदेव विदुषा ननु साधु भव्या-
नन्दात्ग्रहात्पठत शोधितमत्र सभ्याः ॥ (वसन्ततिलका) ६

## ४३. ॥ श्रीसरस्वतीस्तवः ॥

सौन्दर्योदारकौन्दद्युतिधरवपुषं कौण्डलश्रीसनाथा-
मंहस्सन्दोहमोहाऽवतमसतरणिं हस्तविन्यस्तमुद्राम् ।
त्रैलोक्यानेककामप्रवितरणमरुद्वीरुधामैन्द्रचाप-
व्यापिभ्रूपल्लवांताममतिरपि नमस्कृत्य देवीं स्तवीमि ॥ १
(स्रग्धरा)

(शार्दूलविक्रीडित)

आकाशाश्रितकौमुदीपतिकलालङ्कारमौलिं नम-
स्यामो नम्रनरामरासुरगणां त्वन्मन्त्रबद्धां श्रियम् ।

मन्दारस्फुटसिन्धुवारकुसुमश्रेणीनतंसेव या
कं नो ध्यायकमुत्तरोत्तररमाधीशं विधत्तेतराम् ॥ २

भक्ताभीप्सितदानशौंडचरण-द्वन्द्वारविन्दे ! वद
त्वं वृन्दारकवन्दितेन्दुवदने ! वाग्वादिनि ! श्रीमति !
को न क्रौंचरिपोरुपैति तुलनां लब्धप्रसादोदयः
त्वत्तः कोविदवृन्दवासवमहानीकाधिपत्यं भजन् ॥ ३

देवि ! त्वामनुपास्य शस्यकविताकूपारपारायन-
प्रोत्तालस्य नरस्य कस्यचिदपि स्वर्भूर्भुवो व्यापिनि ! ।
देवानां प्रिय एष एव मुदिते कस्को मनीषावरः
कुर्यान्नो सहसोमिति प्रतिदिनं स्वाहानुगेश स्तुते ! ॥ ४

नम्रब्रह्महरामुपास्य भवतीमर्हन्ति मन्दा न किं-
विद्वत्पर्षदमुत्तमां भगवति ! स्पष्टोक्तिमोदावहाः ।
मातङ्गव्यतिसङ्गिताः पुर पथाः सम्प्राप्य वारिच्छटाः
पूतास्सज्जनपादपङ्कजयुगस्पर्शं सरस्वत्ययि ! ॥ ५

ह्रीं कार्यैकजमञ्जुपुस्तकमहावीणा करायै च वाग् -
वादिन्यै वदनेऽक्षरावलिसुधासारं सृजन्त्यै मुहु-
र्वीणाक्षालिकमण्डलूंश्च भगवत्यैवाद धत्यै सर-
स्वत्यै मेऽस्तु नमो नमः प्रतिपदं तुभ्यं नमो हंसगे ! ॥ ६

वीणाक्षावलिमुख्यभूषितचतुःपाणिः स्फुटत्कैरव-
क्रोडैणाङ्कमणीमयालयगता कुन्देन्दुसंवादिनी ।
त्वद्वक्त्राम्बुजनिर्यदात्मवदना गच्छत्सुधाबिन्दुभ-
श्रीसारस्वतमन्त्रवर्णनिचयं श्रीभारती ध्यायते ॥ ७

षट्काव्योदितसप्तविंशतिमितैः सारस्वतैराश्रितः
श्रीसारस्वतदीपकः स्तववरो नन्द्यात्प्रभावाश्रयः ।
आनन्दादुपवैणवस्मरणतो ऽप्येतस्य पुंसां लयम्
प्राप्तानां हृदयालये विदधते वासं विबोधश्रियः ॥ ८

## ४४. ॥ श्रीसरस्वतीस्तोत्रम् ॥

(अनुष्टुप्)

श्वेतपद्मासनादेवी श्वेतपुष्पाभिशोभीता ।
श्वेताम्बराधरनित्यं श्वेतगन्धानुलेपना ॥ १

श्वेताक्षी शुक्लवस्त्रा च श्वेतचन्दनचर्चिता ।
वरदेति सिद्धगन्धर्वैः शशीभिस्स्तूयसे सदा ॥ २

स्तोत्रेण च तथा देवगीर्धात्री च सरस्वती ।
ये पठन्ति त्रिकालं च सर्वविद्या लभन्ति ते ॥ ३

## ४५. ॥ श्रीशारदास्तुतिः ॥

(दण्डक)

हिमकरकरहारनीहारहीराट्टहासोल्लसत्क्षीरनीरा
करस्फारडिण्डीरपिण्डप्रकाण्डस्फुरत्पाण्डिमाड-
म्बरोद्दंडदेहद्युतिस्तोमविस्तारशंखच्छटा ।
धवलितसकलत्रिलोकीतुला कुण्डलालीढगण्डस्थलाहार
संचारणा हारिवक्षस्थला नूपुरारावसंरावदिग्मण्डला
हंसवंशावतंसाधिरोहोज्ज्वला ।

विनमदमरसुन्दरीकण्ठपीठीलुठात्तारहारामला
मूलसङ्क्रान्तसत्क-न्तिपादाम्बुजव्याजनि-
र्व्याजसन्दर्शितस्वान्तसंशुद्धसेवातिहे वाक-भावोद्भवा,
भुवनहितकरं परं धामसौवं प्ररूढ्या नृवंद्याद्य सद्यः प्रसद्य
प्रदद्यान्मणिमालिका पुस्तिका कच्छपीनीरुरुट्शस्तहस्ता सहस्ता
सदा शारदा ॥ ४

सरभसरभच्चारुवन्दारुवृन्दारकोदारदारस्फुरन्मौलिमौलिस्पृग्प्रत्नरत्न-
प्रभाभारसारक्रमा
धौ(त) भूतभ्रमा, स्फटिकतुहिनचन्द्रनिस्तन्द्रसच्चन्द्रचन्द्रप्रभा
जिष्णुवर्धिष्णुरोचिष्णुरोचिप्रपञ्चाश्रिता सावकाशा भृता स्यान्नमस्यं
नृणाम् ।
अपमलकलहंसमध्यासिता नासिता राजिता राजिता सम्पदा
शर्मदा मन्दमन्दारमालाभिरभ्यर्चिता चर्चिता चन्दनैः,
विकसितशतपत्रपत्राभिनेत्रा पवित्रा विचित्राऽनवद्यत्वविद्या
नभिद्यत्व सद्यानसद्यः प्रपद्यादलं भारती भारती ॥४॥

## ४६. ॥ श्रीजिनवाक्स्तुतिः ॥

(अनुष्टुप्)

सर्व्वज्ञवाणी जयतात् सर्वभाषामयी शुभा ।
पञ्चत्रिंशद्गुणोपेता मनुपूर्वस्वरूपिणी ॥ १

दयामय्यमृतमयी वाग्देवी श्रुतदेवता ।
संसृष्टिविगमध्रौव्यदर्शिका भुवनेश्वरी ॥ २

ब्रह्मबीजध्वनिमयी श्रीमती वाग्भवात्मिका ।
ज्ञानदर्शनचारित्र-रत्नत्रितयदायिका ॥ ३

अर्हद्वक्त्राब्जसम्भूता भव्यकैरवचन्द्रिका ।
नयप्रमाणगम्भीरा नवतत्त्वगमान्विता ॥ ४

वाग्वादिनी भगवती कुमतिध्वंसकारिणी ।
स्याद्वादिहृदयाम्भोजस्थायिनी मातृकामयी ॥ ५

नित्या सरस्वती सत्या ज्योतिरूपा जगद्धिता ।
वागीश्वरी सिद्धिदात्री सिद्धबीजमयी परा ॥ ६

परमैश्वर्यसहितागणभृद्गुम्फिता श्रुते ।
सिद्धान्तार्थप्रदाऽचिन्त्याऽनन्तशक्तिश्च शारदा ॥ ७

स्याद्वादवादिनी श्रेष्ठा तारिणी भववारिधेः ।
या हृज्जाड्यान्धकारस्य हरणे तरणिप्रभा ॥ (अ.कु.) ८

सा मद्वक्त्रे निवसताज्ज्ञानानन्दप्रदायिनी ।
नमस्या मामकी तस्यै बोभवीतुर्मुहुर्मुहुः ॥ ९

पू.नन्दिरत्नशिष्यविरचितम्

## ४७. ॥ श्रीसारस्वतोल्लास-काव्यम् ॥

(इन्द्रवज्रा)

कश्चिज्जनो लज्जितहृज्जडिम्ना शुश्रूषितश्रीगुरुपारिजातः ।
सारस्वतं सारमवाप्य मन्त्रं नक्तन्दिवाऽजायत जञ्जपूकः ॥ १

पद्मासनं पूरयति स्म जापं कुर्वन्नपापं यदसौ सशौचः ।
मेनेऽखिलैरस्खलितप्रसर्पज्जाड्यारिबन्धाय स नागपाशः ॥२

गोक्षीरधाराधवलं वसानः स(सु)कोमलं वस्त्रयुगं बभासे ।
जापादुपागत्वरशारदायाः पुरस्सराङ्गप्रभयेव लिप्तः ॥(उ.जा.)३

तस्याऽतिलोलावपि लोचनाली नालीकतुल्यं कविमातृवक्त्रम् ।
उद्दामसौन्दर्यमकरन्दलोभाज्जाने जहीतः स्म न जातु जापे ॥४

भाति स्म तस्य स्फटिकाक्षमाला
माला नु कल्पद्रुमकुड्मलानाम् ।
त्रपामि साक्षाद्यदि जातु देवीं तत्पूजयामीति करे गृहीता ॥ ५

तेनाऽङ्गुलीं पत्रलपाणिरक्ताऽशोकेऽक्षसूत्रस्य मिषेण बद्धा ।
श्रीशारदातुष्टिवशागमिष्यद्विद्याङ्गनान्दोलनकेलिदोला ॥ ६

वाग्वादिनी सन्निधिवर्त्तितत्तद्विद्याव्रजादेकतरां दिधीर्षुः ।
मन्येऽक्षमालाकमनीयपाणिः पाशं गताशङ्कमुपाददे सः ॥ ७

गम्भीरनाभीनिभकूपकूले तस्य व्यलोकि स्रवदुस्रवारिः ।
अङ्गुष्ठपुष्टाङ्गवृषादवाप्तभ्रान्तिर्घटीयन्त्र इवाऽक्षसूत्रम् ॥ ८

मेरुं त्रिरत्नोज्ज्वलमेखलं नाऽस्खलज्जपन्नप्युदलङ्घताऽसौ ।
विद्याधरेशा अपि यं न शक्ताः
स्युर्लङ्घितुं किं तमनाप्तविद्यः ॥ (उ.जा.) ९

हृत्पद्मतोऽतिप्रणिधानमुद्राबन्धेन निर्यातुमपारयन्त्या ।
तस्य प्रसर्प्पज्जपहुङ्कृतीनां दम्भादरावि श्रुतदेव्यलिन्या ॥१०

प्राप्तोऽथ सारस्वतमन्त्रजापारम्भाद्दिनः पञ्चदशोऽपशोकः ।
प्रामूमुदन् तत्र मनांसि नृणां दीपालिकावर्षतटाकपालिः ॥११

सम्पूर्णचूर्णद्रवसान्द्ररेखा-प्रसाधिता यत्र विभान्ति सौधाः ।
गोक्षीरधारोज्ज्वललो(ल)लक्ष्मी-
लीलाकटाक्षावलिशालिनः किम् ॥ (उ.जा.) १२

आशङ्क्यते यत्र विलोक्य लोकै-
र्लिप्ताऽऽलयप्राङ्गणचूर्णरेखाः ।
अर्केण कोपात्करकर्त्तरीभिः
कृताच्युतेयं किमु कौमुदीति ॥ (उ.जा.) १३

धन्यात्मनां ध(धा)मसु चूर्णरेखाः
शुभ्रा न बाभ्राजति यत्र लम्बाः ।
सोत्कण्ठसत्कर्मजपुण्यसक्ताः
प्रत्यक्षलक्ष्याः सरयो वहन्ति ॥ (उ.जा.) १४

पद्मावतां सद्मसु यत्र जाताः खण्डाज्यवल्लड्डुकचण्डगोलाः ।
बाढं कुलस्त्रीकरढिङ्कुलातः
प्रातः पतन्तः क्षुदरिं क्षिपन्ति ॥ १५

सन्त्येव गौराः करलालनीयाः स्थूला अशैथिल्यकथास्तथापि ।
यल्लड्डुकेभ्यः सुदृशां कुतश्चि-
द्धीनाः कुचाः कालमुखास्ततः किम् ॥ १६

स्याद्यत्रजानां सुकुमारिकाणां स्निग्धात्मनामद्भुतमाधुरीणाम् ।
तुल्यः परं वाडवतप्तसर्पिः-
सिन्धोः सुधांशोस्तलितः सबिम्बः ॥ १७

सूक्ष्मोज्ज्वलस्वादुससौकुमार्याः
केषां न हर्षाय यदीयसेवाः ।
किं सोमभासोऽन्यमहो सहिष्णु-
द्योः रत्नरुत्कर्त्तरिकाविलूनाः (?) ॥ १८

दधिस्थिरस्थूलदलास्तनीयः
सेवा समन्तो हु(?हृ?)त तन्तुपूगाः ।
सारस्ययुग्मोदकपुष्पगुच्छाः
श्रीवल्लयो यत्र जयन्ति शुक्लाः ॥ (उ.जा.) १९

यत्रेश्वराणां तपनीयपाशाः प्रेङ्खन्ति वर्णोत्तमखेलनीषु ।
किञ्जल्कपिङ्गानि किमप्रफुल्ल-
प्रसूनबुद्ध्या मिथुनान्यलीनाम् ॥ (उ.जा.) २०

द्यूतेन दन्ता अपि भूपतीनां ये पातितास्तैश्चिरसङ्गृहीतैः ।
कपर्दिकानां कपटेन यस्यां कुन्दावदातैः कितवा रमन्ते ॥ २१
(उ.जा.)

वाल्लभ्यतो हिङ्गुल-यूषयन्त्र-
न्यासच्छलाद्यत्र न मन्त्रवित्तः(त्कः ?) ।

कुर्यात् कुहूकुम्भकुचाकपोल-
श्रीकारिणीः कुङ्कुमपत्रभङ्गीः ॥ २२

तस्याऽभवद्वासरवासवस्याऽवसानसन्ध्यावसरः सुमेध्यः ।
ध्यानादमुं क्षोभयितुं नु रागैरुत्पादितव्यापकदावशङ्कः ॥ २३
(उ.जा.)

तत्राऽरुणीभूतसमस्तभावे हारोऽपि गुञ्जाफलगुम्फकल्पः ।
कालीं मुखालीमविलोक्य काल-
क्षेपादुपालक्षि चलेक्षणाभिः ॥ २४

व्योम व्यरोचिष्ट विचित्रचञ्चद्दीधित्यदभ्रस्फुरदभ्रसालम् ।
वाग्देवताविर्भवनोत्सवाय प्रत्यग्रपट्टांशुकमण्डपः किम् ? ॥२५

दीपादिषु स्वं क्षिपताऽऽतपस्वं पलायितुं वेद्मि दिनेन मुक्तः ।
राज्ञो दलं वीक्षितुमायदाभादस्ताचले शैखरिकः खरांशुः ॥२६
(उ.जा.)

विष्णुं जगुः पर्वतमस्तकेऽज्ञास्तेनाऽस्तभूमीभृतिभानुदम्भात् ।
दैत्यादृतध्वान्तचमूदयेऽर्चिश्चक्रारुणं चक्रमभूत्तदीयम् ॥ २७
(उ.जा.)

रेजेऽर्कबिम्बिं(म्बं?) वरुणेभकुम्भः
सिन्दूरपूरच्छुरणारुणः किम् ? ।
किं तद्वधूकुङ्कुमितास्यपद्म-
च्छायारुणः स्फाटिकदर्प्पणो वा ॥ २८

श्रीकण्ठकान्तामगमं न गङ्गामित्यात्मशुद्ध्यै पुरतः सुराणाम् ।
उत्तुङ्गकल्लोलकरेऽर्कगोलं दध्रे क्रमादम्बुधिरग्निवर्णम् ॥ २९

पत्युः प्रतीच्यास्तुरगेभगर्भं रत्नैर्भृतं मन्दिरमम्बुराशिः ।
तस्योपरिष्टादहिमांशुबिम्बं(?)
शिश्राय शोणोपलकुम्भशोभाम् ॥ ३०

अम्भोल्पमग्नार्कमिषेण लक्ष्म्याः
प्रमीलितायाः प्रियसिन्धुतल्पे ।
तुङ्गः स्तनः पीडनपाटलः किं
जातोऽनिलोद्धूतदुकूलदृश्यः ॥ (उ.जा.) ३१

मन्ये तमोभिः कृतरथ्यरङ्गत्तुरङ्गरूपै रविरात्मवैरी ।
नीत्वोपकण्ठं धिगपाति पापैः पाथोधिमध्ये तदनु प्रसस्ने ॥३२
(उ.जा.)

कालीं तमःकञ्चुलिकां सतारामुक्तामदृश्येन्दु-तरण्युरोजाम् ।
सन्ध्यानुरागोरगवल्लिरङ्गा-
च्चङ्गा मुखे(ऽ?) वस्त कुहूकुलस्त्रीः ॥ ३३

सर्वप्रकाशप्रवणार्कदीपोत्सर्प्पच्छविच्छद्मशिखान्तसूतैः ।
नभःशरावक्षरितैरभारि क्षोणीतमः कज्जलचूर्णपुञ्जैः ॥ ३४
(उ.जा.)

ध्वान्तावलिश्यामलितां विचित्राकाराञ्चितोडुप्रकराभिरामाम् ।
दीपोत्सवे रात्रिवधूरपि द्यां
चक्रे विलिप्योज्ज्वलमण्डनां नुः ॥ ३५

कोपेन जज्वाल तरङ्गिरागा नूनं वनस्था ततिरौषधीनाम् ।
प्राणेश्वरः शीतकरोऽकरोद्य-
न्ना(न्न)मां करस्पर्शनतोऽपि तोषम् ॥ ३६

स्मेरं मरन्दामृतमिन्दिरायाः सद्माल्परोलम्बकलङ्कपङ्कम् ।
अन्तः सरस्तारकपत्यपत्यव्रातोपमां कौमुदमाप वृन्दम् ॥ ३७

उच्चैस्तरादम्बरतोऽस्तशैले पातेन तेजो यदभाजि भानोः ।
दीपालयस्तच्छकलायमानाः प्रत्यालयं दिद्युतिरे तदानीम् ॥३८

लोकेन हेमन्तसमन्तशीतावपीतसीतङ्कतया हुताशः ।
दा(दी)पावलीदीपकदम्बदम्भादूपे तमःसन्ततिकृष्णभूमौ ॥३९

(उ.जा.)

मा संविगृह्येन्दुरहोदुरन्तैस्तत्राऽह्नि जिग्ये तिमिरैस्ततोऽसौ ।
नष्टो गृहीतोडुदलोऽथ दीपव्याजादभूच्चम्पकपुष्पवृष्टिः ॥ ४०

नारीर्निरीक्ष्याभरणाद्धुताङ्गीः
शृङ्गज्वलद्दीपकपङ्क्तिभङ्ग्या ।
टङ्कावलीस्तत्र महे महेभ्य-
गेहश्रियोऽप्याऽऽमुमुचुः स्वभाले ॥ ४१

दीपोत्सवे नूनमगादलक्ष्मीर्लक्ष्मीश्च वेश्मस्वकृतप्रवेशम् ।
तस्मादलभ्यन्त मिथोऽबलाभि-
द्दीपच्छलात्काञ्चनकन्दलानि ॥ ४२

अग्रे निजस्वामिजहासहर्षादावासलक्ष्मीरिति वीक्ष्यते स्म ।
तद्द्वारवक्त्रे गृहरत्नराजी ताम्बूलरङ्गारुणदन्तपङ्क्तिः ॥ ४३

ध्वान्तद्विषा च्छिन्नरुचोऽरयो न-
श्चण्डांशवोऽमी इति शङ्कया किम् ।
रोषारुणास्तेष्वधिरुह्य तारास्तस्थुः पृथुस्थालगदीपदम्भात् ॥४४

स्वस्वालयेभ्यो निरयुः कुमारा मेराज्यकै राजितपाणिपद्माः ।
कर्तुं नु चामीकरकेतकैस्त-
ज्जापाय दर्भासनजा सपर्याम् (?) ॥ ४५

निर्माप्य मे रात्रिकदीपिकाः स श्रीपर्वराट् पुम्भिरलभ्यमानम् ।
अशूशुधद्वेश्मसु शोकशत्रुं शङ्के सपत्राकरणाय रात्रौ ॥ ४६

(उ.जा.)

आह्लादलक्ष्मीं बहुलामवाप्य
केऽप्यग(ग्र)धामान्तर तिह्ममान्तीम् (?)।
धीरा निधीकर्तुमिवौषधीच्छा-
धीनाः खनन्ति स्म वनावनीषु ॥ ४७

दीपावलीपावनरात्रिकार्यं निर्माय मङ्गल्यमथो नृनार्यः ।
दीपद्युतादर्पकदोःप्रतापाद्(?) दान्तोदरं तल्पनिकेतमापुः ॥४८

दीपस्तदीयामलदीप्तिदीव्यच्चीरावृताङ्ग्यास्तिलकं किलैकम् ।
देहल्यनुल्लङ्घनलालसायाः
सत्याः श्रियोः दर्शि(श्रियोऽदर्शि) गृहोदरेऽपि ॥ ४९

सद्वर्णपादं गुणगुम्फयोग्यं सज्जं कलावज्जनितं युवानः ।
भेक्षुस्तथा तल्पममा वधूभिः (?)
काव्यं यथाऽलङ्कृतिभिः सहार्थाः ॥ ५०

गाढोपगूढस्तनपीडनादिक्रीडाः प्रदीपोऽत्र वधू-धवानाम् ।
पश्यन्मरुल्लोलशिखोऽन्तरन्तः
शङ्के शिरोऽन्दोलयति स्म रागी ॥ ५१

पुष्पायुधायुःपरिवर्द्धकं यद्यद्यौवनद्रोः कुसुमायमानम् ।
यद्रागवाद्र्धैरमृतोपमं तत् किं नो युवानो विदधुर्वधूषु ॥ ५२

क्रमेण जाता यदि घूर्णनेभ्यो निर्णीतनिद्रागतयः प्रदीपाः ।
किं तर्हि वाच्यं रतकेलिखिन्नोऽन्तरङ्गतारुण्यवधूवराणाम् ॥५३
(उ.जा.)

सम्भोगयुद्धेऽङ्गुलिकुन्तकोटिभ्रूचाप-दृक्तोमरघोरघातैः ।
प्राप्ता निरैक्षुः किमु सान्द्रनिद्रा-
दम्भादनुत्थां मिथुनानि मूर्च्छाम् ॥ ५४

जालाध्वना चक्षुरगोचराङ्गः प्रविश्य सौधेषु समीरचौरः ।
जरीहरीति स्म शयालुदम्पत्यङ्गश्रमाम्भःकणमौक्तिकानि ॥५५
(उ.जा.)

उत्थाय रात्रौ बहुधान्यशुद्धिसिद्धयोः श्रयन्तादपि(?)हेतुभावम् ।
स्वस्वौकसः सूर्यकदारुहस्तौ नार्योऽचकर्षन्नहितागुणज्ञाः ॥५६

तस्यां निशायामथ बालिशानां धुर्यः स तुर्यप्रहरान्त्यभागे ।
सञ्जातसारस्वतलक्षजापः प्राप क्षणं स्वापमिवाऽपपापः ॥५७

उद्धवर्न्दमां तावदभङ्गभाग्यः सौभाग्यशोभालटभाङ्गभङ्गी ।
श्रीशारदां कोविदकल्पवल्लीमग्रे समग्रे हितदां ददर्श ॥ ५८

नाऽबोधि कामाधिकदां स्वपुत्रीमादावतोऽपत्यमहत्त्वमिच्छुः ।
यत्पादयोः पूजयदिष्टपूर्त्यैवेधा न्यधान्नाकिमणीन्नखान्नु ॥ ५९

यत्पादयोरुल्लसदंशुदीप्रां कामाङ्कुशाः किं सुरकेलिवाप्यः ।
नित्याऽनमद्बिम्बनदम्भमज्जाद्देव्यङ्गरागाविलरक्तनीराः ॥६०

नाऽमी नखा यत्पदयोः सुवृत्ताः किं तर्हि सा मन्त्रठकारमाला ।
तां लोहितां चिन्तयतां सतां यद्-
वश्याः कवित्वादिकलामहेलाः ॥ ६१

यत्पन्नखाः प्रेङ्खिमयूखलेखाशिखामुखा मूर्खमतल्लिकानाम् ।
कुर्वन्ति दीपा इव हृन्निकेतालोकं तमस्काण्डविखण्डनेन ॥६२
(उ.जा.)

भवार्णवान्तः सततभ्रमो यत् पादाङ्गुलीविद्रुमकन्दलानाम् ।
लाभेन भो यस्य भवत्यवन्ध्यः सुधीवराणां धुरि वर्णनीयः॥ ६३
(उ.जा.)

पादौ यदीयौ जलदुर्गवृत्तेरुज्जाग्रतः षट्पदरक्षकस्य ।
पाथोरुहोऽप्याहरतः श्रियं चेत्-
तव्याति(तयाऽपि) यातव्यमवश्यमेव ॥ ६४

द्योभूरुहामीहितमात्रदानां हीनोपमानात् कविदीयमानात् ।
यस्याः प्रकोपं किमधारयन्तौ
पादौ जपादौ स्प(स्वदे)दशोणवर्णौ ॥ ६५

वाचालतामञ्चति नूपुरं चेदचेतनं यच्चरणे निविष्टम् ।
तद्युग्मधारी हृदि तर्हि विज्ञः स्याद्वक्त्रनिर्यद्वरनव्यकाव्यः ॥६६

वर्णोऽस्ति शोणस्तरबादिवाच्यस्तेनाऽस्य विश्राम्यति तारतम्यम्।
यस्याः पदाब्जद्वय एव यत्तद्विश्रान्तविश्वत्रयभक्तिरागम् ॥ ६७

ऊर्वाततताया यदनर्घ्यजङ्घा वल्लेः सकाञ्चीमणिकौसुमायाः ।
मञ्जीरदम्भादकृत स्वयम्भूर्भाम्भोभृतं मेरुभृदालवालम् ॥ ६८

रक्तारविन्दं कुरुविन्दमग्निः सिन्दूरमित्याद्यरुणार्थवृन्दे ।
मुख्यौ यदंह्री तदमू दधेते मूर्ध्नि स्फुरन्नूपुरहेमपट्टम् ॥ ६९

पादा यदीयाः कृतपूजनानां जाड्यं जवान्नाशयितुं जनानाम् ।
मञ्जीरमाणिक्यमयूखलक्षाः सन्तन्वते कोपकटाक्षलक्षाः ॥७०

ऊरुश्रियाऽऽखण्डलकुम्भिशुण्डादण्डाभिमानोद्दलनेऽद्भुतं नः ।
यस्याः सदा नम्रशिरस्करम्भास्तम्भाभिभूतौ पुनरस्ति खेदः ॥७१

युक्त्या भुजायामवती यदीयश्रोणीतटे काऽप्यमरी न काञ्चीम् ।
शक्नोति बन्द्धुं न भवत्यमुष्या
दिव्या यदि व्याससमासशक्तिः ॥ ७२

सम्भाव्यते स्यूतमदे भुवां चेत्तदर्कतूलातुलतन्तुलक्षैः ।
चेद्देवलोके तदतन्द्रचन्द्रज्योतिःकलापैः किल यद्दुकूलम् ॥७३

(उ.जा.)

जैनेन्द्रवाग्या(कृपा)लनपात्रसंविद्दानोत्तमाचार्यपरीष्टितुष्टैः ।
पुण्यैः परीतां नु तनूलतां या धत्तेऽवदातद्युतिदेवदूष्याम् ॥७४

आश्रोणि यस्यास्तनुरस्ति पुण्यक्षेत्रं नु गौरोद्गतरुग्(क्) प्ररोहम् ।
यत्रान्तरीयाग्रतरङ्गभङ्ग्या भान्त्यद्भुताः सीरविलेखलेखाः ॥७५

यस्याः पुरे गर्भगनाभिकूपो यो मेखलामध्यमदीप्रवप्रः ।
रत्नोत्थितास्तत्र मिथो मिलन्त्यः
कुर्वन्त्यलम्भाः कपिशीर्षशोभाम् ॥ ७६

काले कलौ गत्वरतत्त्वविद्ये या मेखला हाटकपट्टिकायाम् ।
रत्नानि धत्तेऽक्षरपङ्क्तिरूपां नीवीमवैम्युत्तमवाङ्मयानाम् ॥७७

मध्यो न किं वा न मयैक्षि यस्याः
प्राच्यो न तस्य प्रतिमासु वृत्तेः ।
अन्यस्तु पक्षोऽभिमतो यतोऽहं
स्थूलार्थदर्शी स च गाढसूक्ष्मः ॥ ७८

जानीत यन्मूलतनूलतामप्युन्मीलितां तूलिकया कलातः ।
नो चेत् कथं मध्यशलाकिकायां
तिष्ठत्यपारः स्तनशैलभारः ॥ ७९

सर्वेश्वरी या वरमीश्वरादेः पादेन कस्याऽपि तर्तिं करोति ।
नो चेद्वपुर्वालनयावलग्नो भग्नोऽभविष्यद्बिसखण्डबन्धुः ॥ ८०

यस्याः प्रभावेन विनाशवन्ध्या सन्ध्यातिमेध्या मुखपूर्णिमेन्दोः।
जाघट्टि शोणोपलकुट्टिमं वा वक्षोङ्गणे कञ्चुकचक्रवर्त्ती ॥ ८१

आकल्पकीर्तिं कलितप्रतापां वक्षोवनीमुल्लसितप्रवालाम् ।
चर्कर्त्ति चोलः कुचशैलभूमीं
यस्याः समीरोद्धुतधातुधूलीम् ॥ ८२

वैराग्यभङ्ग्या हृदयाद् यदीयाद् यः पुस्तकान्तर्गतकान्तसूक्तैः ।
कृष्टो बहिस्तिष्ठति रागराशिः
शङ्के स लोकेऽजनि कञ्चुकाख्यः ॥ ८३

काश्मीरदेशस्य ददात्यदोऽत्युत्कर्षं ततः प्रीतिवशात्तदीशा ।
केदारमेकं हृदि कुङ्कुमस्या-
ऽऽदत्ते स्म या वै मितकञ्चुकं नु ॥ ८४

काठिन्यमुद्धृत्य हृदो बहिर्या वर्यावकार्षी(त्) कुचरूपकूटौ ।
तेनाऽजिजीवज्जनता यदल्पादप्याश्रितानां करुणां विधाता ॥८५

लावण्यपुण्याम्बुघटौ मनोभूमत्तेभकुम्भौ रतिकेलिगोलौ ।
मुक्तालतापक्वफले तदुत्थज्योतिर्जले पाटलपद्मकोशौ ॥ ८६

तेजस्विवाग्बीजमणी समुद्रौ हृद्धामसद्धर्मविवेकमौली ।
ज्ञानामरद्रुस्तबकाविति स्याद्यस्याः
कुचद्वय्युपमानिघण्टुः ॥ (यु.) ८७

श्लिष्यन्नुरोहिङ्गुलरङ्गचोलं यस्याः स्तनास्फालजकोपशंसी ।
शुक्लोऽपि लौहित्यमुपैति हारो
वीक्ष्याऽपि को वा सुकुचां न रागी ॥ ८८

कम्बुः किमु स्याद्यदकुण्ठकण्ठ-
स्पर्द्धाय पूर्णोऽप्ययमुज्ज्वलात्मा ।
यद्युच्चरत्योमिति वाद्यमानः पापापहं नो परमेष्ठिबीजम् ॥ ८९

देदीव्य(प्य)ते देव्यधरारुणास्यासिन्दूरपादा कुमुदावदाता ।
या मानसे सौमनसे न सेवा-
लस्याऽऽलये दिव्यसितच्छदीव ॥ ९०

वार्द्धिं विना विद्रुममुद्बभूवाऽशोकं विनाऽस्योदलसत् प्रवालम्।
बिम्बीं विना बिम्बमलीलगद्वा
किं धूतबन्धूकमदो यदोष्ठः ॥ ९१

पद्मेन्दनाद्यद्वदनं समासभ्रूश्रीकरीं ध(धा)रयते पुरापि ।
राज्ञो जयाल्लोहितशुण्डदडं (दण्ड-)
भालातपत्रं त्वधुना तदूर्द्ध्वम् ॥ ९२

आच्छिद्य पुष्पेषुभटाद्दयालुः शङ्के स्वनासामिषतो निषङ्गम् ।
या न्यग्मुखीकृत्य करोति रिक्तं
न्यध्याय्यधस्तद्द्विजपुष्पपङ्क्तिः ॥ ९३

स्वत्यागधत्तूरकृतार्चशम्भोः खेदाय तद्वन्द्यपदामुपास्ते ।
सूक्ष्मान्तपक्ष्माङ्कुरकण्टकोद्यत्-
तारालियुग्दृग्दलकेतकीयाम् ॥ ९४

दोलाविलासोचितकर्णफाली व्यालीढताडङ्कनिभेन बद्ध्वा ।
या मुख्यरूपे वहते स्वतेजः
कीर्तिद्विषद्द्योमणि-पूर्णिमेन्दोः ॥ ९५

यद्दोर्मयद्योतरवः सपर्यापर्याकुला विज्ञकुलार्पितेष्टाः ।
शोणाङ्गुलीपल्लवलब्धशोभाः(भा-)
सम्भारमाबिभ्रति भूषणानाम् ॥ ९६

कोटीरहाराङ्गदकङ्कणाद्यप्रमाणमाणिक्यवतीं विलोक्य ।
जानामि यां रत्नकरेण रत्नाकरेण वाऽऽरोहितसर्वकोशाम् ॥९७
(उ.जा.)

प्रालेयमूर्त्तेस्तरलार्कबालोन्मीलन्मरीचिप्रचयेन यस्याः ।
उत्तीर्णवासोग्रतरङ्गधारं जागल्यतेऽङ्गं तनुते न जाने ॥ ९८

आदावभूतां जनकानुरूपे श्रीर्या च दुग्धाब्धिविधिप्रसूते ।
आचिच्छिदाते नु मिथोऽनुपात-
श्वेतौ गुणौ क्वाऽपि कलिप्रवृत्तौ ॥ ९९

या वक्त्रपङ्केरुहपातुकानां मालामिव स्तम्भितषट्पदानाम् ।
वीणां कलक्वाणवितीर्णकर्णप्रीतिं करे मारकतीं बिभर्त्ति ॥१००

य(या ? दानगत्याद्यखिलप्रकारैः
किं नो करेणोः करणिं करोति ? ।
पार्थक्यमेकाक्षरतः करस्था
चेद्वल्लकी नाऽञ्चति सल्लकीतः ॥ १०१

द्विः सप्तविद्योपनिषन्मणीनां या पुस्तिकायाः कपटेन पेटाम् ।
न्यस्तस्वदृग्(क्) चित्रकवल्लिमारा-
ल्लाति स्म पादानतदीनहेतोः ॥ १०२

या पुस्तकं वाचयतां जनो यद्भक्तस्तु यद्वाचयिता कुतोऽस्तु ?।
येनाऽस्य यादस्पतिसर्वविद्या-
स्तद्दः पुनः कोऽप्यपरो न यस्याः ॥ १०३

कण्ठेषु मुञ्चंश्चिबुकाग्रचुम्बिस्थूलस्तनस्पर्शजकोपभीरुः ।
यस्याः करे कश्चिदमुञ्चदक्षस्त्रग्माल्यमर्चार्थमुरः पुरःस्थे ॥१०४

पाणिस्थवैडूर्यकमण्डलुर्या सौवास्यदास्यप्रणयीन्दुपुर्याः ।
उच्चाटहेतुं कटके तुलौजाः किं राहुमानीय वहत्युपान्ते ॥१०५

नव्यप्रसूता सुरसौरभेयी या भेक्षुषां दोग्धि मनीषितानि ।
तेनान्तिकं वत्सकवत् स कश्चि-
द्यस्या न मुञ्चत्युचितं मरालः ॥ १०६

तां मानसोत्थैरथ रूपभङ्गीचङ्गीकृताङ्गीमिह गीरधीशाम् ।
व्याकोशकाव्याम्बुरुहैः सुवर्ण-
श्रीवर्णनीयैर्महितुं स लग्नः ॥ १०७

ॐकारकल्पां सकलामराणाम्
अग्रेरस(सर)त्वेन सरस्वति ! त्वाम् ।
जाड्येन चण्डेन विडम्बितः त्वाम्
गोस्वामिनीं विज्ञपयाभ्य(म्य)विज्ञः ॥ १०८

जाड्येन पीड्ये जनयित्रि ! चित्रं वेविद्यमानावरणव्रजोऽहम् ! ।
तेनेदमुच्छिन्द्धि निजांहिनिष्ठाङ्गुष्ठोल्बणाग्निष्टनिषेवणान्मे ॥१०९

स्वभावस्वत्त्व(सत्तत्त्व ?) वती सती मे
दभ्रं हृदभ्रं श्रितवत्यपि त्वम् ।
हत्वा तमः प्रातिभसुप्रभातं नातन्तनीषीदमयौक्तिकं ते ॥११०
(उ.जा.)

भाग्योदये कामगवी पुरोगा सम्पादयन्ती हितमाश्रितानाम् ।
तस्मादभाग्येऽपि मदिष्टमेकं
तेभ्योऽधिकायास्तव दातुमर्हम् ॥ १११

प्रेङ्खोलनामौलिगचामरालीदण्डाः किरीटाग्रनिविष्टरत्नाः ।
जाड्यं हरन्ते तव कर्मकर्यो
ऽप्यैङ्कारवर्योपमया स्मृताङ्ग्यः ॥ ११२

तेनैतदल्पार्थकृतेऽर्थना तेनाऽर्हा फलायेव मरुल्लतायाः ।
मातर्ममाऽतः करुणाकटाक्षं
मुञ्चोपरिष्टाद् घटितेष्टलक्षम् ॥ ११३

स्तवनम् ॥
विज्ञप्तिमेवं कृतवन्तमाख्यत्तं मूर्खमुख्यं विधुजिन्मुखी सा ।
उत्तिष्ठ पात्रीकुरु वक्त्रमित्थं
चक्रे च वक्रेतरकर्मकोऽसौ ॥ ११४

देवी तदा तस्य दिनोदयाब्जस्पर्द्धाकरस्तोकविकासिवक्त्रे ।
दत्ते स्म वैडूर्यकमण्डलूद्यन्नीलाब्जनालीममृतस्य धाराम् ॥११५

याऽनर्गले निर्गमितेऽद्य मान्द्ये वागीशया गौरदृगौषधेन ।
रेजेऽस्य किं पथ्यपरायणायाः
शास्त्रेषु बुद्धेः स्फुरणाय यष्टिः ॥ ११६

तस्यां च किञ्चित्कृपणाज्यधारा-
न्यायेन जिह्वोपरि लग्नवत्याम् ।
सा पञ्चषोच्चारितबीजवर्णा
विद्युद्वदान्य(न्या)व्यवधत्त देवी ॥ ११७

यस्याः प्रसादेन मुखादवापे स्वप्नोऽयमीदृग्घनपुण्यलभ्यः ।
साऽपि प्रमीलाऽस्य जगाम दूरे
धिग् वेधसोऽभीष्टवियोगदत्वम् ॥ ११८

तावद्वियत्तालतरौ विशाले पिङ्गाङ्गभाः पश्चिमभागरागः ।
प्राचीकटद्वासरमर्कटेशः
प्राचीशिखायां शिखिशोणमास्यम् ॥ ११९

पूर्वायुवत्या निदधेऽस्य जापावसानमङ्गल्यकृते स्वमौलौ ।
बालार्करुग्घट्टपटीपटीयः-
पाटल्यनिर्धादि(टि?)तधातुरागा ॥ (उ.जा.) १२०

म्लानोडुपुष्पाद्विपुलाभ्रतल्पादुत्थाय यान्त्यां रजनिप्रियायाम् ।
भ्रष्टांशुकः श्राग् विललाग भूयो
रागाविलः शीतकरोऽम्बरान्ते ॥ १२१

जहार हारावलिहेतवेऽहः-श्रीस्तारमुक्तौघमभूत्तदा किम् ? ।
भूयस्तरां स्तात्पुनराप्स्यतीयं श्यामा समुद्रप्रियपुत्रपत्नी ॥१२२

पाथोधरध्वानमपार्थयन्तो ये स्म प्रथन्ते दधिमन्थनादाः ।
मन्येऽपविघ्नाग्र(ग्रि)मवत्सरास्ति-
प्रौढोत्सवे ते पटहप्रणादाः ॥ १२३

उद्योगिनां जागरणाय साधारण्येन दीर्घाः कृकवाकुघोषाः ।
पुण्यार्थमद्रव्यविभातभेरीभाङ्कारशोभां बिभराम्बभूवुः ॥ १२४

शोणौ धुनीधन्यवधूर्मिपाणिप्रेङ्खोलिनौ प्रेमगुणेन बद्धौ ।
भूयो भवद्योग-वियोगवर्या-
वासञ्जतां कोकविलासगौलौ (?) ॥ १२५

वर्द्धापयन्ति स्म सुपर्ववध्वः श्रीवीरनिर्वाणदपर्वरात्रिम् ।
पेतुः समन्तादिति शाड्वलेषु प्रालेयलेशव्यपदेशमुक्ताः ॥१२६

दुग्धाज्ययोर्धामनि चेदियन्तः स्युर्मोदकाः पर्व तदेति मन्ये ।
स्मराब्जहस्ताभिनयालिगुञ्जा-
गीर्भिर्न कस्को जहसेऽब्जिनीभिः ॥ (उ.जा.) १२७

दीपालिकापोषितपूर्जनानामर्को मनोभिः किमु पारणोत्कैः ।
आकृष्य- त्तमरोषरक्तो-(?)
ऽध्यारोह्यत प्रागचलाग्रभागम् ॥ १२८

कोवेदभानाउ(मु?)दिते विभाना-(?)
मीशे तमः स्थास्यति दृश्यमुर्व्याम् ।
छायामयस्तु प्रतिवस्तुपुञ्ज-
स्तस्य स्थितः पश्यत दुर्जयस्य ॥ १२९

जातेऽथ तेजोऽरुणिते प्रभाते नाऽतेनिरे के सविशेषवेषम् ।
दृष्ट्वेव नव्यांशुकमर्कमादौ
यातानुयाते कुशलो हि लोकः ॥ १३०

ताम्बूलरक्ताधरदन्तजिह्वाः सर्वेऽभवंस्तच्छुभमेव तेषाम् ।
ये तद्दिने सन्मुखरागयुक्तास्तेऽशेषवर्षेऽपि विषादमुक्ताः ॥१३१

ताम्बूलबाहुल्यविलोहितास्याः शुभ्रांशुकेन्दुद्युतिदत्तदास्याः ।
सन्तो विलेमुः(सुः) किमिलावतीर्णाः
सौदामिनीसुन्दरशारदाब्दाः ॥ १३२

भाग्यश्रियाऽऽलस्यगमायपुंसां भाले समुक्ताफलरक्तचोला ।
लाजाढ्यकालेयजपुण्ड्रदम्भाद्दोर्वल्लिरुच्चै रचयाम्बभूवे ॥१३३

नासाग्रलग्ना क्षतपूर्णपुण्ड्रव्याजादर्धरक्तोज्ज्वलबिन्दुबाणम् ।
भ्रूयामलज्यालिकचापदण्डे
जेतुं कलि(लिं)सन्दधिरे कुलीनाः ॥ १३४

परस्परेण प्रणयप्रवीणाः सन्तः प्रणामप्रवणोत्तमाङ्गाः ।
किं भालभूसम्भृतभाग्यभारा भुग्नीभवत्कन्धरतामधार्षुः ॥१३५
(उ.जा.)

सर्वादरः सुन्दरकूरसङ्गः संवत्सरस्याऽऽदिमवासरश्च ।
धान्येषु धनेष्वपि(धनेषु धान्येष्वपि ?)राजमाषै-
रेवाऽऽप्यते स्म त्रिकयोग एषः ॥ (उ.जा.) १३६

रक्तः प्रतापाद्धृतकूरकीर्त्तिः
स्थालासनः श(स)स्यकुलस्य राजा ।
भुक्तिक्षणेऽन्दोलितपाणिपद्मो-
द्यच्चामरोऽराजत राजमाषः ॥ १३७

ढक्कादिगाढध्वनितैरकर्णव्यापारिणः केन कृता वदान्याः ।
नो चेदनाकर्णितचाटुवाच-
श्छिन्दन्ति दौस्थ्यं कथमर्थिपुंसाम् ॥ १३८

ध्यातुः पुनस्तत्र दिनेऽस्य निद्रामुद्राविमुक्ताक्षिसरोरुहत्वम् ।
आसेदुषः स्वान्तसरस्वतिस्थे
स्वप्नाम्बुजे बीजमतिष्ठदेकम् ॥ १३९

जानेऽस्य बीजान्यपराणि जापे दत्तापमाना वनितेव निद्रा ।
कोपादुपादाय चला पलाया-
श्चक्रे नरं कस्य मणिः स्थिरो वा ॥ १४०

चेत्तानि चित्तान्निरयुस्तदा किं जातं यदेकं हि हृदालयस्थम् ।
दातेदमेवाऽस्य समग्रमुर्वीदत्तप्रकाशो रविरग्रहोऽपि ॥ १४१

यच्चोत्तमानां चितपञ्चवर्णं विघ्नावलिव्यालविलोपितूर्णम् ।
कलाशिखाशालिशिरःशिखण्डि-
श्रीखण्डनं खेलति हृद्धनेषु ॥ १४२

पापापनोदे पटुवाद्यमानः सद्यो यदेवोच्चरतीति हेतोः ।
श्रीवासुदेवः सुतनिर्विशेषं
चुम्बत्यबङ्गिप्रबलास्थिकम्बुम् ॥ १४३

नाऽलीकसूनोर्लपनः प्रतोलीरालोक्य रुद्धाः सकलान्यवर्णैः ।
पूतं परस्पर्शभयेन जाने यन्निर्ययौ भिन्नकपोलभित्तेः ॥ १४४

तिस्रोऽपि रेखास्त्रिजगन्ति गौर-
ज्योतिः कलासिद्धिशिलाविशाला ।
सिद्धः सबिन्दुस्तदुपर्यतो य-
ल्लोकस्य किं रूपकमल्पमातम् ॥ १४५

पञ्चार्हदादिप्रथमाक्षरोत्थं जैनाः समग्रागमसारमाहुः ।
षड्बिन्दुखण्डेन्दु-विरिञ्चिनामो-
पत्रं यदन्येऽप्यधिकं त्रयीतः ॥ १४६

योगिप्रधानप्रणिधानधारागोदावरीखेलिवितीर्णलक्ष्मि ।
हालक्षमापालति यत्पुरस्थैर्वर्णद्विपञ्चा[श]दुदारवीरैः ॥ १४७

यद्बीजमेकेन्दुकलां दधानां जिह्वादलं यावदलङ्करोति ।
स्यात्तावदास्याम्बुरुहस्य किञ्चित्
सङ्कोचिता साऽनुचिता न चिन्त्या ॥ १४८

आमोक्षमेकोऽप्यरिहादिवर्णोरातीति विप्राणयितुं श्रितानाम् ।
तत्पञ्चकोत्थं यदवैमि पश्य-
त्युत्कन्धरं वस्त्वधिकं ततोऽपि ॥ १४९

वाग्देवताया वदनारविन्दात्तद्बीजमासाद्यत यद्यनर्घ्यम् ।
तत्पारिजातोऽजनि मञ्जरीमान्
निस्सीमसौरभ्यमभूत् सुवर्णम् ॥ १५०

आराद्धसिद्धान्तसुरीवरीयः-प्रसादजस्वप्नमधोर्महिम्ना ।
सौघाऽजनि प्रागकरीरसंज्ञा-(?)
वीरुल्लगन्नद्य कवित्वपुष्पः ॥ (उ.जा.) १५१

श्रीनन्दिरत्नाख्यगुरुप्रसादप्रासादवासाप्तसुखः स चेदम् ।
सारस्वतोल्लास इति प्रतीतं
स्फीतं गुणैरातनुते स्म काव्यम् ॥ १५२

सन्तु स्तनन्धयधियोऽध्ययनाय बद्ध-
मेतन्मुखाब्जमणिमण्डनतां नयन्तः।
श्रीभारतीति थि(स्ति)मिताक्षरमन्त्रबीज-
प्रष्ठप्रसादमधिगम्य कविप्रकाण्डाः ॥ (वसन्ततिलका) १५३

## ४८. ॥ श्रीसरस्वतीस्तवः ॥

(आर्या)

नमो सरय-ससि-सरिस-संपुण्ण-वयणे
नमो विमल-वर-कमल-दल-दीह-नयणे ।
नमो हार-हर-हंस-कुंदेदु-वन्ने
नमो सव्व-भासासु भासा-पवन्ने ॥ १

नमो कसिण–घण–कुडिल–मिउ–सिहिण केसे
नमो विमल–चूडामणी–सहिय–सीसे ।
नमो तत्तवणिज्ज–मणि–कुंडलिल्ले
नमो वियडि–कडिसुत्त–भूसिय–कडिल्ले ॥ २

नमो तार–वर–हार–रायंत–वच्छे
नमो पणय–जण–पाव–हरणम्मि वच्छे ।
नमो विमल–मणि–वलय–वलजुय–पउट्ठे
नमो रयण–मणि–कणय–भूसिय–सुकंठे ॥ ३

नमो देवि सुविसट्ट–कंदोट्ट–हत्थे
नमो कमल–ज्झस–कुलिस–लक्खण–पसत्थे ।
नमो दुट्ठ–रिट्ठारि–निट्ठवण दक्खे
नमो देवि महु देहि दीहच्छि सोक्खे ॥ ४

नमो बाल–सरलंगुली–गिज्झ–मज्झे
नमो दिव्व–नाणीहिं–विन्नाय–गुज्झे ।
नमो सत्थ–सुपसत्थ–पोत्थ–थवि हत्थे
नमो सग्ग–मग्गग्गला–भंग–सत्थे ॥ ५

जिन (ण)–मुहकमल विणिग्गय–सामिणि
पणय सयल–जणमण–चिंतामणि ।
सिरि बंभाणि गोरि जोगेसरि वरय होइ
तुं हुं मुह वागेसरि ॥ ६

श्वेताम्बरचक्रचूडामणिश्रीयशोभद्रोपाध्यायशिष्यश्रीचन्द्रसूरिविरचितः

# ४९. ॥ अद्भूतपद्मावतीकल्पः ॥

## सकलीकरणलक्षणं तृतीयं प्रकरणम् ॥ ३

पूर्वं पूर्वाभिमुखः स्नातः शुभवस्त्रभूषितः सुरभिः ।
पर्यङ्कासनसंस्थो नासाग्रन्यस्तदृग्युग्मः ॥ १

निर्मलनिर्जनदेशे स्थित्वा मन्त्री निरुध्य वायुं च ।
आपूर्य शनैरन्तो रेचकविधिना ततस्तूर्ध्वम् ॥ २

उत्क्षिप्य च धूमशिखाकारेण विधूय पापरेणुं च ।
आत्मानं कर्मेन्धनपुञ्जस्योपरि स्थितं स्मरेत् ॥ (त्रि.कु.) ३

दीपशिखाकारेण तु तदधो जाज्वल्यमानरेफं च ।
निजहृदये चाकारं विचिन्तयेदात्मरूपेण ॥ ४

प्रविचिन्त्य धकारं तद्रेफस्याधश्च वायुरूपेण ।
दन्दह्यमानमग्निकबीजेनात्मानमवमत्य ॥ ५

भस्मीभूतमकारकबीजात्मकशेषमुपरि तस्यैव ।
मेघाकारेण ततस्त्वधो मुखाकारबीजमाकाशे ॥ ६

वर्षन्तममृतमुक्ताफलसन्निभतोयनिकरेण ।
प्लवमानं संस्मरयेत् परितो मन्त्री च सद्हृदयः ॥(त्रि.कु.) ७

दिक्छदनममलकमलं तदमृतभावोद्भवं सदा विकचम् ।
तत्कर्णिकमध्यगतं सुधोद्भवात्मानमर्जुनभम् ॥ ८

पर्यङ्कासनसंस्थितमिति ध्यात्वाऽथ हृदि करवलेन ।
षोडशदशमम्बुरुहं तत्कर्णिकमध्यमूर्ध्वस्थान् ॥ ९

पविनन्दावर्तयवांस्तदुपरि संस्थाप्य पार्श्वजिननाथम् ।
निखिलकललक्षणाढ्यं विविधचतुस्त्रिंशदतिशयोपेतम् ॥ १०

पापमथनाष्टकमहाप्रातिहार्ययुक्तं ततस्ततः परिधौ ।
तत्केशरेषु मरुदेव्यादिकजननीगणं न्यस्य ॥ ११

तत्पत्रगता रोहिणिमुख्याश्च द्व्यष्टदेवताः क्रमशः ।
इति विन्यस्य च मन्त्री ध्यानविधानं करोतु सदा ॥(च.क.)१२

अर्हत्सिद्धाचार्योपाध्यायान् सर्वसाधुयुतान् ।
अङ्गुष्ठाद्यङ्गुलितत्पर्वसु संन्यस्य वाद्यन्तान् ॥ १३

होमान्ताः प्रणवनमोमुख्याः पञ्चपरमेष्ठिमध्यगताः ।
ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः शरबीजाः प्रान्त्यादिदेशपदाः ॥ १४

त्रीन् वारान् पञ्चाङ्गुलिमन्त्रणमाधाय जल्पितैर्मन्त्रैः ।
सर्वकरेण तैरपि ललाटमुख्यादिपञ्चकं मन्त्र्यम् ॥ १५

सव्यासव्यकराभ्यां त्रीनथ हृदयं शिरःशिखां वारान् ।
कवचीकृत्य च तैरपि मुख्यं मन्त्रं ततो ध्यायेत् ॥(च.क.) १६

इति शकलविधानं शाकिनीदुष्टभूत-
ग्रहगणभवपीडाकष्टनिष्ठापनाग्निः ।
स्वकवपुषि विधाय भ्रान्तिनिर्धाटनं च
तदनु रचतु मन्त्री देवीपूजाक्रमं हि ॥ (मालिनी) १७

देव्यर्चनाक्रमसयन्त्रलक्षणं चतुर्थं प्रकरणम् ॥ ४

उद्यानवने जिनवरहृदिनीतटेऽथवा पुलिने ।
नगकटके निर्जन्तुकदेशे वाऽन्यत्र संस्थाय ॥ १

अऊॠऌॡवर्जं कूटैर्दशभिः कलाभिरधियुक्तैः ।
प्राच्यादिदिग्विबन्धं पूर्वं मन्त्री करोतु शुचिः ॥ (यु.) २

ध्यायेत् पीतमखण्डं रानुस्रं(?) वज्रपञ्जरं स्वस्य ।
परितो दुष्टैरन्यैरभेद्यमेतत् ततः स्थिरधीः ॥ ३

यन्मध्यगतं दुष्टग्रहो जिघांसुर्न लङ्घयेत् कोऽपि ।
मन्त्रार्चादिप्रभृतिनि कार्ये सर्वत्र मन्त्रविदम् ॥ ४

याति ग्रहोऽपि धूर्तस्त्यक्त्वा पात्रं हि चेत् तदानीं तु ।
आशाबन्धं मन्त्रं कुर्यादित्थं पुरा गदितम् ॥ ५

आकर्षणं वसन्ते ग्रीष्मे विद्वेषमुच्चाटम् ।
प्रावृडि शिशिरे मारणमथ शान्तिं शरदि मन्त्रविदः ॥ ६

हेमन्ते पौष्टिकमिह ये कुर्वन्त्यविरतं नियतम् ।
सकलत्रिलोकमूर्धनि भवन्ति ते पूजनीया हि ॥ ७

पूर्वाह्णेऽथ वसन्तं मध्याह्ने ग्रीष्ममपराह्णे ।
प्रावृडपि प्रदोषे शिशिरं शरदं तथाऽर्धनिशि ॥ ८

हेमन्तमुषाप्रान्ते मन्त्रविदो विदुरसन्दिग्धम् ।
कर्मैभिः कालैः कृतमिह सिद्धिं याति नो वितथम् ॥ ९

एतद् विदन्ति केचित् पुनरन्ये चैतदेव विवदन्ति ।
षट्कर्मकृतिविधानं सम्यक् सन्मन्त्रतन्त्रविदः ॥ १०

वश्यविधानं पूर्वाह्णे मध्याह्ने प्रीतिनाशनं झटिति ।
उच्चाटनमपराह्णे सन्ध्यायां मारणं तदनु ॥ ११

शान्तित्वमर्धरात्रे प्रातः पौष्टिकमामनन्ति बुधाः ।
अनयोरेकान्मध्ये यद्युक्तं तत् करोतु सदा ॥ १२

कुकुडं नीरज-दण्ड-स्वस्तिक-पवि-भद्रपीठकास्यानि ।
द्वेषण-शान्त्याकर्षण-वशीकरण-रोध-बोध-वधसमये ॥ १३

पवि-कमल-बोध-वल्लव-शङ्खाङ्कुशलक्षणा हि षण्मुद्राः ।
वध-वश्य-शान्ति-विद्वेषण-रोधाकृष्टिकार्येषु ॥ १४

शान्त्युच्चाटन-मारण-विद्वेषाकृष्टि-वश्य-संस्तम्भाः ।
उदधि-मरुद्वर-वसु-यम-सोमाऽमरदिक्षु नैर्ऋते पुष्टिः ॥ १५

रोध-ग्रथन-विदर्भण-दीपन-पल्लवसम्पुटैः क्रियते ।
वध-नाशा-कृष्टि-स्तम्भन-शान्ति-
विद्वेषण-वशीकृतिविधानम् ॥ १६

आदौ मध्ये चान्ते नामनिवेशो हि रोध आख्यातः ।
वर्णान्तरितं ग्रथनं द्विवर्णमध्ये विदर्भश्च ॥ १७

आदौ दीपनमन्ते सुपल्लवः सम्पुटं तदन्तरगम् ।
एवं षट्कर्मकृतिं ज्ञात्वा मन्त्री जपेन्मन्त्रम् ॥ १८

ब्रह्मादिपाशकाङ्कुशमाया वाग्बीजचित्तनाथमथ ।
ह्रीँ षान्तयुतं पद्मावत्यै नम एवमादिमं मन्त्रम् ॥ १९

ज्ञेयं मन्त्रस्यान्ते जाप्ये समये सदा नमः शब्दः ।
स्वाहा तु होमकाले मन्त्रस्यासौ क्रमः प्रोक्तः ॥ २०

वश्ये वषडुच्चाटे फट् हुं द्वेषे च शान्तिके स्वाहा ।
आकृष्टौ वौषट् घे मारे पौष्टौ स्वधेति मन्त्री ते ॥ २१

अङ्गुष्ठादावङ्गुलिमणयोऽङ्गुष्ठेन संविवर्त्यन्ते ।
मोक्षाभिचार शान्तिकवशीकराकृष्टिकरणविधौ ॥ २२

पूर्वमभिमन्त्र्य सलिलं मन्त्रेणाद्येन सप्तवारं हि ।
भूम्युपकरणादीनां शुद्धिं विदधातु सिद्धये मन्त्री ॥ २३

निर्दोषपट्टममलं धौतं शुचिवारिणा च विन्यस्य ।
रोचनचन्दनकुङ्कुमघनसारप्रभृतिसुरभिभिर्लिप्तम् ॥ २४

निर्याति मरुति मन्त्री शतपत्रकविमलवृन्तकाग्रेण ।
मौनावलम्बनिरतो मण्डलमेवं न्यसेत् तत्र ॥ २५

सोल्लोचमण्डपलसत्केतुपताकादिमण्डितं विपुलम् ।
विदिशि निवेशितकुम्भं सन्मुसलमथ भूततोरणकम् ॥(यु.)२६

पूर्वाग्नियमनैर्ऋतपश्चिमवायूत्तरेशदिक्चक्रम् ।
तत्त्वादिनमोऽन्तयुतं सृष्ट्या स्थाप्यं क्रमान्निखिलम् ॥ २७

श्रीवाग्बीजकमायाधरणेन्द्राय नम एव पाताले ।
स्वर्गाय नमोऽत्रादिमबीजेन्द्राय नम एव ततः ॥ २८

द्विपुटितवह्निपुरान्तः सप्तफटाराजिमुखकमलम् ।
नीलोत्पलदलदेहं सश्रीकं न्यस्य पार्श्वजिनम् ॥ २९

तदधः सुधाङ्गधवलां चतुर्भुजां लोचनत्रिकोपेताम् ।
मन्त्रात्मिकां न्यसेत् श्रीसुभगां पद्मावतीं देवीम् ॥ (यु.) ३०

तत्पूर्वकोणमुख्यात् तेजो-माया-स्मरादिपूर्वनमः ।
नित्या क्लिन्नाथ मदा स्यादुन्मादा द्रवाद्रवा ॥ ३१

स्यात् तत्परितो वलयेऽन्तनमः षण्मुख्यमन्त्रवर्णाद्याः ।
कामा-कुसुमाऽनङ्गा प्रत्येकं बाणपूर्विकान्येवम् ॥ ३२

षोडशकोष्ठे तदुपरि मायाद्यन्तनमोयुताः क्रमशः ।
रोहिण्या प्रज्ञप्ती पविपूर्वा शृङ्खलाङ्कुशा चक्रा ॥ ३३

मानवदत्ता काली महायुताऽन्या च गौरी स्यात् ।
गन्धारी जालन्धरी वैरोट्या मानवी तथाऽच्छुप्ता ॥ ३४

मानस्यसावपि महायुक्ता चेति देवता द्व्यष्टौ ।
त्रिवलयमध्ये तदुपरि दण्डेशा विंशदेवतायाः स्युः ॥ ३५

करिराजपद्मदेवासिखिजालौ शोणितांशनाशाडैः ।
केशिश्चण्डः कर्दभभुवनभ्रमणा महारक्तः ॥ ३६

कृष्णो विजयः सिंहः सुस्निग्धो रुद्रजम्भवौ सृष्ट्या ।
सिद्धार्थश्चेति नमः प्रान्ता ह्रीमादयश्चैते ॥ ३७

तदुपरि युगवलये श्रीदेव्याः सख्यश्चतुर्विंशाः ।
मायादिजया विजया च जयन्त्यपराजिता च मन्दा च ॥ ३८

भद्रा रुद्रा च करालिका च योगिन्यथ शिवा च ।
सा नन्दाऽथो अमला कमला पद्मा महाग्र्ययोगिन्यः ॥ ३९

सुयुते यन्त्रारूपे चित्रा वियुता परा च जम्भा च ।
स्तम्भा दम्भा मोहा सिद्धेति नमोऽन्तका चेति ॥ ४०

पञ्चमवलये ततः पद्मावत्यङ्गरक्षकाः सुभगाः ।
तुर्यसहस्रा निजनिजशस्त्रयुताः स्युः ससोममुखाः ॥ ४१

देवीसख्यस्त्र्यष्टावासां प्रत्येकमस्ति परिवारः ।
पञ्चशतसङ्ख्ययुक्ते ज्ञेयस्तत्रैव गुरुवचनात् ॥ ४२

षष्ठम(ष्ठे)वलये तदुपरि पद्मावत्या हि पञ्चशतचेट्यः ।
नानाभरणविभूषितगात्रा न्यस्याः सुरूपयुताः ॥ ४३

सप्तमवलये देव्या दण्डेशा विंशतिस्त्वमीषां स्यात् ।
प्रत्येकं परिवारस्तुर्यसहस्रो महासुभटः ॥ ४४

देव्या अष्टमवलये द्वाःस्थः श्रीमाणिभद्रपरिवारः ।
पञ्चसहस्रो वीरः संस्थाप्यो मन्त्रिभिर्गुरुतः ॥ ४५

पञ्चदशदशमवर्णैरहिताः क्षयुताश्च तत्र युक्तम्ल्व्र्युँ ।
व्यञ्जनवर्णाः सृष्ट्या क्रमशः स्थाप्या ध्रुवं स्वस्थाः ॥ ४६

वामेऽवामेधस्तान्मूर्ध्नि प्रत्यङ्गिराम्बिका ज्वाला ।
चक्रान्तनमो विधिना श्रीमायाकामबीजमुख्याश्च ॥ ४७

रवि-शशि-मङ्गल-बुध-गुरु-शुक्र-शनैश्वर-राहु-केत्वाख्याः ।
तेजस्त्रिमूर्तिपूर्वान्तनमोऽधस्तान्नव ग्रहाः क्रमशः ॥ ४८

वाग्बीजकश्रीतत्त्वाद्यान्तनमः स्युस्त्वनन्तवासुकिनौ ।
तक्षक-कर्कोटक-कमल-महा-
कमल-शङ्ख-कुलि-जयास्तदधः ॥ ४९

श्रीइन्द्रनन्दिमुख्या गुरवः स्थाप्याः क्रमेण तदधस्तु ।
निजगुरुकथिताः शिष्यैरवलम्बितमौनमतिनिपुणैः ॥ ५०

संस्थाप्यैवं मण्डलमथेप्सितासनसमाश्रितो ध्यायेत् ।
दन्तैर्दन्तान् बहुशस्त्वसंस्पृशन्निति महामन्त्री ॥ ५१

नाभ्युद्गताष्टपत्रककमलप्रान्तस्थितां सुधाशुद्धाम् ।
त्रिफणाहिभूषिततमस्फारशिरस्कां शुभाङ्गधराम् ॥ ५२

पद्माङ्कुशवरपाशकसम्भूषितभुजचतुष्टयां हृष्टाम् ।
अम्भोजासनसंस्थां श्रीपद्मां देवतां स्थिरधीः ॥ ५३

शुभ्राम्बरपरिधानां दन्तच्छेदाभहंससंरूढाम् ।
ध्यानविधानेनान्तः श्रीपद्मां देवतां स्थिरधीः (ध्यायेत्) ॥५४

(च.क.)

पञ्चोपचारपूजामस्येति करोतु चाह्वानम् ।
स्थितिसन्निधिकरणे द्वे पूजां विसर्जनं प्राहुः ॥ ५५

आदिमबीजाद् देव्याः सम्बोधनमेहि एहि संवौषट् ।
आह्वाननमिदममुना मन्त्रेण करोतु कुसुमाद्यैः ॥ ५६

तिष्ठद्वितयं टान्तद्वन्द्वं तु स्थितिकृतौ समारचतु ।
मम सन्निहिता भव भव वषडिति योज्यं च सन्निधीकरणे॥५७

पूजादीन् गृह्णयुगं नम इति पूजाविधानके तद्वत् ।
स्वस्थानं गच्छयुगं यस्त्रितयं त्वयि विसर्जनके ॥ ५८

पूरकरेचकयोगेऽमृतमाह्वानं विसर्जनं च तथा ।
पूजाभिमुखीकरणस्थापनसमये च कुम्भकं योगे ॥ ५९

मन्त्रो येषां यो यः स्यात् तेषां तेन तेन पूजादि ।
कर्मास्मिन् मण्डलके क्रमशः कार्यं ध्रुवं विधिना ॥ ६०

सञ्जप्य लक्षमेकं पुष्पैर्जात्यादिभिः सदा ब्रह्म ।
भूशय्यैककभोज्यः संस्नातो धौतसद्वस्त्रः ॥ ६१

सदशांशजापकुसुमैर्घृतमधुगुग्गुलसधूपको होमः ।
मन्त्रोच्चारान् नीचैर्दिक्पत्राम्भोजसमकुण्डे ॥ ६२

क्षीरद्रुममयसुसमित्प्रवर्द्धितानम्भकलवह्नौ ।
देयो निर्मलचित्तैर्मन्त्रिभिरत्यन्तकृतरक्षैः ॥ ६३

सत्येवं श्रीपद्मा प्रत्यक्षीभूय राज्यमतिविपुलम् ।
नानासिद्धिसमेतं ददाति नियतं क्षणादेव ॥ ६४

भूतोरगवेतालाः करालकङ्कालकालयोगिन्यः ।
उरलकसहजाद्यशुभास्त्रसन्ति तद्दृष्टिविक्षेपात् ॥ ६५

चिन्तितनार्याकृष्टिश्चिन्तितरिपुवर्गमारणोच्चाटम् ।
चिन्तितशान्तिक-पौष्टिकमिहापि वचनैर्भवेत् तस्य ॥ ६६

अनुदिनमतिभक्त्या मण्डलं यः स्वशक्त्या
द्विनवकुसुमषट्कैरर्चयेन्मासषट्कः ।
किमिह बहुभिरुक्तैः सारसीमाविरक्तैः
स्मरति यदपि कामं स्यात् करे तत् प्रकामम् ॥(मालिनी) ६७

## पात्रविधिलक्षणं पञ्चमं प्रकरणम् ॥ ५

(मालिनी)

श्रवणचरणचक्षुःपाणिनासाप्रशस्तं
द्वितयकुलविशुद्धं षट्कवर्षप्रमाणम् ।
सुरभिजलपवित्रं श्वेतसद्वस्त्रयुक्तं
कुसुममलयजाद्यैर्भूषि पात्रं प्रशस्तम् ॥ १

अतिशयितकुरूपं छिन्नकर्णादिरूपं
कुकुलमधमभावं रूक्षकान्तिप्रभावम् ।
अरुणगुलिकवस्त्रं गात्रदेशाङ्कसंस्थं
भवति हि तदपात्रं मण्डले दुष्टपात्रम् ॥ २

मलयजरसलिप्ते शुद्धपात्रस्य भाले
वदनपरिधि युक्त्या तत्त्वरेखात्रियुक्ते ।
चरण-युगलकाधो न्यस्यते तस्य यन्त्रं
विमलखटिकयैतत् सद्गुरुद्दिष्टयुक्त्या ॥ ३

त्रिवलितमदनान्तोऽधोमुखेन्दुप्रखण्ड-
विवरविहिततत्त्वं दिक्षु न्यस्तं तदेव ।

इति कृतवति पश्चान्नागवल्लीदलान्त-
र्लिखितविमलचूर्णाग्र्यादिमन्त्रेण युक्तम् ॥ ४

शुभसुरभितपूगं दीयते तस्य मन्त्रात्
तदनु जलशभास्यं मण्डलस्याग्रतःस्थम् ।
स्तुतिरचितसमूहैर्वर्ण्यते तत्र देवी
विहितविशदमुद्रा मन्त्रिणोच्चैर्यथावत् ॥ ५

(स्रग्धरा)

जैने पद्मावतीति त्वमशुभदलना त्वं च गौरीति शैवे
तारा बौद्धागमे त्वं प्रकृतिरिति मता देवि ! साङ्ख्यागमे त्वम् ।
गायत्री भट्टमार्गे त्वमसि च विमले कौलिके त्वं च वज्रा
व्याप्तं विश्वं त्वयेति स्फुरदुरुयशसे मेऽस्तु पद्मे ! नमस्ते ॥ ६

पातालं हुङ्कृतेन प्रबलबलयुजा देवि ! भित्त्वाशु पीत्वा ।
पीयूषं सप्तसप्तिप्रभवकरखरं क्ष्मातलं चेत्यमानः ।
ॐ आँ क्रोँ मन्त्रमूर्ते ! कुरु झटिति महाक्षुब्धदृप्तारिचक्रे !
सद्यः पात्रं सशोभं चटुलकरशिरःकेशपाशप्रचण्डे ॥ ७

चण्डी चण्डीशदंष्ट्राक्रकचसमलसत्क्रूरपाशक्षतारे !
तारे ! तारावतारे ! विदलितदितिजे ! देवि ! पद्मे ! सुपद्मे ! ।
ह्रीँ ऐँ क्लीं मन्त्ररूपे ! चलचपलकरे ! शीघ्रमेह्येहि दुर्गे !
दुष्टः कः स्थातुमग्रे तव भवतु वरे ! हुंहुकारं वहन्त्याः ॥ ८

ॐ ह्सौँकारान् सबिन्दौ द्रुतहृतविषमव्याधिबाधातिमुद्रे !
हुँ हुँ हुँ हुँ हुमष्टादशविविधमहादोषमुद्रां प्रहृत्य ।
श्रीपद्मे ! देवि ! वेगाद् वपुरमलमलं कम्पि कम्पि प्रकम्पे !
ह्रीँ ऐँ मातः सुरूपे ! परपरमगते ! भेदि भेदि प्रभद्रे ! ॥ ९

पातालं क्षोभयन्ती धरणितलमलं कम्पयन्ती सुवेगाद्
ब्रह्माण्डं स्फोटयन्ती जलधिजलचरध्वानरुद्रातिभीमम् ।
आगच्छागच्छ देवि ! द्रुतमतुलगुणे ! गौरी ! दुर्गे ! सुवर्गे ! ।
ह्रीँङ्कारान् भेदय द्राग् धगधगधमिते सार्द्धरोमत्रिकोटि ॥ १०

अव्यक्ते ! व्यक्तरूपे ! परमसुखकरे ! हंसपृष्ठाधिरूढे !
सोत्सेके ! निष्कलङ्के ! कलितकलिमले ! ध्वस्तमुद्रेऽस्ततन्द्रे ।
नित्ये ! ऽनित्ये ! सुरूपे ! कृतसमयमुखे ! भिन्दि भिन्दि प्रभिन्दि
क्लौँ दोषान् बन्ध बन्ध प्रवररवपरे ! देवि ! दुष्टान् समस्तान् ॥११

श्रीपद्मे ! देवी ! भीमे ! भवभयदलने ! क्रूरनेत्रे ! सुगात्रे !
सश्रीके ! कामरूपे ! परमतदमने ! रक्तनेत्रे ! त्रिनेत्रे ! ।
निःशङ्के ! क्रूरजिह्वे ! ररररमते ! ऽटट्टहासे ज्वलन्ती
ॐ ॐ मन्त्राणि दोषे दह दह दहने क्षोभय क्षोभय द्राक् ॥१२

रे रे रे रे क्व दोषा डरलकसहजा जाततूर्णं सदूरं
चण्डोऽयं बाहुदण्डः स्फुरति परमदद्रावणो वः पुरस्तात् ।
नो चेदुच्चैश्च चञ्चद् ययययययजाकारमुच्चार्य देवी
युष्मानेकाररूपा भृतभृकुटिघटा पश्यतैषा क्षणोति ॥ १३

भो ! भो ! कोटिङ्गयक्षा शुभविविधमरुद्व्यन्तरोच्छिष्टदैत्या
रक्षश्चण्डालचण्डग्रहगमनपयोभूमिगोत्रादिदेव्यः ।
दूराद् दूरं प्रदेशं भजत निजममुं बीजमादाय तूर्णं
नो चेत् घृत्खम्भमूर्ध्वं झटिति
पटुभटा स्थाष्णुमादाय वाध्वम् ॥ १४

एकैकं देवि ! बीजं तव मुहुरनयं विघ्नसङ्घातघाति
यो यः सद्बिन्दुभक्त्या स्मरति करं...सक्रमं व्यक्रमं वा ।

मातश्चारुच्चवीचीचलदुदधिलसद्झल्लरी... ...पत्रे
स्फूर्जच्छेषाहिदण्डे ससुरमहितः स्वर्णकुम्भायितश्रीः ॥ १५

श्रीमदिन्द्रनन्दिमन्त्रवादिविद्याचक्रवर्तिचूडामणि करी आज्ञा देवि !, गुरु तणी आज्ञा देवी !, परमगुरु तणी आज्ञा देवि !, भट्टारक श्री पार्श्वनाथ करी आज्ञा देवि !, सप्त पाताल फोडिउ, नव नागकुंडि अमृतपान करी आवियइ वेगिइ देवि !, देवि ! स्तम्भिनि !, देवि ! मोहिनि !, देवि ! दीपनि !, देवि ! दुष्टशोषकि!, देवि ! दोषनिर्दलनि !, देवि ! द्वादशादित्य करउ तेजु, अगण्यपुण्यदाक्षिण्यनैपुण्यनिधि ! देवि ! अविचलवाचा युधिष्ठिरि !, देवि ! जिनशासनोद्धारकि !, देवि ! भट्टारक श्रीपार्श्वनाथ भक्तानुभक्ति !, देवि ! कृपाकारकि !, देवि ! सुस्फुरि ! देवि ! प्रज्ञानिवहिकि, देवि ! ॐ आँ क्रौँ मन्त्रमूर्ते !, देवि ! पद्मावति !, ध्वनि ध्वनि कंपि कंपि ह्रौँकारेण गात्रं चालि चालि, बाहुं चालि चालि, शीर्षं चालि चालि, साङ्गोपाङ्गि हि चालि चालि, कटि कटि कम्पि कम्पि कम्पावय कम्पावय आवेशय आवेशय ह्सौँ मण्डलमध्ये प्रवेशय प्रवेशय यदिगत इन्द्रान् आणि आणि रुद्रलोकान् आणि आणि पातालात् आणि आणि ह्रौँ एँ अहूठ कोडि रोमराइ भेदि भेदि ।

तदनु सुरभिपुष्पैरक्षतैः सारधूपै-
रगुरुमलयजाद्यैर्मध्यमध्यं समन्त्रैः ।
इति कृतवति पश्चात् पृच्छ्यते स्वेष्टकार्यं
यदपि वदति वाक्यं तद् भवत्येव सत्यम् ॥ १६

विविधमन्त्रविदः कृतरक्षकाः
प्रविदधत्यति ये किल मन्त्रिणः ।

प्रवरदेव्यवतारविधिक्रमं
भुवि त एव मुदं प्रवहन्त्यलम् ॥ १७

## दोषलक्षणं षष्ठं प्रकरणम् ॥ ६

(शार्दूलविक्रीडित)

हूँकारं प्रणवद्वयेन पुटितं तन्नामगर्भं बहि-
र्वेष्ट्यं षोडशभिः कलाभिरभितो भिन्नं च वज्राष्टभिः ।
तत्प्रान्तः क्षह भाममान्तरशषाल्लूयूंयुतास्तत्पुर-
श्चेत्येतत् सकलं त्रिमुष्टिकुशतः कांस्ये न्यसेच्चन्दनैः ॥ १

ॐ ह्रीँ श्रींवदने नमस्तु निधने ! मध्ये तथाऽर्हत्कलि-
कुण्डस्वामिन एष मन्त्र उदितो जप्त्वा शतं कौसुमम् ।
भूतप्रेतपिशाचशाकिनिपरिच्छेदः प्रसूतिः स्त्रियः
स्याद् दृष्टे कलिकुण्डदण्डपटले शान्त्यादि कार्यं पुनः ॥ २

मान्तं पिण्डमधः खकुक्षिषु गतं नाम्नः कलावेष्टितं
ह्रींक्रौँमाद्यवसानरेखि लिखितं भूर्ये त्रिधा वेष्टनात् ।
दोषालं शिलयाथ पीतकुसुमैरों ग्लौँ ठ एवं शतं
जप्त्वैतत् शिलया सिहारिकभयप्रध्वंसि खे भारितम् ॥ ३

रररररराग्नेः सत्पुरान्तःस्थ हूँ क्ष्मूँ
त्रिकटनिधनवर्णे भित्तिन्यस्ते समस्ते ।
शुभसुरभिभिरर्चाभाजिते यत्र तत्र
न भवति भयमुच्चैः सिद्धहार्यास्तदादि ॥ (मालिनी) ४

रेखासप्तविपाटितान्तररवे रेखाष्टभिर्भेदितं
दुष्टं टान्तयुगं बहिः सुविधिना तेजोऽष्टधा प्रान्तरे ।

तन्मूर्ध्न्यग्निरसानभोजलमरुन्मान्तत्रिठः पञ्च हुं
फट् स्वाहाक्रमतो हिमादिखटिकाभूर्जस्थयन्त्रं कुरु ॥ ५

धवलसुरभिपुष्पैर्ध्यानयुक्तोऽपि यस्तु
द्विनवकरससङ्ख्यैरर्चयेद् यत्र तत्र ।
भवति हि परमुद्राच्छेद आश्वेव तस्य
यदि नहि पचिभेदः शान्तये स्यात् तदा तत् ॥ (मालिनी) ६

ॐ क्षिहा प स्वाहा यः यः यः ठः ठः ठः
स्फ्राँ स्फ्रीँ स्फ्रुँ स्फ्रोँ स्फ्रौँ स्फ्रः हुं फडित्याम्नायः ।

अन्यत्रैवमियं विद्या गतिगर्भादिकीलने ।
गन्धदीपप्रसूनादिपूजिता सन्नियोजयेत् ॥ (अनुष्टुप्) ७

ऊर्ध्वाधो रयुतं जकारसहितं झलं (क्ष्लं) कारबीजं लिखे-
दोँ ह्रीं ग्रामथ हूँ फडग्निपुटके नाम्ना युतं तद्बहिः ।
संन्यस्तं वसुवायुमण्डलगतं कुण्डेऽथवा पट्टके
पश्यन्तं नरमश्वगन्धयवकैर्मन्त्रेण चात्रोटयेत् ॥ ८

मन्त्रः-
ॐ हूँ सः वं क्षः क्ष्म्ल्व्र्यूँ ह्रो ह्राँ ग्राँ हुँ फट् ॐ स्वोँ झ्राँ झ्रौँ
शाकिनीनां निग्रहं कुरु कुरु हुं फट् ॥ ९

सत्येवं प्रलयं यान्ति शाकिनीभूतराक्षसाः ।
भूर्जस्थयन्त्रं रक्षेयं हन्ति तां कुङ्कुमादिभिः ॥ (अनुष्टुप्) १०

पुष्पाणि गुग्गुलं वापि क्रममन्त्रेण मन्त्रिणा ।
दोषस्य पुरतः पूर्वं वह्निना सम्प्रदर्श्यते ॥ (अनुष्टुप्) ११

तत्परिमलमाघ्राय शाकिन्याद्यास्त्रसन्त्यलम् ।
मुक्ता तदेव पात्रं च यान्ति ते दोषसङ्कराः ॥ १२

क्ष्ल्वींफट् लींफट् श्रींफट् क्लौंफट् झूँफट् हूँफट् क्षूँफट्
स्वाहा । पुष्पमन्त्रः ॥ १३

ॐ त्राँ त्राँ त्राँ त्राँ त्राँ झ्राँ झ्राँ झ्रीं झ्रीं झ्रीं हं हं हूँ हूँ हूँ
रौ रौ रौ सः सः गुग्गुलमन्त्रः ॥ १४

निखिलमथ विधानं पूर्ववद् दोषपात्रे
त्वरुणकुसुममालाक्षेप एव प्रभेदः ।
तदनु वधनभेदाद्यत्र कार्यं हि कार्यं
निजकनिजकमन्त्राच्चेति सर्वं तथेति ॥ (मालिनी) १५

झूँ झूँ झूँ झूँ झूँ झूँ झूँ झूँ झूँ । शस्त्रिकाघातः ।

बापुलाजाल चलसि महिकाल एति गल तोडि, दहि सुहि गांठि बोडि, थां गां था तोडि, जेण समुद्र पगारिआ अगुरु किलकिलाइ उक्खिल्लि हनुमन्त ! प्रचण्ड दांडीक पाणि ! नास्ति दोसु नास्ति दश य दिशि बांधि बांधि आपणा पायतलि घालि हनुमन्त ! प्रचंड दांडीकपाणि ! बांधि बांधि जः जः जः आँ अघोराय नमः रौं फट् स्वाहा । इति बन्धमन्त्रः ।

ॐ ह्रीँ छिन्दि छिन्दि भिन्दि भिन्दि माणिभद्र चेटकमाकर्षय आकर्षय मारय मारय चूरय चूरय हूँ फट् स्वाहा । दोषपात्रावतार–परविद्याच्छेदनमन्त्रः ।

ॐनमो भगवते पार्श्वनाथाय पद्मावतीसहिताय धरणोरगेन्द्रनमस्कृताय सर्वोपद्रवविनाशनाय परविद्याच्छेदनाय

परमन्त्रप्रणाशनाय सर्वदोषनिर्दलनाय आकाशान् बन्ध बन्ध, पातालान् बन्ध बन्ध, देवान् बन्ध बन्ध, दैत्यान् बन्ध बन्ध, गणान् बन्ध बन्ध, कल्मलग्रहान् बन्ध बन्ध, उच्छिष्टग्रहान् बन्ध बन्ध, चण्डालग्रहान् बन्ध बन्ध, भगवन् ! क्षेत्रपाल ! ग्रामं बन्ध बन्ध, यक्षान् बन्ध बन्ध, राक्षसान् बन्ध बन्ध, शाकिनीं बन्ध बन्ध, डाकिनीं बन्ध बन्ध, लाकिनीं बन्ध बन्ध, जाकिनीं बन्ध बन्ध, गृहीतमुक्तकां बन्ध बन्ध, दिव्ययोगिनीं बन्ध बन्ध, वज्रयोगिनीं बन्ध बन्ध, खेचरीं बन्ध बन्ध, भूचरीं बन्ध बन्ध, नागान् बन्ध बन्ध, वर्णराक्षसान् बन्ध बन्ध, झोटिंगान् बन्ध बन्ध, मुद्गरग्रहान् बन्ध बन्ध, व्यन्तरग्रहान् बन्ध बन्ध, आकाशदेवीं बन्ध बन्ध, जलदेवीं बन्ध बन्ध, स्थलदेवीं बन्ध बन्ध, गोत्रदेवीं बन्ध बन्ध, एकाहिक-द्व्याहिक-त्र्याहिक-चातुर्थिक-नित्यज्वर-रात्रिज्वर-सर्वज्वर-मध्याह्नज्वर-वेलाज्वर-वातिक-पैत्तिक-श्लेष्मिक-सान्निपातिक-सर्वदोष-देवकृत-मानवकृत-यन्त्रकृत-कार्मणकृत उच्छेदय उच्छेदय, विस्फोटय विस्फोटय, सर्वदोषान् सर्वभूतान् हन हन, दह दह, पच पच, भस्मी कुरु कुरु ।

॥ मालामन्त्रः ॥

अथवा-

ॐनमो भगवते हनुमन्ताय कपिललोचनवज्राङ्गमुष्टे । उदधिलङ्घन-लङ्कापुरीदहनदीपन-मथन । सुग्रीवसैन्यभूषण ! अञ्जनासुत ! सर्वोपकारिन् ! बालब्रह्मचारिन् ! आकाशान् बन्ध बन्ध, इत्यादि पूर्ववदयं मालामन्त्रः । यथोक्तश्च ।

तथा मालामभिमन्त्र्य दोषपात्रे क्षेपकश्चेति ।

ॐ नमो भगवते पार्श्वनाथाय दुष्टान्तकमठकरि-कुम्भनिशुम्भनोत्तालकलकण्ठीरवाय गरीष्ठदुष्टाष्टकर्मकाष्ठ-निष्ठापनहुताशनवरिष्ठाय असारसंसारपारावारोत्तारणतरण्डाय चतुस्त्रिंशदतिशयालङ्कृतगात्राय तच्चरणसरोजाश्रयविशारदे ! देवि ! विदलिताशेषशत्रुसमुदये ! पद्मवदने ! पद्मे ! सपद्मे हंसपृष्ठाधिरूढे ! फलवरदपाशकाङ्कुशचतुर्भुजे ! देवि ! भैरवे ! भैरवरुपावतारे ! तारे ! तारावतारे ! देवि ! रौद्रे ! रौद्रलोचनावतारे ! कालव्यालवेतालकरालकङ्कालभूतप्रेतपिशाचयक्षराक्षसगण-गन्धर्वकिन्नरोरगेन्द्रग्रहनिग्रहैकोद्यतभुजे ! भीमे ! भीमाट्टहास-भीषितानन्तबलद्विपञ्चाशत्क्षेत्रपालचण्ड-चतुरशीतिचेटकोद्भट-विकटसार्द्धद्विकोटिभूतावलिमानमुद्रे भद्रे ! भद्रावतारे ! भद्रमूर्ते ! निर्दलिताशेषतन्द्रे ! जय जय जयोद्यते ! देवि ! विकटहुङ्कार-विपाटितसप्तपातालच्छदने ! खण्डितचतुःषष्टियोगिनी-सुदृढमुद्रातिवर्गे ! नवनागकुण्डअमृतपानोत्साहोच्छेक-प्रकम्पिताशेषब्रह्माण्डोदरे ! तत्कालोच्छलितज्वलज्ज्वलित-कलकलितनिखिलसलिलनिधिचलचपलमकरमत्स्यक-च्छपप्रभृतिव्याकुलानन्तसत्त्वघोरारवस्फुटद्गगनाभोगभागे ! स्फारफुत्कारदारुणत्रिफणाहिविषमविषज्वालानिर्दग्धहिंस्राहङ्कारे ! देवि ! गुणवति ! पद्मावति ! दुःखसागरोत्तारणि ! सर्वदुरिताप-हारिणि ! यमजिह्वाकरालरूपधारिणि ! चिन्तितचिन्तामणि ! अरुणे ! अमरे ! अमरावतारे ! अकले ! सकले ! निष्कले ! निर्मले ! देवि ! अजिते ! अपराजिते ! ए ऐंकारमूर्ते ! स्वर्ग-मर्त्य-पातालविवरवर्तिनो दुष्टातिदुष्टान् पुंस्त्रीविभेदान् दोषान् वच्छूकारशब्देन देवि ! पात्रेऽवतारय अवतारय भारसहस्र-शृङ्खलाबन्धेनात्मपादतले क्षेपय क्षेपय लोलय लोलय घूर्मय

घूर्मय चालय चालय क्षोभय क्षोभय आँ क्रौँ ह्रींकाररूपे ! देवि ! श्रीमति ! पद्मावति ! ऐंक्लैंकारसबले ! घोलय घोलय दोलय दोलय उच्छलय उच्छलय लोटय लोटय वज्रमयसूच्या नेत्राणि स्फोटय स्फोटय अङ्कुशेनान्तराले सहस्रधा त्रोटय त्रोटय नागपाशेन सर्वाङ्गं मोटय मोटय भञ्जय भञ्जय ॐ ज्वालाजिह्वाकराले ! ररररर मूर्ते ! सर्वाङ्गं दह दह सर्वधातून् क्षोभतां नय नय परमुद्रां त्रोटय त्रोटय आत्ममुद्रां देहि देहि ह्सौँकारेण देवि ! मनोवाञ्छितं कार्यं कुरु कुरु, डाकिनीजाकिनीकन्दकुद्दालिनि ! राकिनी-लाकिनी-मानमर्दनि! हाकिनीजाकिनीकुलोच्छेदिनि ! ह्रीं जय जय ॥ यथोक्तमन्त्रः ।

द्विकचान्तरातहादिमझाद्यदिशिरकहकूटयुताः ।
ॐ अःयुक्ताः क्रमशः स्थाप्या दिग्वर्गयन्त्रेऽथ ॥
तत्परितो वह्निपुरं ह्रौँक्रोमाद्यन्तरेखया वेष्ट्यम् ।
एतत्सकटिकनिहितं दोषच्छेदाय हूतये मन्त्रान् ॥

मन्त्रः-

ॐ नमो रुद्राय वानरराजाय हन हन दह दह मथ मथ बन्ध बन्ध भूतल भूतल ह्रीँ हूँ हूँ हूँ हे हे हे ह ह काटय काटय मद मद मोचय मोचय अबन्धप्रहे चक्रे ! चाटुवास्वले वाहर वाहर स्वाहा । मन्त्रितमालाया दोषाकृष्टिः .

अथवा-

सुदर्शनतो मन्त्राद् विदधातु चित्तमनुकृत्यम् ।
येन स्मरणविधिना कृत्याकृत्यं हि हस्तगतम् ॥

हीहोरीसणरीसो अदमदपुरिसो डगमगचरितो । उठी दक्षिणदिशाइं महादिव किलिकिलिशब्दं झङ्कारूपि अहमदचक्रि छिन्नि

मदासणि छिन्नि अहमदसामिणि छिन्नि छिन्नि, कावाडङ्की छिन्नि छिन्नि होही होरी सणसो विसनासण हरि च्छिन्नि सुदरिसण ॥

त्रिसन्ध्यमाराध्य सुरक्तपुष्पैः
सप्तैव सप्तैव दिने दिने (?) यावद्
दिनानि भवन्ति भवन्ति सप्त
सिद्धो भवेत् सर्वकार्यकरस्तथायम् ॥

कविशेखरश्री मल्लिषेणसूरिविरचितः

## ५०. ॥ श्रीभैरवपद्मावतीकल्पः ॥

### प्रथमो मन्त्रिलक्षणाधिकारः

कमठोपसर्गदलनं त्रिभुवननाथं प्रणम्य पार्श्वजिनम् ।
वक्ष्येऽभीष्टफलप्रद-भैरवपद्मावतीकल्पम् ॥ १

पाशफलवरदगजवशकरणकरा पद्मविष्टरा पद्मा ।
सा मां रक्षतु देवी त्रिलोचना रक्तपुष्पाभा ॥ २

तोतला त्वरिता नित्या त्रिपुरा कामसाधिनी ।
देव्या नामानि पद्मायास्तथा त्रिपुरभैरवी ॥ ३

आदौ साधकलक्षणं सुसकलीं देव्यर्चनायाः क्रमं
पश्चाद् द्वादशयन्त्रभेदकथनं स्तम्भोऽङ्गनाकर्षणम् ।
यन्त्रं वश्यकरं निमित्तमपरं वश्यौषधं गारुडं
वक्ष्येऽहं क्रमशो यथा निगदिताः कल्पेऽधिकारास्तथा ॥ ४

इति दशविधाधिकारैर्ललितार्याश्लोकगीतिसद्वृत्तैः ।
विरचयति मल्लिषेणः कल्पं पद्मावतीदेव्याः ॥ ५

निर्जितमदनाटोपः प्रशमितकोपो विमुक्तविकथालापः ।
देव्यर्चनानुरक्तो जिनपदभक्तो भवेन्मन्त्री ॥ ६

मन्त्राराधनशूरः पापविदूरो गुणेन गम्भीरः ।
मौनी महाभिमानी मन्त्री स्यादीदृशः पुरुषः ॥ ७

गुरुजनहितोपदेशो गततन्द्रो निद्रया परित्यक्तः ।
परिमितभोजनशीलः स स्यादाराधको देव्याः ॥ ८

निर्जितविषयकषायो धर्मामृतजनितहर्षगतकायः ।
गुरुतरगुणसम्पूर्णः स भवेदाराधको देव्याः ॥ ९

शुचिः प्रसन्नो गुरुदेवभक्तो दृढव्रतः सत्यदयासमेतः ।
दक्षः पटुर्बीजपदावधारी मन्त्री भवेदीदृश एव लोके ॥ १०
(उपजाति)

एते गुणा यस्य न सन्ति पुंसः
क्वचित् कदाचिन्न भवेत् स मन्त्री ।
करोति चेद्दर्पवशात् स जाप्यं
प्राप्नोत्यनर्थं फणिशेखरायाः ॥ (उपजाति) ११

## द्वितीयः सकलीकरणपरिच्छेदः

स्नात्वा पूर्वं मन्त्री प्रक्षालितरक्तवस्त्रपरिधानः ।
सम्मार्जितप्रदेशे स्थित्वा सकलीक्रियां कुर्यात् ॥ १

ह्राँ वामकराङ्गुष्ठे तर्जन्यां ह्रीँ च मध्यमायां ह्रूँ ।
ह्रौँ पुनरनामिकायां कनिष्ठिकायां च ह्रः सुस्यात् ॥ २

पञ्चनमस्कारपदैः प्रत्येकं प्रणवपूर्वहोमान्त्यैः ।
पूर्वोक्तपञ्चशून्यैः परमेष्ठिपदाग्रविन्यस्तैः ॥ ३

शीर्षं वदनं हृदयं नाभिं पादौ च रक्ष रक्षेति ।
कुर्यादेतैर्मन्त्री प्रतिदिवसं स्वाङ्गविन्यासम् ॥ (कुलकम्) ४

द्विचतुःषष्ठचतुर्दशकलाभिरन्त्यस्वरेण बिन्दुयुतैः ।
कूटैर्दिग्विन्यस्तैर्दिशासु दिग्बन्धनं कुर्यात् ॥ ५

हेममयं प्राकारं चतुरस्रं चिन्तयेत् समुत्तुङ्गम् ।
विंशतिहस्तं मन्त्री सर्वस्वरसंयुतैः शून्यैः ॥ ६

सर्वस्वरसम्पूर्णैः कूटैरपि खातिकाकृतिं ध्यायेत् ।
निर्मलजलपरिपूर्णामतिभीषणजलचराकीर्णाम् ॥ ७

ज्वलदोङ्काररकारज्वालादग्धं स्वमग्निपुरसंस्थम् ।
ध्यात्वाऽमृतमन्त्रेण स्नानं पश्चात् करोत्वमुना ॥ ८

निजोत्तमाङ्गामरभूधराग्रे संस्नापितः पार्श्वजिनेन्द्रचन्द्रः ।
क्षीराब्धिदुग्धेन सुरेन्द्रवृन्दैः स्वं चिन्तयेत् तज्जलशुद्धगात्रम्॥९

भूतग्रहशाकिन्यो ध्यानेनानेन नोपसर्पन्ति ।
अपहरति पूर्वसञ्चितमपि दुरितं त्वरितमेवेह ॥ १०

पर्यङ्कासनसंस्थः समीपतरवर्तिपूजनद्रव्यः ।
दिग्वनितानां तिलकं स्वस्य च कुर्यात् सुचन्दनतः ॥ ११

पन्नगाधिपशेखरां विपुलारुणाम्बुजविष्टरां
कुर्कुटोरगवाहनामरुणप्रभां कमलाननाम् ।
त्र्यम्बकां वरदाङ्कुशायतपाशदिव्यफलाङ्कितां
चिन्तयेत् कमलावतीं जपतां सतां फलदायिनीम् ॥ १२

परिज्ञायांशकं पूर्वं साध्यसाधकयोरपि ।
मन्त्रं निवेदयेत् प्राज्ञो व्यर्थं तत्फलमन्यथा ॥ १३

साध्यसाधकयोर्नामानुस्वारव्यञ्जनस्वरम् ।
पृथक् कृत्वा क्रमात् स्थाप्यमूर्ध्वाधःप्रविभागतः ॥ १४

साध्यनामाक्षरं गण्यं साधकाह्वयवर्णतः ।
नपुंसकं परित्यज्य कुर्यात् तद् वेदभाजितम् ॥ १५

आयो भागोद्धरितं तं चाद्यं स्थापयेत् क्रमाद् धीमान् ।
एकद्वित्रिचतुर्वर्णान् सिद्धं साध्यं सुसिद्धमरिः ॥ १६

सिद्धसुसिद्धं ग्राह्यं साध्यं शत्रुं च वर्जयेद् धीमान् ।
सिद्धसुसिद्धे फलदे विफलं साध्ये रिपौ वाऽऽये ॥ १७

फलदं कतिपयदिवसैः सिद्धं चेत् साध्यमपि दिनैर्बहुभिः ।
झटिति फलदं सुसिद्धं प्राणार्थविनाशनः शत्रुः ॥ १८

आदावन्ते शत्रुर्यदि भवति तदा परित्यजेन्मन्त्रम् ।
स्थानत्रितये शत्रुर्मृत्युः स्यात् कार्यहानिर्वा ॥ १९

शत्रूर्भवति यदाऽऽदौ मध्ये सिद्धं तदन्तगं साध्यम् ।
कष्टेन भवति महता स्वल्पफलं चेति कथनीयम् ॥ २०

अन्ते यदि भवति रिपुः प्रथमे मध्ये च सिद्धयुगपतनम् ।
कार्यं यदादिजातं तन्नश्यति सर्वमेवान्ते ॥ २१

सिद्धं सुसिद्धमथवा रिपुणाऽन्तरितं निरीक्ष्यते यत्र ।
दुःखापायप्रबलं भवतीति विवर्जयेत् कार्यम् ॥ २२

## तृतीयो देव्यर्चनाक्रमपरिच्छेदः ।

दीपन-पल्लव-सम्पुट-रोध-ग्रथना-विदर्भणैः कुर्यात् ।
शान्ति-द्वेष-वशीकृत-बन्ध-स्त्र्याकृष्टि-संस्तम्भम् ॥ १

आदौ नामनिवेशो दीपनमन्ते च पल्लवो ज्ञेयः ।
तन्मध्यगतं सम्पुटमथादिमध्यान्तगो रोधः ॥ २

ग्रथनं वर्णान्तरितं द्व्यक्षरमध्यस्थितो विदर्भः स्यात् ।
षट्कर्मकरणमेतज् ज्ञात्वाऽनुष्ठानमाचरेन्मन्त्री ॥ ३

दिक्कालमुद्रासनपल्लवानां भेदं परिज्ञाय जपेत् स तन्त्री ।
न चान्यथा सिध्यति तस्य मन्त्रं
कुर्वन् सदा तिष्ठतु जाप्यहोमम् ॥ ४

वश्याकृष्टिस्तम्भननिषेधविद्वेषचलनशान्तिकं पुष्टिम् ।
कुर्यात् सोमयमामरहराग्निमरुदब्धिनिर्ऋतिदिग्वदनः ॥ ५

पूर्वाह्णे वश्यकर्माणि मध्याह्ने प्रीतिनाशनम् ।
उच्चाटनं पराह्णे च सन्ध्यायां प्रतिषेधकृत् ॥ ६

शान्तिकर्मार्धरात्रे च प्रभाते पौष्टिकं तथा ।
वश्यं मुक्त्वाऽन्यकर्माणि सव्यहस्तेन योजयेत् ॥ ७

अङ्कुश-सरोज-बोध-प्रवाल-सच्छङ्ख-वज्रमुद्राः स्युः ।
आकृष्टि-वश्य-शान्तिक-विद्वेषण-रोध-वधसमये ॥ ८

दण्डस्वस्तिकपङ्कजकुक्कुटकुलिशोच्चभद्रपीठानि ।
उदयार्करक्तशशधरधूमहरिद्रासिता वर्णाः ॥ ९

विद्वेषणाकर्षणचालनेषु हुं वौषडन्तं फडिति प्रयोज्यम् ।
वश्ये वषड् वैरिवधे च घे घे
स्वाहा स्वधा शान्तिकपौष्टिके च ॥ १०

स्फटिकप्रवालमुक्ताफलचामीकरपुत्रजीवकृतमणिभिः ।
अष्टोत्तरशतजाप्यं शान्त्याद्यर्थे करोतु बुधः ॥ ११

मोक्षाभिचारशान्तिकवश्याकर्षेषु योजयेत् क्रमशः ।
अङ्गुष्ठाद्यङ्गुलिका मणयोऽङ्गुष्ठेन चाल्यन्ते ॥ १२

चतुरस्त्रं विस्तीर्णं रेखात्रयसंयुतं चतुर्दारम् ।
विलिखेत् सुरभिद्रव्यैर्यन्त्रमिदं हेमलेखन्या ॥ १३

धरणेन्द्राय नमोऽधच्छदनाय नमस्तथोर्ध्वछदनाय ।
पद्मच्छदनाय नमो मन्त्रान् वेदादिमायाद्यान् ॥ १४

प्रविलिख्यैतान् क्रमशः पूर्वादिद्वारपीठरक्षार्थम् ।
दश दिक्पालान् विलिखेदिन्द्रादीन् प्रथमरेखान्ते ॥ १५

लरशषवयसहवर्णान् सबिन्दुकानष्टदिक्पतिसमेतान् ।
प्रणवादिनमोऽन्तगतानोँह्रीमधोर्ध्वच्छदनसञ्ज्ञे च ॥ १६

दिक्षु विदिक्षु क्रमशो जयादि-जम्भादिदेवता विलिखेत् ।
प्रणवत्रिमूर्तिपूर्वा नमोऽन्तगा मध्यरेखान्ते ॥ १७

आद्या जया च विजया तथाऽजिता चापराजिता देव्यः ।
जम्भामोहास्तम्भास्तम्भिन्यो देवता एताः ॥ १८

तन्मध्येऽष्टदलाम्भोजमनङ्गकमलाभिधाम् ।
विलिखेच्च पद्मगन्धां पद्मास्यां पद्ममालिकाम् ॥ १९

मदनोन्मादिनीं पश्चात् कामोद्दीपनसञ्ज्ञिकाम् ।
संलिखेत् पद्मवर्णाख्यां त्रैलोक्यक्षोभिणीं ततः ॥ २०

तेजोह्रीँकारपूर्वोक्ता नमःशद्वावसानगाः ।
अकारादिहकारान्तान् केशरेषु नियोजयेत् ॥ (अनष्टुप्) २१

भक्तियुतो भुवनेशश्चतुःकलायुतं कूटमथ देव्याः ।
वर्णचतुष्कनमोऽन्तं स्थाप्याः प्राच्यादिदिक्षु पद्मबहिः ॥ २२

एतत् पद्मावतीदेव्या भवेच्चक्रचतुष्टयम् ।
पञ्चोपचारतः पूजां नित्यमस्याः करोत्विति ॥ (अनष्टुप्) २३

आह्वानं स्थापनं देव्याः सन्निधीकरणं तथा ।
पूजां विसर्जनं प्राहुर्बुधाः पञ्चोपचारकम् ॥ २४

ॐ ह्रीँ नमोऽस्तु भगवति ! पद्मावती ! एहि एहि सं वौषट् ।
कुर्यादमुना मन्त्रेणाह्वानमनुस्मरन् देवीम् ॥ २५

तिष्ठद्वितयं ठान्तद्वयं च संयोजयेत् स्थितीकरणे ।
सन्निहिता भवशब्दं मम वषडिति सन्निधीकरणे ॥ २६

गन्धादीन् गृह्ण गृह्णेति नमः पूजाविधानके ।
स्वस्थानं गच्छ गच्छेति जस्त्रिः स्यात् तद्विसर्जने ॥(अनु.) २७

पूरकरेचकयोगादाह्वानविसर्जनं करोतु बुधः ।
पूजाभिमुखीकरण-स्थापनकर्माणि कुम्भकतः ॥ २८

ब्रह्मादि लोकनाथं हूँकारं व्योम षान्तमदनोपेतम् ।
पद्मे च पद्मकटिनि ! नमोऽन्तगो मूलमन्त्रोऽयम् ॥ २९

सिध्यति पद्मादेवी त्रिलक्षजाप्येन पद्मपुष्पाणाम् ।
अथवाऽरूणकरवीरकसवृन्तपुष्पप्रजाप्येन ॥ ३०

ब्रह्म माया च ह्रैँकारं व्योम क्लौँकारमूर्धगम् ।
श्रीँ च पद्मे ! नमो मन्त्रं प्राहुर्विद्यां षडक्षरीम् ॥(अनष्टुप्) ३१

वाग्भवं चित्तनाथं च ह्रौँकारं षान्तमूर्धगम् ।
बिन्दुद्वययुतं प्राहुर्विबुधास्त्र्यक्षरीमिमाम् ॥ (अनष्टुप्) ३२

वर्णान्तः पार्श्वजिनो यो रेफस्तलगतः स धरणेन्द्रः ।
तुर्यस्वरः सबिन्दुः स भवेत् पद्मावतीसञ्ज्ञः ॥ ३३

त्रिभुवनजनमोहकरी विद्येयं प्रणवपूर्वनमनान्ता ।
एकाक्षरीति सञ्ज्ञा जपतः फलदायिनी नित्यम् ॥ ३४

तत्त्वावृतं नाम विलिख्य पत्रे तद्धोमकुण्डे निखनेत् त्रिकोणे ।
स्मरेषुभिः पञ्चभिराभिवेष्ट्य बाह्ये पुनर्लोकपतिप्रवेष्ट्यम् ॥३५

मधुरत्रिकसम्मिश्रितगुग्गुलकृतचणकमात्रवटिकानाम् ।
त्रिंशत्सहस्रहोमात् सिध्यति पद्मावती देवी ॥ ३६

मन्त्रस्यान्ते नमःशब्दं देवताराधनाविधौ ।
तदन्ते होमकाले तु स्वाहाशब्दं नियोजयेत् ॥ (अनष्टुप्) ३७

दशलक्षजाप्यहोमात् प्रत्यक्षो भवति पार्श्वयक्षोऽसौ ।
न्यग्रोधमूलवासी श्यामाङ्गस्त्रिनयनो नूनम् ॥ ३८

निजसैन्यैर्मायामयसमुच्छ्रितैर्वैरिलोकमग्रस्थम् ।
विमुखीकरोति यक्षः सङ्ग्रामे निमिषमात्रेण ॥ ३९

सान्तं बिन्दूर्ध्वरेफं बहिरपि विलिखेदायताष्टाब्जपत्रं
दिक्ष्वैँ श्रीँ ह्रीँ स्मरेशो गजवशकरणं ह्रौँ तथा ब्लैँ पुनर्यूँ ।
बाह्ये ह्रीमोँ नमोऽर्हं दिशि लिखितचतुर्बीजकं होमयुक्तं
मुक्तिश्रीवल्लभोऽसौ भुवनमपि वशं जायते पूजयेद् यः ॥ ४०
(स्रग्धरा)

## चतुर्थो द्वादशरञ्जिकामन्त्रोद्धारपरिच्छेदः ।

द्वादशपत्राम्बुरुहं मलवरयूङ्कारसंयुतं कूटम् ।
तन्मध्ये नामयुतं विलिखेत् क्लौँकारसंरुद्धम् ॥ १

विलिखेज्जयादिदेवीः स्वाहान्तौँकारपूर्विका दिक्षु ।
झभमहपिण्डोपेता विदिक्षु जम्भादिकास्तद्वत् ॥ २

उद्धरितदलेषु ततो मकरध्वजबीजमालिखेच्चतुर्षु ।
गजवशकरणनिरुद्धं कुर्यात् त्रिर्मायया वेष्ट्यम् ॥ ३

भूर्ये सुरभिद्रव्यैर्विलिख्य परिवेष्ट्य रक्तसूत्रेण ।
निक्षिप्य सुल्वभाण्डे मधुपूर्णे मोहयत्यबलाम् ॥ ४

स्त्रीकपाले लिखेद् यन्त्रं क्लौँस्थाने भुवनाधिपम् ।
त्रिसन्ध्यं तापयेद् रामाकृष्टिः स्यात् खदिराग्निना ॥ ५

(अनष्टुप्)

मायास्थाने च हुङ्कारं विलिखेन्नरचर्मणि ।
तापयेत् क्ष्वेडरक्ताभ्यां पक्षाहात् प्रतिषेधकृत् ॥ ६

हुंस्थाने मान्तमालिख्य सरेफं नामसंयुतम् ।
बिभीतफलके यन्त्रं द्वयोरपि च मर्त्ययोः ॥ ७

वाजिमाहिषकेशैश्च विपरीतमुखस्थयोः ।
आवेष्ट्य स्थापयेद् भूम्यां विद्वेषं कुरुते तयोः ॥ ८

पूर्वोक्ताक्षरसंस्थाने लेखिन्या काकपक्षया ।
मान्तं विसर्गसंयुक्तं प्रेताङ्गारविषारुणैः ॥ ९

घूकारिविष्ठासंयुक्तैः ध्वजयन्त्रं सनामकम् ।
लिखित्वोपरि वृक्षाणां बद्धमुच्चाटनं रिपोः ॥ १०

शृङ्गीगरलरक्ताभ्यां नृकपालपुटे लिखेत् ।
प्रेतास्थिजातलेखिन्या यः स्थाने तु नभोऽक्षरम् ॥ ११

श्मशाने निखनेद् रोषात् कृत्वा तद् भस्मपूरितम् ।
करोति तत्कुलोच्चाटं वैरिणां सप्तरात्रतः ॥ १२

फडक्षरं नभःस्थाने श्मशानस्थितकर्पटे ।
निम्बार्कजरसेनैतद् विलिखेत् क्रुद्धचेतसा ॥ १३

श्मशाने निक्षिपेद् यन्त्रं यावत् तद् भूवि तिष्ठति ।
परिभ्राम्यत्यसौ तावद् वैरी काक इव क्षितौ ॥ १४

फटस्थाने लिखेद् भान्तं भूर्ये तन्नामसंयुतम् ।
विषोपयुक्तरक्तेन नीलसूत्रेण वेष्टितम् ॥ १५

मृत्पुत्रिकोदरे स्थाप्यं तच् श्मशाने निवेशयेत् ।
सप्ताहाज्जायते शत्रोश्छेदभेदादिनिग्रहः ॥ १६

तुर्यस्वरं लिखेद् विद्वान् मस्थाने नामसंयुतम् ।
कुङ्कुमागरुकर्पूरैर्भूर्ये रोचनयाऽन्वितैः ॥ १७

सुवर्णमठितं कृत्वा बाहौ वा धारयेद् गले ।
करोतीदं सदा यन्त्रं तरुणीजनमोहनम् ॥ १८

वषड्वर्णयुतं कूटं लिखेदीकारधामनि ।
भूर्यपत्रे सितेऽत्यन्ते रोचनाकुङ्कुमादिभिः ॥ १९

त्रिलोहवेष्टितं कृत्वा बाहौ कण्ठे च धारयेत् ।
स्त्रीसौभाग्यकरं यन्त्रं स्त्रीणां चेतोऽभिरञ्जकम् ॥ २०

क्षाद्यक्षरपदे योज्यं लं शिलातलसम्पुटे ।
विलिख्योर्वीपुरं बाह्ये स्तम्भने तालकादिभिः ॥ २१

अथ पञ्चमः क्रोधादिस्तम्भनयन्त्रपरिच्छेदः ।

क्षमठसहपलववर्णान् मलवरयूङ्कारसंयुतान् विलिखेत् ।
अष्टदलेषु क्रमशो नाम ग्लौं कर्णिकामध्ये ॥ १

मन्त्राभ्यामावेष्ट्य बाह्ये भूमण्डलेन संवेष्ट्य ।
कुङ्कुमहरितालाद्यैर्विलिखेदात्मेप्सितस्तम्भः ॥ २

त्रींकारं चिन्तयेद् वक्त्रे विवादे प्रतिवादिनाम् ।
त्रां वा रेफं ज्वलन्तं वा स्वेष्टसिद्धिप्रदायकम् ॥ (अनष्टुप्) ३

नाम ग्लौं खान्तपिण्डं वसुदलसहिताम्भोजपत्रे लिखित्वा
तत्पिण्डान्तेषु योज्यं बहिरपि वलयं दिव्यमन्त्रेण कुर्यात् ।
टान्तं भूमण्डलान्तं विपुलतरशिलासम्पुटे कुङ्कुमाद्यै-
र्धार्यं श्रीवीरनाथक्रमयुगपुरतो वह्निदिव्योपशान्त्यै ॥(स्रग्धरा)४

दिव्येषु जलतुलाफणिखगेषु पवहक्षपिण्डमाविलिखेत् ।
पूर्वोक्ताष्टदलेष्वपि पूर्ववदन्यत् पुनः सर्वम् ॥ ५

ब्रह्मग्लौङ्कारपुटं टान्तावृतमष्टवज्रसंरूद्धम् ।
वामं वज्राग्रगतं तदन्तरे रान्तबीजं च ॥ ६

वार्तालीमन्त्रवृतं बाह्येऽष्टसु दिक्षु विन्यसेत् क्रमशः ।
मलवरयूङ्कारयुतान् क्षमठसहपरान्तलान्तांश्च ॥ ७

बाह्येऽमरपुरपरिवृतमङ्कुशरूद्धं करोतु तद् द्वारम् ।
उक्षेशमन्त्रवेष्ट्यं पृथ्वीपुरसम्पुटं बाह्ये ॥ ८

कोणेष्वष्टसु विलिखेद् वार्तालीमन्त्रभणितजम्भादीन् ।
ठद्वितयं धरणीपुरमीदृशमिदमालिखेत् प्राज्ञः ॥ ९

फलके शिलातले वा हरितालमनःशिलादिभिर्लिखितम् ।
कोपगतिसैन्यजिह्वास्तम्भं विदधाति विधियुक्तम् ॥ १०

नाम ग्लौमुर्वीपुरं वं पं ग्लौङ्कारवेष्टितं कृत्वा ।
ह्रौँकारचतुर्वलयं स्वनामयुक्तं ततो लेख्यम् ॥ ११

ॐ उच्छिष्टपदस्याग्रे स्वच्छन्दपदमालिखेत् ।
ततश्चाण्डालिनि ! स्वाहा टान्तयुग्मकवेष्टितम् ॥ १२

पृथ्वीवलयं दत्त्वा पुरोक्तमन्त्रेण वेष्टयेद् बाह्ये ।
रजनीहरितालाद्यैर्भूर्ये विधिनाऽन्वितो विलिखेत् ॥ १३

तत्कुलालकरमृत्तिकावृतं तोयपूरितघटे विनिक्षिपेत् ।
पार्श्वनाथमुपरिस्थमर्चयेद् दिव्यरोधनविधानमुत्तमम् ॥ १४

रिपुनामान्वितमान्तं मलवरयूङ्कारसंयुतं टान्तम् ।
तद्बाह्ये भूमिपुरं त्रिशूलभूतोग्रमृगवेष्ट्यम् ॥ १५

प्रतिरूपहस्तखड्गैर्निहन्यमानारिरूपपरिवेष्ट्यम् ।
शत्रोर्नामान्तरितं समन्ततो वेष्टयेत् पिण्डैः ॥ १६

प्रतिरिपुवाजिमहागजनामान्तरितं समन्ततो मन्त्रम् ।
विलिखेदोँहूँह्रौँक्लैंग्लौं स्वाहा टान्तयुग्मान्तम् ॥ १७

मन्त्रेण वेष्टयित्वाऽनेन ततोऽरातिविग्रहो लेख्यः ।
अष्टासु दिक्षु बहिरपि माहेन्द्रं मण्डलं दद्यात् ॥ १८

प्रेतवनात् सञ्चालितमृतकमुखोज्झितपटेऽथवा विलिखेत् ।
कृष्णाष्टम्यां युद्ध्वा त्यक्तप्राणस्य सङ्ग्रामे ॥ १९

कन्याकर्तितसूत्रं दिवसेनैकेन तत्पुनर्वीतम् ।
तस्मिन् हरितालाद्यैः कोरण्टकलेखिनीलिखितम् ॥ २०

पद्मावत्याः पुरतः पीतैः पुष्पैः पुरा समभ्यर्च्य ।
यन्त्रपटं बध्नीयात् प्रख्याते चान्तरे स्तम्भे ॥ २१

तं दृष्ट्वा दूरतरान्नश्यन्ति भयेन विह्वलीभूताः ।
विरचितसेनाव्यूहात् सङ्ग्रामेऽशेषरिपुवर्गाः ॥ २२

षष्ठोऽङ्गनाकर्षणपरिच्छेदः ।

द्विरेफयुक्तं लिख मान्तयुग्मं षष्ठस्वरौकारयुतं सबिन्दु ।
स्वरावृतं पञ्च पुराणि वह्ने रेफात् क्रमात् क्रोमथ ह्रीँ च कोणे ॥१
(उपजाति)

क्लैङ्कारुरुद्धं च तथा ह्सक्लीँ ब्लूँकाररूद्धं च ह्सौस्तथैव ।
क्रमेण दिक्षु त्रिषु चाम्बिकाया मन्त्रं बहिर्वह्निमरुत्पुरं च ॥ २
(उपजाति)

इष्टाङ्गनाकर्षणमाहुराद्या धत्तूरताम्बूलविषादिलेख्यम् ।
यन्त्रं पटे खर्परताम्रपत्रे दिनत्रये दीपशिखाग्नितप्तम् ॥ ३
(उपजाति)

ॐ ह्रीँ हृत्कमले गजेन्द्रवशकं सर्वाङ्गसन्धिष्वपि
मायामाविलिखेत् कुचद्वितययोर्य्यूँ योनिदेशे तथा ।
क्रौँकारैः परिवेष्ट्य मन्त्रवलयं दद्यात् पुरं चानलं
तद्बाह्येऽनिलभूपुरं त्रिदिवसे दीपाग्निनाऽऽकर्षणम् ॥(शा.वि.)४

पत्रे स्त्रीरूपमालिख्यमूर्ध्वपादमधःशिरः ।
ब्रह्मादिराजिकाधूमभानुदुग्धेन लेखयेत् ॥ (अनुष्टुप्) ५

अग्निपुटकोष्ठमध्ये कलावृतं नाथमङ्कुशनिरुद्धम् ।
कोष्ठेषु प्रणवाङ्कुशमायारतिनाथरंरश्च ॥ ६

कृष्णशुनकस्य जङ्घाशल्ये प्रविलिख्य मनुजरक्तेन ।
खदिराङ्गारैस्तप्ते सप्ताहादानयत्यबलाम् ॥ ७

अथवा रजस्वलाया वस्त्रे संलिख्य जलजनागिन्याः ।
पुच्छं विधाय वर्तिं तद्दीपादानयेन्नारीम् ॥ ८

ह्रींकारमध्ये प्रविलिख्य नाम षट्कोणचक्रं बहिराविलेख्यम् ।
कोणेषु तत्त्वं त्रिषु चोर्ध्वकोणद्वये पुनर्य्म्र्यूमधरों लिखेच्च ॥ ९
(उपजाति)

पाशाङ्कुशौ कोणशिखान्तरस्थौ मन्त्रावृतं वायुपुरं च बाह्ये ।
आकृष्टिमिष्टप्रमदाजनानां करोति यन्त्रं खदिराग्नितप्तम् ॥१०
(उपजाति)

लिखित्वा ताम्रपत्रे वा श्मशानोद्भवखर्परे ।
तदङ्गमलधत्तूरविषाङ्गारप्रलेपिते ॥ (अनुष्टुप्) ११

ह्रीँ वदने योनौ क्लें हस्क्लीँ कण्ठे स्मराक्षरं नाभौ ।
हृदये द्विरेफयुक्तं हूँकारं नामसंयुक्तम् ॥ १२

नाभितले क्लूँकारं वेदादिं मस्तके च संविलिखेत् ।
स्कन्धमणिबन्धकूर्परपदेषु तत्त्वं प्रयोक्तव्यम् ॥ १३

हस्ततले र्य्म्र्यूङ्कारं सन्धिषु शाखासु शेषतो रेफान् ।
त्रिपुटितवह्निपुरत्रयमथ तद्बाह्यप्रदेशेषु ॥ १४

कोष्ठेषु भुवननाथं कोष्ठाग्रान्तरनिविष्टमङ्कुशं बीजम् ।
वलयं पद्मावत्या मन्त्रेण करोतु तद्बाह्ये ॥ १५

अङ्कुशरोधं कुर्यात् तद्बाह्ये मायया त्रिधा वेष्ट्यम् ।
यावकमलयजचन्दनकाश्मीराद्यैरिदं लिखेद् यन्त्रम् ॥ १६

वस्त्रे रजस्वलायाः खदिराङ्गारेण तापयेद् धीमान् ।
कुरुते ऽभिलषितवनिताकृष्टिं सप्ताहमध्येन ॥ १७

रविदुग्धादिविलिप्ते युवतिकपालेऽथवा लिखेद् यन्त्रम् ।
पुरुषाकृष्टौ च पुनर्नृकपाले यन्त्रमेवेदम् ॥ १८

नाम तत्त्वविगर्भितं बहिरालिखेच्छिखिमण्डलं
रेफमन्त्रवृतं श्मशानजकर्परे विलिखेदिदम् ।
तापयेत् खदिराग्निना हिमकुङ्कुमादिभिरादरा-
दानयत्यबलां बलाद्दिनसप्तकैर्मदविह्वलाम् ॥ (उज्ज्वल) १९

सप्तमो वशीकरणयन्त्रपरिच्छेदः ।

हंसावृताभिधानं लवरयषष्ठस्वरान्वितं कूटम् ।
बिन्दुयुतं स्वरपरिवृतमष्टदलाम्भोजमध्यगतम् ॥ १

तेजो हँ सोम सुधा हंसः स्वाहेति दिग्दलेषु लिखेत् ।
आग्नेय्यादिदलेष्वपि पिण्डं यत् कर्णिकालिखितम् ॥ २

भूर्ये सुरभिद्रव्यैर्विलिख्य तत् सिक्थकेन परिवेष्ट्य ।
नूतनघटेऽम्बुपूर्णे तद्यन्त्रं स्थापयेद् धीमान् ॥ ३

तन्दुलपूर्णं मृण्मयभाजनमप्युपरि तस्य संस्थाप्य ।
श्रीपार्श्वनाथसहितं करोति दाहज्वरोपशमम् ॥ ४

श्रीखण्डेन तदालिख्य पाययेत् कांस्यभाजने ।
महादाहज्वरग्रस्तं तत्क्षणेनोपशाम्यति ॥ (अनुष्टुप्) ५

क्लेन्तत्त्वकूटेन्दुवृतं स्वनाम तद्बाह्यभागेऽष्टदलाब्जपत्रम् ।
पत्रेषु पद्मावरमूलमन्त्रं वेष्ट्यं तदाकर्षणपल्लवेन ॥ ६
(इन्द्रवज्रा)

यन्त्रं ततश्चार्द्धशशिप्रवेष्ट्यं विलिख्य यन्त्रं फलके वटस्य ।
गोरोचनासंयुतकुङ्कुमाद्यैः साध्यस्य नामारुणचन्दनेन ॥ ७
(उपजाति)

कृत्वा ततश्चोभयसम्पुटं च श्रीपार्श्वनाथस्य पुरो निवेश्य ।
सन्ध्यासु नित्यं करवीरपुष्पैर्भवेदवश्यं जपतः सुसाध्यम् ॥ ८
(उपजाति)

अन्त्यवर्गतृतीयतुर्यवकारतत्त्ववृताह्वयं
हंसवर्णवृतं ततो द्विगुणीकृताष्टदलाम्बुजम् ।
तेषु षोडश सत्कलाः शिरसोनशून्यवृतं बहि-
र्मायया परिवेष्टितं प्रणवादिकादिभिरावृतम् ॥ (उज्ज्वल) ९

यन्त्रमाविलिखेदिदं हिमकुङ्कुमागुरुचन्दनै-
र्भूर्यके फलकेऽथवा भुवि गोमयेन विमार्जिते ।
प्रत्यहं विधिना समं जपतोऽरुणप्रसवैर्भृशं
तस्य पादसरोजषट्पदसन्निभं भुवनत्रयम् ॥ (उज्ज्वल) १०

ब्रह्मान्तरगतं नाम मायया परिवेष्टितम् ।
वेष्टितं कामराजेन बाह्ये षोडशपत्रकम् ॥ (अनुष्टुप्) ११

पञ्च बाणान् न्यसेत् तेषु स्वाहान्तौँकारपूर्वकान् ।
तद्बाह्ये मायया वेष्ट्यं क्रौँकारेण निरोधयेत् ॥ (अनुष्टुप्) १२

भूर्यपत्रे पटे वाऽपि विलिखेच्च हिमादिभिः ।
ह्राँ ह्रीँ क्लीँ ब्लूँ सकारान्त्यमन्त्रं क्षोभकरं जपेत् ॥ (अनु.) १३

अष्टदलकमलमध्ये स्वनाम तत्त्वं दलेषु चित्तभवम् ।
पुनरप्यष्टदलाम्बुजमिभवशकरणं ततो लेख्यम् ॥ १४

षोडशदलगतपद्मं क्लौङ्कारं तद्दलेषु सुरभिद्रव्यैः ।
क्लाँ क्लीँ क्लूँ क्लौँकारैस्तद् यन्त्रं वेष्टयेत् परितः ॥ १५

तद्बाह्येऽर्कशशिभ्यां जपतः शून्यैश्च पञ्चभिर्नित्यम् ।
नागनरामरलोकः क्षुभ्यति वश्यत्वमायाति ॥ १६

अष्टौ लघुपाषाणान् दिशासु परिजप्य निक्षिपेद् धीमान् ।
चौराररिरौद्रजीवादभयं सम्पद्यतेऽटव्याम् ॥ १७

स्मरबीजयुतं शून्यं तत्त्वेनैङ्कारवेष्टितम् ।
बाह्येऽष्टदलमम्भोजं नित्यक्लिन्ने ! मदद्रवे ! ॥ (अनु.) १८

मदनातुरे ! वषडिति विलिखेत् स्वाहान्तविनयपूर्वेण ।
त्रिभुवनवश्यमवश्यं प्रतिदिवसं भवति सञ्जपतः ॥ १९

वर्णान्तं मदनयुतं वाग्भवपरिसंस्थितं वसुदलाब्जम् ।
दिक्षु विदिक्षु च मायावाग्भवबीजं ततो लेख्यम् ॥ २०

त्रैलोक्यक्षोभणं यन्त्रं सर्वदा पूजयेदिदम् ।
हस्ते बद्धं करोत्येव त्रैलोक्यजनमोहनम् ॥ (अनुष्टुप्) २१

भ्रमयुगलं केशि भ्रम माते भ्रम विभ्रमं च मुह्यपदम् ।
मोहय पूर्णैः स्वाहा मन्त्रोऽयं प्रणवपूर्वगतः ॥ २२

एतेन लक्षमेकं भूमिमसम्प्राप्तसर्षपैर्जप्त्वा ।
क्षिप्ते गृहदेहल्यामकालनिद्रां जनः कुरुते ॥ २३

मृतविधवाब्राह्मण्याः पादतलालक्तकेन परिलिखितम् ।
तद्वक्त्रपिहितवस्त्रे विधवारूपं निराभरणम् ॥ २४

प्रणवं विच्चे मोहे स्वाहान्तं सप्तलक्षजाप्येन ।
एकाकिनी निशायां सिद्ध्यति सा यक्षिणी रण्डा ॥ २५

यत् साधकाभिलषितं तत् तस्मै वस्तु सा ददात्येव ।
क्षोभं प्रयान्ति रण्डाः सर्वा अपि भुवनवर्तिन्यः ॥ २६

तत्त्वं मन्मथबीजस्य तलोपरि विचिन्तयेत् ।
पार्श्वयोरेव लम्पिण्डं भ्रमन्तमरुणप्रभम् ॥ (अनुष्टुप्) २७

योनौ क्षोभं मूर्धनि विमोहनं पातनं ललाटस्थम् ।
लोचनयुग्मे द्रावं ध्यानेन करोतु वनितानाम् ॥ २८

शीर्षास्यहृदयनाभौ पादे चानङ्गबाणमथ योज्यम् ।
सम्मोहनमनुलोम्ये विपरीते द्रावणं कुर्यात् ॥ २९

दद्यात् ताम्बूलगन्धादीन् स्मरबाणाभिमन्त्रितान् ।
क्षालयेदात्मवक्त्रं च स स्त्रीणां मन्मथो भवेत् ॥(अनुष्टुप्) ३०

विचिन्तयेदेव लपिण्डमेकं सिन्दूरवर्णं वनितावराङ्गे ।
तद् द्रावणं दृष्टिनिपातमात्रात् स्त्र्याकर्षणं सप्तदिनानि मध्ये॥ ३१
(उपजाति)

ब्राह्मणमस्तककेशैः कृत्वा रज्जुं तया नरकपालम् ।
आवेष्ट्य साध्यदेहोद्वर्त्तनमलकेशनखरपादरजः ॥ ३२

मनुजास्थिचूर्णमिश्रं कृत्वा तन्निक्षिपेत् पुरोक्तपुटे ।
ज्वरयति मन्त्रस्मरणात् सप्ताहादस्थिमथनेन ॥ (यु.) ३३

चण्डेश्वराय होमान्तं सञ्जपेद् विनयादिना ।
सहस्त्रदशकं मन्त्री पूर्वमारुणपुष्पकैः ॥ (अनुष्टुप्) ३४

टान्तवकारप्रणवनजान्तार्द्धशशिप्रवेष्टितं नाम ।
शीतोष्णज्वरहरणं स्यादुष्णहिमाम्बुनिष्क्षितम् ॥ ३५

शाल्यक्षतदूर्वाङ्कुरमलयजहोमेन शान्तिकं पुष्टिम् ।
करवीरपुष्पहवनात् स्त्रीणां कुर्याद् वशीकरणम् ॥ ३६

महिषाक्षपद्महोमात् प्रतिदिवसं भवति पुरजनक्षोभः ।
क्रमुकफलपत्रहवनात् राजानो वश्यमायान्ति ॥ ३७

तिलधान्यानां होमैराज्ययुतैर्भवति धान्यधनवृद्धिः ।
मल्लिप्रसूनहोमात् सघृताद् वश्या नियोगिजनाः ॥ ३८

घृतयुक्तचूतफलनिकरहोमतो भवति खेचरी वश्या ।
वटयक्षिणी च होमाद् भवति वशा ब्रह्मपुष्पाणाम् ॥ ३९

गृहधूमनिम्बराजीलवणान्वितकाकपक्षकृतहोमैः ।
एकोदरजातानामपि भवति परस्परं वैरम् ॥ ४०

प्रेतवनशल्यमिश्रितबिभीतकाङ्गारसद्मधूमानाम् ।
होमेन भवति मरणं पक्षाहाद् वैरिलोकस्य ॥ ४१

## अष्टमो दर्पणादिनिमित्तपरिच्छेदः ॥

सिद्ध्यति सहस्रजाप्यैर्दशगुणितैः प्रणवपूर्वहोमान्तैः ।
दर्पणनिमित्तमन्त्रश्चले चुले चूले प्रभृतिनोच्चार्यः ॥ १

सप्तवाराभिमन्त्रितगोदुग्धं पाययेत् कुमारिकयोः ।
ब्राह्मणकुलप्रसूत्योस्तयोर्द्वयोः सप्तवत्सरयोः ॥ २

संस्नाप्य ततः प्रातर्दत्वा ताभ्यामथ प्रसूनादीन् ।
भूम्यामपतितगोमयसम्मार्जितभूतले स्थित्वा ॥ ३

चतुरस्रमण्डलस्थं कलशं गन्धोदकेन परिपूर्णम् ।
तस्योपर्यादर्शं निवेशयेत् पश्चिमाभिमुखम् ॥ ४

तदभिमुखे प्राक्कल्पितकुमारिकायुगलमथ निवेश्य ततः ।
तद्हृदये ब्लूँकारं विचिन्तयेत् प्रणवसम्पुटितम् ॥ ५

शशिमण्डलवत् सौम्यं तन्मन्त्रमनुस्मरन् स्वयं तिष्ठेत् ।
आदर्शवीक्ष्यमाणं कुमारिकायुगलकं पृच्छेत् ॥ ६

यद् दृष्टं यच्छ्रुतं ताभ्यां तत्र रूपं वचो यथा ।
खड्गाङ्गुष्ठे जलादर्शे तत् सत्यं नान्यथा भवेत् ॥(अनु.) ७

दर्पणाङ्गुष्ठदीपादिनिमित्तमवलोकयेत् ।
सिध्यत्यष्टसहस्रेण मन्त्रो जाप्येन मन्त्रिणाम् ॥ (अनुष्टुप्) ८

दत्वा दर्भास्तरणं दुग्धाहारं पुरा कुमारिकयोः ।
संस्नाप्य ततः प्रातर्धवलाम्बरभूषणादीनि ॥ ९

कलशादर्शकुमारीस्थानेष्वथ विन्यसेदिमं मन्त्रम् ।
विनयं गजवशकरणं क्षांक्षींक्षूंकारहोमान्तम् ॥ १०

प्रणवादिपञ्चशून्यैरभिमन्त्र्य कुमारिकाकुचस्थाने ।
अशितुं तयोश्च दद्याद् घृतेन सम्मिश्रितान् पूपान् ॥ ११

आलक्तकाभिरञ्जितहस्ताङ्गुष्ठे निरीक्षयेद् रूपम् ।
करनिर्वर्तिततैलेनाङ्गुष्ठस्नानकरणेन ॥ १२

प्रणवः पिङ्गलयुगलं पण्णत्तिद्वितयं महाविद्येयम् ।
टान्तद्वयं च होमो दर्पणमन्त्रो जिनोद्दिष्टः ॥ १३

जाप्यं भानुसहस्रैः सितपुष्पैश्चन्द्रकिरणसङ्काशैः ।
सिद्ध्यति दशांशहोमादादर्शनिमित्तमन्त्रोऽयम् ॥ १४

चितभस्मनैकविंशतिवारान् सम्मर्द्य दर्पणं पूर्वम् ।
शाल्यक्षतोपरिस्थितनवाम्बुपरिपूर्णनवकुम्भे ॥ १५

तं प्रतिनिधाय तस्मिन्नेककुलोद्भूतकन्यकायुगलम् ।
त्रिषु वर्णेष्वन्यतमं स्नातं धवलाम्बरोपेतम् ॥ १६

अभ्यर्च्य गन्धतन्दुलनिवेद्यकुसुमादिभिस्ततः कलशम् ।
दत्वा ताम्बूलादीन् आदर्शं दर्शयेत् ताभ्याम् ॥ १७

मन्त्रं प्रपठंस्तिष्ठेत् कुमारिकायुगलकं तथा पृच्छेत् ।
दृष्टं श्रुतं च कथयति रूपं वचनं च मुकुरान्ते ॥ १८

अष्टसहस्रैर्जातीपुष्पैः श्रीवीरनाथजिनपुरतः ।
जप्ते सुन्दरदेवी सिद्ध्यति मन्त्रेण सद्भक्त्या ॥ १९

ब्रह्मादिसुन्दरीशब्दं होमान्तं कर्णिकान्तरे ।
अष्टपत्रेषु सर्वेषु लिखेत् परमसुन्दरी ॥ (अनुष्टुप्) २०

कृष्णतिलतैलपूर्णे कुलालकरमृत्तिकाकृते पात्रे ।
आलक्तककृतवर्त्या दीपे न्यग्रोधवह्निभवे ॥ २१

श्रवणपिशाचिनि मुण्डे ! स्वाहान्तः प्रणवपूर्वकोच्चार्यः ।
सिद्ध्यति च लक्षजाप्यात् कर्णपिशाचीत्ययं मन्त्रः ॥ २२

मन्त्रपरिजप्तकुष्टं हृन्मुखकर्णाङ्घ्रियुगलमालिप्य ।
सुप्तस्य कर्णमूले कथयति यच्चिन्तितं कार्यम् ॥ २३

मलयूङ्कारचतुर्दशकलान्वितं कूटबीजकं विलिखेत् ।
शिखिवायुमण्डलस्थं सनामखरताडपत्रगतम् ॥ २४

मार्तण्डस्नुहिदुग्धं त्रिकटुकहयगन्धसद्मभवधूमैः ।
आलिप्य ललाटस्थं गृहीणां कुरुते गृहावेशम् ॥ २५

कुनटीगन्धकतालकचूर्णं कृत्वा सितार्कतूलेन ।
संवेष्ट्य पद्मनालकसूत्रेण च वर्तिरिह कार्या ॥ २६

सा कङ्गुतैलभाव्या तया प्रदीपं विबोधयेन्मन्त्री ।
यत्राधोमुखमगमद्दीपस्तत्रास्ति वसुराशिः ॥ २७

विनयादिप्रज्वलितज्योतिर्दिर्दशायां मरुन्नभोऽन्तपदम् ।
प्रपठन् मनसा मन्त्रं प्रदीपमालोकयेन्मन्त्री ॥ २८

प्रायोर्वीशनदीनवग्रहनगव्याधिप्रसूनाक्षरा-
ण्येकीकृत्य नखान्वितं त्रिगुणितं तिथ्या पुनर्भाजितम् ।
ब्रूयादुद्धरिताच्छुभाशुभफलं वैषम्यसाम्ये सुधी-
रेतत् तथ्यमिहोदितं मुनिवरैर्भव्याब्जघर्मांशुभिः ॥(शा.वि.)२९

अर्द्धेन्दुरेखाग्रगतं त्रिशूलं मध्ये च सम्यक्प्रविलिख्य धीमान् ।
ऋक्षेऽमवास्याप्रतिपद्दिने तु यस्मिन् मृगाङ्को व्यवतिष्ठतेऽसौ॥ ३०
(इन्द्रवज्रा)

कृत्वा तदादिं विगणय्य युद्धे विन्द्यात् त्रिशूलाग्रगतेषु मृत्युम् ।
मार्तण्डसङ्ख्येषु जयं च तेषु पराजयं षट्सु बहिःस्थितेषु ॥३१
(उपजाति)

दिशि विदिशि तदुभयान्तरवर्तिभ्यां दिशतु पृच्छके मन्त्री ।
क्रमशो बालं बालां नपुंसकं पूर्णगर्भिण्याः ॥ ३२

वर्णमात्राश्च दम्पत्योरेकीकृत्य त्रिभाजिताः ।
शून्येनैकेन मृत्पुंसो नार्या द्व्यङ्केन निर्दिशेत् ॥ (अनुष्टुप्) ३३

## नवमः स्त्र्यादिवश्यौषधपरिच्छेदः ॥

लवङ्गं कुङ्कुमोसीरं नागकेसरराजिकाः ।
एलामनःशिलाकुष्टं तगरोत्पलरोचनाः ॥ (अनुष्टुप्) १

श्रीखण्डतुलसीपिक्वी पद्मकं कुटजान्वितम् ।
सर्वं समानमादाय नक्षत्रे पुष्यनामनि ॥ (अनुष्टुप्) २

कन्यया पेषयेत् सर्वं हिमभूतेन वारिणा ।
कुरु चन्द्रोदये जाते तिलकं जनमोहनम् ॥ (अनुष्टुप्) ३

बर्हिशिखासितगुञ्जागोरम्भाभानुकीटकस्य मलम् ।
निजपञ्चमलोपेतं चूर्णं वनितां वशीकुरुते ॥ (अनुष्टुप्) ४

करवीरभुजङ्गाक्षीजारीदण्डीन्द्रवारुणी- ।
गोबन्धिनीसलज्जानां विधाय वटिका बहूः ॥ (अनुष्टुप्) ५

वटिकाभिः समं क्षिप्त्वा लवणं शुभभाजने ।
पक्त्वा स्वमूत्रतो दद्यात् खाद्ये स्त्रीजनमोहनम् ॥ (अनुष्टुप्) ६

मृतभुजगवदनमध्ये लज्जरिकां सन्निधाय सितगुञ्जाम् ।
रुद्रजटासम्मिश्रामाकृष्य दिनत्रयं यावत् ॥ ७

लाङ्गलिकायाः कन्दे गोमयलिप्ते परिक्षिपेच्चूर्णम् ।
परिभाव्य शुनीपयसा स्वमलैः पञ्चाङ्गसम्भूतैः ॥ ८

नेत्रश्रोत्रमलं शुक्रं दन्तजिह्वामलं तथा ।
वश्यकर्मणि मन्त्रज्ञैः पञ्चाङ्गमलमुच्यते ॥ (अनुष्टुप्) ९

पक्त्वा चूर्णमिदं पश्चाज्जगद्वश्यकरं परम् ।
दद्यात् खाद्यान्नपानेषु स्त्रीपुंसोश्च परस्परम् ॥ (अनुष्टुप्) १०

पञ्चपयस्तरुपयसा पोतक्यण्डकरसेन परिभाव्या ।
तिलतैलदीपवर्तिस्त्रिभुवनजनमोहकृद्भवति ॥ ११

विषमुष्टिकनकहलिनीपिशाचिकाचूर्णमम्बु देहभवम् ।
उन्मत्तकाभाण्डगतं क्रमुकफलं तद्वशं कुरुते ॥ १२

क्रमुकफलं मुखनिहितं तस्माद्दिवसत्रयेण सङ्गृह्य ।
कनकविषमुष्टिहलिनीचूर्णैः प्रत्येकं सङ्क्षिप्त्वा(प्य) ॥ १३

खरतुरगशुनीक्षीरैः क्रमशः परिभाव्य योजयेत् खाद्ये ।
अबलाजनवशकरणं मदनक्रमुकं समुद्दिष्टम् ॥ १४

पुत्तञ्जारीकुङ्कुमशरपुङ्खीमोहनीशमीकुष्टम् ।
गोरोचनाहिकेसरतगररुदन्ती च कर्पूरम् ॥ १५

कृत्वैतेषां चूर्णं यावकमध्ये ततः परिक्षिप्य ।
पङ्कजभवतन्तुवृता वर्तिः कार्या पुनस्तेन ॥ १६

कारुकिकुचभवपयसा त्रिवर्णयोषास्त्रुतस्तनक्षीरैः ।
परिभाव्य ततः कपिलाघृतेन परिबोधयेद्दीपम् ॥ १७

उभयग्रहणे दीपोत्सवे च नवकर्परेऽञ्जनं धार्यम् ।
गोमयविलिप्तभूम्यां स्थित्वा मन्त्राभिषिक्तायाम् ॥ १८

कज्जलरञ्जितनयने दृष्ट्वा तां वाञ्छतीह मदनोऽपि ।
नरमप्यञ्जितनयनं भूपाद्यास्तस्य यान्ति वशम् ॥ १९

विषमुष्टिकनकमूलं रालाक्षतवारिणा ततः पिष्टम् ।
तद्रसभावितपत्रं पिशाचयत्युदरमध्यगतम् ॥ २०

चिक्कणिकेप्सितरूपापिशाचिकासार्द्रचितमषीमथिते ।
नृकपाले मातृगृहे काननकार्पासकृतवर्त्या ॥ २१

धार्यं कृष्णाष्टम्यामञ्जनमेतन्महाघृतोद्भूतम् ।
तेन त्रिशूलमञ्जनमपि कुर्यादङ्कभीत्यर्थम् ॥ २२

चितवह्निदग्धभूतद्रुमयमशाखामषीं समाहृत्य ।
अङ्कोल्लतैलसूतककृष्णबिडालीजरायुश्च ॥ २३

घूकनयनाम्बुमर्दितगुलिकां कृत्वा त्रिलोहसम्मठिताम् ।
धृत्वा तामात्ममुखे पुरुषोऽदृश्यत्वमायाति ॥ २४

सितशरपुङ्खामूलं धृत्वा सितकोकिलाक्षबीजं च ।
वनवसलाररसपिष्टं वीर्यस्तम्भं मुखे संस्थम् ॥ २५

कृष्णवृषदंशदक्षिणजङ्घायाः शल्यखण्डमादाय ।
बद्धं कटिप्रदेशे वीर्यस्तम्भं नृणां कुरुते ॥ २६

कपिलाघृतेन बोधितदीपः सुरगोपचूर्णसम्मिलितः ।
स्तम्भयति पुरुषवीर्यं रत्यारम्भे निशासमये ॥ २७

टङ्कणपिप्पलिकामासूरणकर्पूरमातुलिङ्गरसैः ।
कृत्वात्माङ्गुलिलेपं कुरुते स्त्रीणां भगद्रावम् ॥ २८

मूलं श्वेतापमार्गस्य कुबेरदिशि संस्थितम् ।
उत्तरात्रितयं ग्राह्यं शीर्षस्थं द्यूतवादजित् ॥ (अनुष्टुप्) २९

अग्न्यावर्तितनागे हरवीर्यं निक्षिपेत् ततो द्विगुणम् ।
मुनिकनकनागसर्पज्योतिष्मत्यतसिभिश्च तन्मर्द्यम् ॥ ३०

डीकेन मर्दयित्वा गणियार्या मदनवलयकं कृत्वा ।
रतिसमये वनितानां रतिदर्पविनाशनं कुर्यात् ॥ ३१

व्याघ्रीबृहतीफलरससूरणकण्डूतिचणकपत्राम्बु ।
कपिकच्छुवज्रवल्लीपिप्पलिकामाम्लिकाचूर्णम् ॥ ३२

अग्न्यावर्तितनागं नववारं भावयेदिमैर्द्रव्यैः ।
स्मरवलयं कृत्वैवं वनितानां द्रावणं कुरुते ॥ ३३

भानुस्वरजिनसङ्ख्याप्रमाणसूतकगृहीतदीनारान् ।
अङ्कोल्लराजवृक्षकुमारीरसशोधनं कुर्यात् ॥ ३४

शशिरेखाखरकर्णीकोकिलनयनापमार्गकनकानाम् ।
चूर्णैः सहैकविंशतिदिनानि परिमर्दयेत् सूतम् ॥ ३५

निशायां काञ्जिकाधूपं दत्त्वा योनौ प्रवेशयेत् ।
बालां मध्यां गतप्रायां योषां विज्ञाय तत्क्रमात् ॥(अनुष्टुप्) ३६

नीरसतां बिभ्राणां योषां रतिसङ्गरे मदोन्मत्ताम् ।
द्रावयति तादृशीमप्येष जलूकाप्रयोगस्तु ॥ ३७

सोमाशाश्रितमूलं कपिकच्छोर्गोजलेन परिपिष्टम् ।
निजतिलकप्रतिबिम्बं सम्पश्यति शाकिनीशीर्षे ॥ ३८

आदित्याक्षतदिव्यस्तम्भविधौ मरिचपिप्पलीकामाम् ।
दिव्यस्तम्भे सुण्ठीचूर्णं च भक्षयेद् धीमान् ॥ ३९

लज्जरिकाभेकवसां करलिप्तं स्तम्भनं करोत्यग्नेः ।
श्वासनिरोधेन तुलादिव्यस्तम्भो भवत्येव ॥ ४०

निर्गुण्डिका च सिद्धार्था गृहद्वारेऽथवापणे ।
बद्धं पुष्यार्कयोगेन जायते क्रयविक्रयम् ॥ (अनुष्टुप्) ४१

पिबति प्रसूनसमये जपाप्रसूनं विमर्द्य कञ्जिकया ।
न बिभर्ति सा प्रसूनं धृतेऽपि तस्याः न गर्भः स्यात् ॥ ४२

## दशमः गारुडतन्त्राधिकार परिच्छेदः ।

सङ्ग्रहमङ्गन्यासं रक्षां स्तोभं च वच्म्यहं स्तम्भम् ।
विषनाशनं सचोद्यं खटिकाफणिदशनदंशं च ॥ १

समविषमाक्षरभाषिणि दूते शशिदिनकरौ च वहमानौ ।
दष्टस्य जीवितव्यं तद्विपरीते मृतिं विन्द्यात् ॥ २

दूतमुखोत्थितवर्णान् द्विगुणीकृत्य त्रिभिर्हरेद्भागम् ।
शून्येनोद्धरितेन च मृतिजीवितमादिशेत् प्राज्ञः ॥ ३

हं वं क्षं मन्त्रमन्त्रिततोयेनोद्धुषति यस्य गात्रं चेत् ।
स च जीवत्यथवाक्षिस्पन्दनतो नान्यथा दष्टः ॥ ४

क्षिप ॐ स्वाहा बीजानि विन्यसेत् पादनाभिहृन्मुखशीर्षे ।
पीतसितकाञ्चनासितसुरचापनिभानि परिपाट्या ॥ ५

पद्मं चतुर्दलोपेतं भूतान्तं नामसंयुतम् ।
दलेषु शेषभूतानि मायया परिवेष्टितम् ॥ (अनुष्टुप्) ६

वह्निजलभूमिपवनव्योमाग्रे दहपचद्वयं योज्यम् ।
स्तोभययुगलं स्तोभं मध्यमिकाचालनाद्भवति ॥ ७

आद्यन्ते भूबीजं मध्ये जलवह्निमारुतं योज्यम् ।
स्तम्भययुगलं स्तम्भो वामकराङ्गुष्ठचालनतः ॥ ८

जलभूमिवह्निमारुतगगनैः सम्प्लावयद्वयोपेतैः ।
भवति च विषापहारस्तर्जन्याश्चालनादचिरात् ॥ ९

मरुदग्निवारिधामव्योमपदं सङ्क्रमव्रजद्वितयम् ।
चालनयाऽनामिकया नितरां विषसङ्क्रमो भवति ॥ १०

व्योमजलवह्निपवनक्षितियुतमन्त्राद्भवत्यथावेशः ।
सं क्षि प हः प क्षि प हः पठनेन कनिष्ठिचालनतः ॥ ११

कर्णजाप्येन भेरुण्डा निर्विषं कुरुते नरम् ।
विद्या सुवर्णरेखापि दष्टं तोयाभिषेकतः ॥ (अनुष्टुप्) १२

भूजलमरुन्नभोऽक्षरमन्त्रेण घटाम्बु मन्त्रितं कृत्वा ।
पादादिविहितधारानिपातनाद्भवति विषनाशः ॥ १३

अनन्तो वासुकिस्तक्षः कर्कोटः पद्मसञ्ज्ञकः ।
महासरोजनामा च शङ्खपालस्तथा कुलिः ॥ (अनुष्टुप्) १४

क्षत्रियकुलसम्भूतौ वासुकिशङ्खौ धराविषौ रक्तौ ।
कर्कोटकपद्मावपि शूद्रौ कृष्णौ च वारुणीयगरौ ॥ १५

विप्रावनन्तकुलिकौ वह्निगरौ चन्द्रकान्तसङ्काशौ ।
तक्षकमहासरोजौ वैश्यौ पीतौ मरुद्गरलौ ॥ १६

पार्थिवविषेण गुरुता जडता देहस्य सन्निपातत्वम् ।
लालाकण्ठनिरोधो गलनं दंशस्य तोयविषात् ॥ १७

गण्डोद्गमता दृष्टेरपाटवं भवति वह्निविषदोषात् ।
विच्छायतास्यशोषणमपि मारुतगरलदोषेण ॥ १८

ॐ नमो भगवत्यादिमन्त्रमष्टोत्तरं शतम् ।
पठित्वा क्रोशपटहं ताडयेद्दष्टसन्निधौ ॥ (अनुष्टुप्) १९

धृत्वार्धचन्द्रमुद्रां दक्षिणभागेऽहिदंशिनः स्थित्वा ।
वदतु तव गौरिदानीं तस्करलोकेन नीतेति ॥ २०

तं समाहन्य पादेन याहीत्युक्ते स धावति ।
उत्थापयति तं शीघ्रं मन्त्रसामर्थ्यमीदृशम् ॥ (अनुष्टुप्) २१

नियुतजपात् संसिध्यति दशांशहोमेन फणिसमाकृष्टिः ।
प्रणवादिः स्वाहान्तः चिरिचिरिशब्दादिको मन्त्रः ॥ २२

नागप्रेषणमन्त्रोऽशीतिसहस्रैर्दशांशहोमेन ।
सिध्यति जाप्येन पुनः शोणितकरवीरपुष्पाणाम् ॥ २३

वल्मीकनिकटे होमं कुर्यात् त्रिमधुरान्वितम् ।
मन्त्रसिद्धौ तमाज्ञाप्य प्रेषयेदुरगेश्वरम् ॥ (अनुष्टुप्) २४

प्रेषितोऽहमनेनेति मा कस्यापि पुरो वदेः ।
अन्यमन्त्रेण मा गच्छ मानवं भक्षयामुकम् ॥ (अनुष्टुप्) २५

फणिदष्टस्य शरीरादोंस्वाहामन्त्रतो विषं हृत्वा ।
सोमं श्रवल्ललाटाद् दूतं मन्त्रेण पातयेत् ॥ (अनुष्टुप्) २६

ॐ लामों फड् मन्त्रोच्चारणतः पतति भोगिना दष्टः ।
ॐ होमादिफडन्तो दष्टपटच्छादनो मन्त्रः ॥ २७

पवननभोऽक्षरमन्त्रेणाकृष्य च धावते ततो वस्त्रम् ।
अनुधावति तत्पृष्ठे यत्र पटः पतति तत्रासौ ॥ २८

मन्त्रेणानेन फणी विषमुक्तो भवति जल्पितेन शनैः ।
अपहरति निजस्थानादशितेऽपि विषं न सङ्क्रमते ॥ २९

तेजो नमः सहस्त्रादि मन्त्रं प्रपठतः फणी ।
अनुयाति ततः पृष्टं याहीत्युक्ते निवर्तते ॥ (अनुष्टुप्) ३०

ॐ ह्रीँ श्रीँ ग्लौँ हुँ क्षूँ टान्तद्वितयेन फणिमुखस्तम्भः ।
हुँ क्षूँ ठठेति गमने दृष्टिं हाँ क्षाँ ठठेति बध्नाति ॥ ३१

वामं सुवर्णरिखाया गरुडाज्ञापयत्यतः ।
स्वाहान्तं मन्त्रमुच्चार्य कुण्डलीकरणं कुरु ॥ (अनुष्टुप्) ३२

सप्रणवः स्वाहान्तो ललललललसंयुतः करोत्येषः ।
मन्त्रो घटप्रवेशं क्षणेन नागेश्वरस्यापि ॥ ३३

ॐ ह्राँ ह्रीँ गरुडाज्ञा ठठेति तन्मुद्रया कृतां रेखाम् ।
भुजगो मरणावस्थां न लङ्घते तां कदाचिदपि ॥ ३४

कपिकच्छूरसभावितखटिका प्रणवादिनील परिजप्त्वा ।
लेख्यस्तयोपदेशात् खटिकासर्पः शनेवरि ॥ ३५

यो हन्यात् तद्वक्त्रं खटिकासर्पो दशति नात्र सन्देहः ।
दृष्ट्वा करतलदशनं मूर्च्छति विषवेदनाकुलितः ॥ ३६

ॐ क्रौँ प्रौँ त्रौँ ठः मन्त्रेण विषं हूँकारमध्यगं जप्त्वा ।
सूर्यं दृशावलोक्य भक्षयेत् पूरकात् ततः ॥ ३७

प्रतिपक्षाय दातव्यं ध्यात्वा नीलनिभं विषम् ।
ग्लौँ ह्लौँ मन्त्रयित्वा तु ततो घे घेति मन्त्रिणा ॥ (अनुष्टुप्) ३८

मुनिहयगन्धाघोषा वन्ध्या कटुतुम्बिका कुमारी च ।
त्रिकटुककुष्ठेन्द्रयवा घ्नन्ति विषं नस्यपानेन ॥ ३९

द्विपमलभूतच्छत्रं रविदुग्धं श्लेष्मतरुफलोपेतम् ।
वृश्चिकविषसङ्क्रामं बदरीतरुदण्डसंयोगात् ॥ ४०

षट्कोणभवनमध्ये कुरुकुल्लां यो लिखेद् गृहे विद्याम् ।
तत्र न तिष्ठति नागो लिखिते नागारिबन्धेन ॥ ४१

चतुरस्त्रं मण्डलमतिरमणीयं पञ्चवर्णचूर्णेन ।
प्रविलिख्य चतुःकोणे तोयभृतान् स्थापयेत् कलशान् ॥ ४२

तस्योपरि विपुलतरं मण्डपमतिसुरभिपुष्पमालिकाकीर्णम् ।
चन्द्रोयकध्वजतोरणघण्टारवदर्पणोपेतम् ॥ ४३

पञ्चपरमेष्ठिमन्त्रं प्रत्येकं प्रणवपूर्वहोमान्तम् ।
अष्टदलकमलमध्ये हिमकुङ्कुममलयजैर्विलिखेत् ॥ ४४

पूर्वाग्न्यादिषु दद्याज्जयादिजम्भादिदेवता ह्येताः ।
तद्दक्षिणदिग्भागे हेममयीं पादुकां देव्याः ॥ ४५

अभ्यर्च्य गन्धतन्दुलकुसुमनिवेद्यप्रदीपधूपफलैः ।
परमेष्ठिनं च मन्त्रं भैरवपद्मावतीपादौ ॥ ४६

परसमयजनविरक्तं शिष्यं जिनसमयदेवगुरुभक्तम् ।
कृतवस्त्रालङ्कारं संस्नातं मण्डलाभिमुखम् ॥ ४७

संस्नाप्य चतुःकलशैः सहिरण्यैस्तं ततोऽन्यवस्त्रादीन् ।
दत्त्वा तस्मै मन्त्रं निवेदयेत् गुरुकुलायातम् ॥ ४८

भवतेऽस्माभिर्दत्तो मन्त्रोऽयं गुरुपरम्परायातः ।
साक्षीकृत्य हुताशनरविशशितारामबराद्रिगणान् ॥ ४९

भवतापि न दातव्यः सम्यक्त्वविवर्जिताय पुरुषाय ।
किन्तु गुरुदेवसमयिषु भक्तिमते गुणसमेताय ॥ ५०

लोभादथवा स्नेहाद्दास्यसि चेदन्यसमयभक्ताय ।
बालस्त्रीगोमुनिवधपापं यत्तद्भविष्यति ते ॥ ५१

इत्येवं श्रावयित्वा तं सन्निधौ गुरुदेवयोः ।
मन्त्री समर्पयेन्मन्त्रं मन्त्रसाधनयोगतः ॥ (अनुष्टुप्) ५२

सकलनृपमुकुटघटितचरणयुगः श्रीमदजितसेनगणी ।
जयतु दुरितापहारी भव्यौघभवार्णवोत्तारी ॥ ५३

जिनसमयागमवेदी गुरुतरसंसारकाननोच्छेदी ।
कर्मेन्धनदहनपटुस्तच्छिष्यः कनकसेनगणिः ॥ ५४

चारित्रभूषिताङ्गो निःसङ्गो मथितदुर्जयानङ्गः ।
तच्छिष्यो जिनसेनो बभूव भव्याब्जघर्मांशुः ॥ ५५

तदीयशिष्योऽजनि मल्लिषेणः सरस्वतीलब्धवरप्रसादः ।
तेनोदितो भैरवदेवताया कल्पः समासेन चतुःशतेन ॥ ५६

यावद्वार्धिमहीधरतारागणगगनचन्द्रदिनपतयः ।
तिष्ठन्ति तावदास्तां भैरवपद्मावतीकल्पः ॥ ५७

श्रीधराचार्यविरचितम्

## ५१. ॥ श्रीपद्मावतीस्तोत्रम् ॥

(अनुष्टुप्)

ॐ जयन्तीभमातङ्गी सर्वदुष्टक्षयङ्करी ।
पद्मासने पद्मदेवी च महापद्मे नमोनमः ॥ १

देवी त्वं ध्यायिता इन्द्रे पूजिता शिवसङ्करे ।
कृष्णेन संस्तुता देवी महापद्मे नमो नमः ॥ २

सावित्रि पतिमाराध्य वासुकैः सेविता भृशम् ।
तेषां सन्तुक्षते देवी महापद्मे नमोनमः ॥ ३

पद्माम्बरधरा देवी पद्मद्रहनिवासिनी ।
पद्मायुधघरा नित्यं महापद्मे नमो नमः ॥ ४

यस्यां प्रसन्नतां पद्मे तस्यां दारिद्र्यनाशने ।
जय त्वं सुखदाता च महापद्मे नमो नमः ॥ ५

देवि ! दारिद्र्यदग्धाहं तन्मेसं सङ्करीभव ।
चिन्तिता वरदाता च महापद्मे नमो नमः ॥ ६

पद्मावती यस्या गृहे पूजिता जगदीश्वरी ।
हृदये यस्य वर्तन्ते तस्य सौख्यं निरन्तरम् ॥ ७

इदं स्तोत्रं पवित्रं च श्रीधराचार्यभाषितम् ।
एकाग्रमनसा साध्यं तस्य सौख्यं निरन्तरम् ॥ ८

रणे राजकुले चैव दुर्ग्गमे शत्रुसङ्कटे ।
महावने महाभीमे विघ्नो यान्ति दिसो दिसा ॥ ९

अपुत्रो लभते पुत्रं धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां सुखार्थी लभते सुखम् ॥ १०

पू.मु.श्री क्षमाकल्याणगणिविरचितम्

## ५२. ॥ श्रीपद्मावतीअष्टकम् ॥

(भुजङ्गप्रयात)

चिदानन्दसम्पद्विलासैकदक्षः
सुपक्षो विलक्षीकृतानङ्गपक्षः ।
ययोल्लासिचित्तेन नित्यं वितन्द्रः
सदा सेव्यते पार्श्वनाथो जिनेन्द्रः ॥ १

मनोहारिणी चारु भक्तिप्रधानै-
र्जनैराश्रिते दूरतो मुक्तमानैः ।
समालोक्य यत्पादपद्मे विशोकः
प्रजायेत सद्यः समस्तोपि लोकः ॥ २

यदीयं मुखाम्भोजमुद्दामलीलं
जनाह्लादने शर्वरीनाथशीलम् ।
मयोपास्ति नम्रेण संवीक्ष्य सद्यः
परानन्दमग्नेन संजातमद्य ॥ ३

सदाचारसम्पन्नलोकाभिनम्यां
महाशक्तिरूपां मुहुस्तामगम्याम् ।
जिनाधीशितुः पादपद्मानुरक्तां
नुवामीश्वरीं नागनाथेन युक्ताम् ॥ (च.क.) ४

विकाशस्फुरत्कान्तिपद्माग्रहस्ते
मनोहारिपद्मासने सुप्रशस्ते ।
सुरस्तोमसंसेव्यमानांह्रिपद्मे
जयत्वं सदैवोत्तमे देवि पद्मे ! ॥ ५

सतामिष्टमुत्तुङ्ग–सम्पत्तिहेतुं
सुदुष्टाष्टकष्टाम्बुधिस्फारसेतुम् ।
दधानं पुनः कामकुम्भेनसाम्यं
वरं देहि मे दर्शनं देवि ! काम्यम् ॥ ६

सदा सेवकेभ्यो भुविस्पर्शयन्ती
महाशुद्धबुद्धिं तमः संहरन्ती ।
जयत्वं जनानन्दिनी देव्यशोके
गुणानां गणैर्विश्रुता विश्वलोके ॥ ७

त्वमेवासि मातः ! कृपापात्रमेकं
मदीयं मनोनीयतां तद्विवेकम् ।
तवानुग्रहात्सद्गुणैरप्रमेयं
यतस्त्वं समासाद्य शुद्धो भवेयम् ॥ ८

इत्थं जिनेन्द्रामृतधर्मबुद्धिं
पद्मावतीं ये प्रणुवन्ति भव्याः ।
क्षमादिकल्याणगुणाभिरामा
भवन्ति ते शुद्धसमृद्धिभाजः ॥ (उपजाति) ९

## ५३. ॥ श्रीपद्मावतीस्तोत्रम् ॥

(अनुष्टुप्)

पद्मावती महादेवी, सर्वदुष्टनिवर्ति(नि?) ।
मन्थिनी सर्वं शत्रूणां, प्रसन्ना भव भारती ॥ १

पुण्यप्रकाशिनी देवी, गुह्यात् गुह्यतरं महत् ।
पद्मावती महादेवी, कवचे कवचोत्तमा ॥ २

पद्मावत्या निधानं यत्, स्वष्टै रत्नैर्महाद्भुतम् ।
सुशिष्याय प्रदातव्या, जयादेवी गुणोत्तमा ॥ ३

पद्मावती महामाया, कवचं सारमद्भुतम् ।
ब्रह्म इन्द्रे पद्मरक्षे, पद्मनाममहत्यपि ॥ ४

तत्र रक्षेत् धृतिकीर्ति, मुखं रक्षतु भारती ।
कर्णौ रक्षेत् स्तुति श्रद्धा, नासिकायां सुगन्धिका ॥ ५

स्कन्धं स्कन्धावती देवी, हृदयं बुद्धिसिद्धिदा ।
ज्ञानदायी सदा रक्षेत्, नाभि मध्ये व्यवस्थिता ॥ ६

कामरूपी महादेवी, शिरो रक्षतु मे सदा ।
जङ्घायां मे सदा रक्षेत्, कामदा कामवर्तिनी ॥ ७

जानु रक्षति मातङ्गी, श्रीप्रदाऽऽकाशगामिनी ।
गतिर्वेगी वेगदायी, रक्षतां मे पदद्वयम् ॥ ८

अङ्गन्यासं करन्यासं, जिनेन्द्रैः कथितं पुरा ।
यो नित्यं धारयेद् धीमान्, इन्द्रतुल्यो भवेन्नरः ॥ ९

त्रिकालं पठते नित्यं, क्रोध-लोभ-विवर्जितः ।
सर्वसिद्धिमवाप्नोति, लभतेऽभ्युदयं पदम् ॥ १०

## ५४. ॥ श्रीपद्मावतीस्तोत्रम् ॥

(वसन्ततिलका)

श्रेयस्तनोतु धरणाभिधनागराज-
प्राणेश्वरी फणिकुलैः सकलैः परीता ।
विद्याधरस्त्रिदशकोटिनतांह्रिपद्मा,
पद्मावती प्रवरपद्मवितेन्द्रनेत्रा ॥ १

विद्याऽणिमादिगुणगौरवमन्त्रतन्त्र-
यन्त्रप्रमाणमखिलं किल पद्मखण्डम् ।
यस्याः प्रसादकिरणैर्लभते विकाशं
तां पद्मबन्धु(न्धुं) महसां प्रणमामि पद्माम् ॥ २

मायाप्रपञ्चितरजः पटलैः करालैः
दैत्येन्द्रलोकमतुलं स्थलतां नयन्ती ।
विश्वान्यथाकरणकारणशक्तियुक्ता,
पद्मावती जयति पार्श्वजिनांह्रिभक्ता ॥ ३

उज्झृम्भदम्भविहितामितघोरसिन्धु-
पूरैः पूरैः परपुराणि पराभवन्तीं ।
कौतूहलैकचुलकीकृतसप्तसिन्धुः(न्धुं),
पद्मावतीं त्रिजगदद्भुतशक्तिमीडे ॥ ४

या सप्तलोकगतदैत्यदलानि नेत्रोन्-
मेषार्द्धमात्ररचितैर्नवसप्तजिह्वैः ।
दग्धुं क्षमाऽपि बत शाम्यति तत्परीष्ट्या,
पद्मावतीं नमत तां न कथं विशुद्ध्या ॥ ५

शैलेन्द्रमूलपरिचालनवारिराशि-
क्षोभैकहेतुगगनभ्रमताण्डवोग्रैः ।
कालानलोदयमयैः कृतकानिलोध्रै-
रुत्खातदानवकुलां प्रणमामि पद्माम् ॥ ६

रात्रिं दिनं च दिवसं रजनीं कुहूं च,
ज्योत्सनीमिमां मथकुहूं किल या विधातुम् ।
ईष्टेऽणिमादिगुणमौक्तिकताम्रवर्णी,
पद्मावती विजयते भुवनेश्वरी सा ॥ ७

पद्मे ! त्वमेव शबरी त्रिपुरारिनेत्रा,
तारा जयन्त्यनुपमा विजया जया त्वम् ।
श्री शारदा च मधुमत्यपराजिता त्वं,
सन्दृष्टि दृष्टि सुखमैककनीनिका त्वम् ॥ ८

त्वां शारदेन्दुविशदां सुधयाभिषिक्तां,
सच्चन्द्रचन्दनरसेन विलिख्य भावात् ।
दिव्योज्वलेन कुसुमाभरणोत्करेण,
सम्भूष्य शांतिककृते शमिनः स्मरन्ति ॥ ९

त्वां बालहेलिकिरणाहतसिद्धगङ्गा-
न्तर्भूतमध्यकनकाम्बुजगर्भगौराम् ।
गोरोचनाघुसृणचम्पकचर्चिताङ्गीं
स्तम्भाय चण्डि ! चतुराः परिचिन्तयन्ति ॥ १०

दैत्यप्रतापतपनास्तमयैकसन्ध्यां,
प्राकाम्य वीरनिधिविद्रुमवल्लिमालाम् ।
सद्यो विजृम्भितजपाकुसुमारुणाङ्गीं,
त्वां वश्य-मोहविधये सुधियः स्मरन्ति ॥ ११

द्विट्चक्रसङ्गमविनाशन–कालरात्रिं,
विघ्नावलीविरहिणी जनमेघमालाम् ।
त्वां क्षारवारिनिधि वीचिविचित्रकान्तिं,
ध्यायन्ति शत्रुशत–संहरणैकचित्राः (त्ताः) ॥ १२

त्वं धर्मसारसहकारवसन्तलक्ष्मीः
त्वं स्वापतेयशतसङ्गमकामधेनुः ।
त्वं कामकैरववनीशशरत्रियामा,
क्षेमङ्करी शिवपथेऽपि महेश्वरी त्वम् ॥ १३

गीर्वाणखेचरनरासुरसिद्धसेना–
भिष्टूयमाननिरवद्ययशःप्रतापा ।
सम्पादिताखिलप्रमथ(प्रथम ?) कलाविलासा,
पद्मावती जयति विश्वकृतप्रकाशा ॥ १४

## ५५. ॥ श्रीपद्मावतीकवचम् ॥

(अनुष्टुप्)

भगवन् ! सर्वमाख्यातं मन्त्रं यन्त्रं शुभप्रदम् ।
पद्मायाः कवचं ब्रूहि यद्यहं तव वल्लभः ॥ १

महागोप्यं महागुह्यं पद्मायाः सर्वकामदम् ।
कवचं मोहनं देवि ! गुरुभक्ताय दीयते ॥ २

राज्यं देयं च सर्वस्वं कवचं न प्रकाशयेत् ।
गुरुभक्ताय दातव्यमन्यथा सिद्धिदं न हि ॥ ३

ऐं बीजम् ! क्लीँ शक्तिः ! ह्सौँ कीलकम् ।
पद्मावतीप्रीत्यर्थं जपे विनियोगः ।
ॐ परब्रह्मणे नमः शिरसि । अनुष्टुप्छन्दो यो नमः मुखे ।
श्रीपद्मावतीशक्तिदेवतायै नमः हृदये । आं बीजाय नमः कण्ठे ।
ह्रीँ शक्तये नमः गुह्ये । क्रोँ कीलकाय नमः पादयोः ।
श्रीपद्मावतीकवचसिद्ध्यर्थं जपे विनियोगः ॥

ॐ पद्मा बीजं शिरः पातु ललाटं पञ्चमी परा ।
नेत्रे कामप्रदा पातु मुखं भुवनसुन्दरी ॥ ४

नाशिका नागनाथश्च जिह्वां वागीश्वरी तथा ।
श्रुतिरूपा जगद्धात्री करौ हृत् हिमवासिनी ॥ ५

उदरं मोहदमनी कुण्डली नाभिमण्डलम् ।
पार्श्वं पृष्ठं कटिं गुह्यं शक्तिस्थाननिवासिनी ॥ ६

ऊरू जङ्घे तथा पादौ सर्वविघ्नविनाशिनी ।
रक्ष रक्ष महामाये पद्मे ! पद्मालये शिवे ॥ ७

वाञ्छितं पूरयत्याशु पद्मा सा पातु सर्वतः ।
इदं तु कवचं देव्या यो जानाति स मन्त्रवित् ॥ ८

राजद्वारे श्मशाने च भूतप्रेतोपचारके ।
बन्धने च महादुःखे भये शत्रुसमागमे ॥ ९

स्मरणात् कवचस्यास्य भयं किञ्चिन्न जायते ।
प्रयोगमुपचारं च पद्मायाः कर्तुमिच्छति ॥ १०

कवचं प्रपठेदादौ ततः सिद्धिमवाप्नुयात् ।
भूर्यपत्रे लिखित्वा तु कवचं यस्तु धारयेत् ॥ ११

देहे च यत्र कुत्रापि सर्वसिद्धिर्भवेद् ध्रुवम् ।
शस्त्राग्निजं भयं नैव भूतादिभयनाशनम् ॥ १२

गुरुभक्तिं समासाद्य पद्मायाः स्तवनं कुरु ।
सहस्रनामपठने कवचं प्रथमं कुरु ॥ १३

नन्दिना कथितं देवि ! तवाग्रे तत् प्रकाशितम् ।
साङ्गता जायते देवि ! नान्यथा गिरिनन्दिनी ॥ १४

इदं कवचमज्ञात्वा पद्मायाः स्तौति यो नरः ।
कल्पकोटीशतेनापि न भवेत् सिद्धिदायिनी ॥ १५

द्विपञ्चाशदक्षरगर्भिता सप्रभावा

## ५६. ॥ श्रीपद्मावतीस्तुतिः+ ॥

(स्रग्धरा)

ॐ ॐ ॐकारबीजं त्रिभुवनजयदा शक्तिरूपा प्रचण्डं
नानानानामनन्तं निजनिजनिजिटां निर्भया निर्मलाङ्गी ।
मं मं मं मोक्षरूपं सकलजयकरं सर्वलीलाप्रसिद्धं
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ ! तत्त्वे ॥ १

सं सं सं सिद्धिदाता हर हर हरती सर्वपापं हरन्ती
अं अं अं अङ्गअङ्गे अमलदलयुतं अङ्गरूपार्थयन्ती ।
आं आं आं अन्तरिक्षे अगमगमकरं अर्चितं आदिशक्तिः
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ २

इं इं इं ईशपारं परमसिद्धिमयं आदिमाता कुमारी
ॐ ॐ ॐ ऊर्ध्वरूपं अकलकलिनितं आदिब्रह्माण्डमण्डे ! ।
रं रं रं राजलीला रमणरितरिते रूपरम्भा रमन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ३

रां रां रां रुद्रराणी रिरिररिरवितां रक्तवेषं धरन्ती
लं लं लं लोललोलं ललिललिललितां लोकलीलाललामं ।
लं लं लं लब्धिदाता दलिदलिदलिता दुर्गतिं घोरदुष्टं
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ४

ऐं ऐं ऐश्वर्यमाया त्रिभुवनरचिता निर्गुणानन्तशक्तिः
ॐ ॐ ॐकारयुक्तं सकलसिद्धिकरं देवदेवेन्द्रवन्द्ये ! ।
अं अं अं आदिमाता अमरतरवरं आदिब्रह्मादिमर्त्यैः
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ५

कं कं कं कालइंते ! कलिमलरहिते ! कामनाकर्मसिद्धिः
खं खं खं खड्गहस्ते ! खलबलहतयो खण्डिता खप्रपूरं ।
गं गं गं गौरवर्णं गजनतगमनं गर्जितां घोषशब्दे !
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ६

घं घं घं घायदैत्ये घघघघघटिकं घर्घरं घोररूपे !
ङं ङं ङं ङंभरूपे ङङिङङिङङिङ्तां दीनचेन्द्रो ङङन्ती ।
चं चं चं चक्रहस्ते ! चुरिचुरिचुरितां कष्टकं चूर्णयन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ७

छं छं छं छत्रमण्डे ! शिरमुकुटधरं शोभितं चन्द्रबिम्बं
जं जं जं जोगमाया जय जय जयतां युग्मरूपे ! भवानी ! ।

झं झं झं झुम्बरूम्ले ! झमझमझडितां झोठझूठे रुडन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ८

ञं ञं ञं नादबिन्दे नडिनडिनडितां दुष्टकष्टा नडन्ती
टं टं टं टोपपूरे ! त्रिभूवनतरसे त्रासटङ्कारबाणम् ।
ठं ठं ठं ठोरठोरे ठहठहठहकं घोरघोरें घुघन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ९

डं डं डं डाकडोरे ! डहडहडहकं द्रोटद्रोटाः करन्ती
ढं ढं ढं ढुङ्कमण्डे ढढढढढढितो ढुंढडा ढाढयन्ती ।
णं णं णं णार्यघाढे रणरणरणिता दुष्टपापं दुरन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ १०

तं तं तं तत्त्वमाया त्रिगुणगुणमयी ताडता भूतचक्रं
थं थं थं थूललोके थुणथुणथुणितां सर्वदेवा स्थुणन्ती ।
दं दं दं दीर्घरूपं दुरिदुरिदुरितां दुष्टपापं दुरन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ ११

धं धं धं धर्मदीपे धरधरधरणीं धारिते धर्मवृद्धिं
नं नं नं नर्कहंती निर्मलपटधरं मोक्षमण्डाणतत्त्वम् ।
प्रं प्रं प्रं पद्मधारी पृथुलदलमयं पद्मपद्मासनस्थे !
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ १२

फं फं फं फोजमध्ये जयजयजयदा शक्तिसामर्थ्यदाता
बं बं बं बालरूपे ! बहबहबहके बाललीलाः करन्ती ।
भं भं भं भ्रूहमध्ये भजभजभजतां शोभि सिन्दूरबिन्दे
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथ तत्त्वे ॥ १३

मं मं मं माल्यपुष्पैः मृगमदरचितां मौक्तिकैः शोभ्यमानं
यं यं यं ज्योतिरङ्गे झगिझगिझगितां ज्योतिकं दर्परूपे ! ।
रां रां रां रक्तवर्णं रचिरचिरचितां रक्तरङ्गारुणन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १४

लं लं लं लोकमाता त्रिभुवनजननी ब्रह्मविष्णुर्जनन्ती
वं वं वं वेदशक्तिर्विमलवरवरं वज्रवज्राङ्कुशीनाम् ।
शं शं शं शम्भुरूपी शिखरगिरिमयं शङ्करी शं करन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १५

षं षं षं षेलमण्डे षटदलरचितां दर्शनं खड्गपालं
सं सं सं सिद्धशक्तिः शुकलपदभवे ! सिद्धियोगं भजन्ती ।
हों हों होंकारनादे हरिहरि शिव भे सर्वपूज्ये प्रपूज्यं
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १६

क्षं क्षं क्षं क्षोभक्षोभं षटमतजयदा दुष्टदण्डे ! प्रचण्डे !
क्रोँ क्रोँ क्रोँ कालपन्थे ! किलिकिलिकिलिके किल्कमन्त्रैः समन्त्रैः ।
प्रां प्रां प्रां षट्ककोणे षटदलजपते क्रूरतापे दयन्ती
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १७

ग्रं ग्रं ग्रं गोलचक्रं गुरुगुरुगुरुते गर्जगर्जेति गर्जं
ज्रं ज्रं ज्रं ज्वालमाला ज्वलज्वलज्वलितां ज्योतिज्वालास्वरूपम् ।
त्रं त्रं त्रं ताडिताडि तडतडतडितां तारिता मन्त्रतन्त्रैः
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १८

द्रं द्रं द्रं द्रावयन्ती सकलभयभयान् भूर्यपद्मा भजन्ती
प्रं प्रं प्रं पारिजातैः परमसुखविधे ! पूज्यते पद्मदेवि ! ।

भ्रं भ्रं भ्रं भूतमाता भ्रमणभवहते ! ज्ञानदे ! गौरमङ्गं
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ १९

म्रं म्रं म्रं मन्त्रमूर्तिर्मुगतपदमयं अर्चितं योगपन्थैः
यूां यूां यूां ज्योतिमूर्ति घटवरकमले ! चक्रपात्रे ! स्वरूपा ।
श्रं श्रं श्रं सिद्धियोगे कनकघटपटे पार्श्वनाथ प्रतापात्
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ २०

ह्राँ ह्राँ ह्राँ ह्रीं य बीजं श्रियश्रियश्रिपदं क्रीङ्क्षोङ्कारजाप्यं
ॐ ह्राँ श्रीँ क्लीँ कमलस्थितिकरे सर्वजाप्यं जपन्ती ।
ॐकारे सर्वबीजे समरनितनिते बावन्नामक्षरीणं
प्रं प्रं प्रं पद्मदेवि ! प्रकटघटमयं वन्दितं नाथतत्त्वे ॥ २१

आद्येशो चिदब्रह्मनन्तगुण भगवती भग्वन्तज्योतिर्मयं
आनन्दे युतभक्तिवन्तकमलायुक्तः स्वरूपोन्नतम् ।
कृष्णचन्द्रविभूषणं गुणवतं त्रैलोक्यमाता सती
ज्ञानादि मुनिचन्द्रनाथ भजतीते मर्चिता लीलामयम् ॥ २२

रुद्राणी जगरूपरम्भरमती त्रैलोक्यदेवेश्वरी
ब्रह्मा विष्णुमहेशजन्महरणी युग्मेव योगेश्वरी ।
मातङ्गी त्रिगुणादिनन्त विमला वाक्यन्तवाघेश्वरी
भग्वन्ती मुनिचन्द्रमात् मधुमती मानन्द आदेश्वरी ॥ २३

जगदम्बा युगयोगिणी जयवतं मुक्तामणीभूषणं
खड्गखप्रत्रिशूलचक्रमृगपतिमारूढरक्ताम्बरी ।
दैत्येन्द्रहतरक्तबीजमथनी देव्येन्द्रदाता सुखं
आनन्दीं मुनिचन्द्रनाथनितजप्यं मुक्तेः पदं दायिनी ॥ २४

विविधनीतियुतं जगवल्लभं
भगवती कीर्ति बहुतपते जयम् ।
दुरितपापहरं अमरापदं
मुनिभिश्चन्द्रकलाकमलायुतम् ।
सर्वपापहरं नित्यं सिद्धिर्भवति निश्चितम् ।
प्रातरुत्थाय यः पठेत् अमरपदमाश्रितम् ॥ २५

---

+नास्ति स्तोत्रमिदं शुद्ध संस्कृतं छन्दोदोषविमुक्तं च तथापि शब्द चित्रत्वात् सङ्गृहीतमिह विदुषां मनोविनोदाय ।

## ५७. ॥ श्रीपद्मावतीस्तोत्रम् ॥

जय जय जगदानन्ददायिनि ! जय जय धरणेन्द्रवल्लभे ! सुभगे!।
देवि ! फणत्रयधारिणि ! त्वं जय पद्मानने ! पद्मे ! ॥ १

विजया जयाऽजिता त्वं अपराजिता शिवा गौरी ।
रम्भा त्वं वैरोट्या प्रज्ञप्तिर्भद्रकाली च ॥ २

काली च महाकाली शिवङ्करी शङ्करी पद्मनेत्रा ।
हिमवत्तनया लक्ष्मीर्धृतिमतिभुवनेश्वरी देवी ॥ ३

त्वं बुद्धि-सिद्धि-वृद्धिस्त्वं ज्वालामालिनीश्वरी बाला ।
कामाक्षा जगदम्बा अम्बा जगदीश्वरी तारा ॥ ४

त्वमम्बिकाऽन्नपूर्णा श्रीर्विद्यात्रिपुरसुन्दरीजननी ।
त्वं भगवती भवानी मातङ्गी राजमातङ्गी ॥ ५

त्वं भैरवी त्रिनेत्री शक्तिस्त्वं हिङ्गुलाज-हीङ्गोली ।
त्वं वाग्वादिनीशारदा सरस्वती सत्यदेवी च ॥ ६

ज्वालामुखि भो बाला पीठा शाकम्भरी च त्वमनन्ता ।
शीतला तोतला भद्रा वज्रा कूष्माण्डी चक्रधरा ॥ ७

चामुण्डी महामाया गायत्री सर्वविश्वविख्याता ।
श्रुतदेवी जिनवाणी त्वं विद्या वर्द्धमानस्य ॥ ८

नागकुमारकुमारी देवी कात्यायनी मधुमती च ।
कुण्डलिनी ह्रींकारी आई माई च दुर्गोमा ॥ ९

भोगी चानन्दकरी त्वं वरदानन्ददायिनी नित्या ।
ब्रह्माणी बाहुबली सिंहमराले समारूढा ॥ १०

त्वं चैकाक्षरनामा अक्षरी त्र्यक्षरी षडक्षरी माता ।
पञ्चदशाक्षरगर्भिता त्वं भुवनत्रयस्य सौख्यकरी ॥ ११

त्रिजगन्नाप्तशरीरा जनजाड्यविभञ्जना रविकराभा ।
सेवकवाञ्छितफलदा पद्मदला भास्वरी सेव्या ॥ १२

श्रीपार्श्वनाथपदपङ्कजभक्तिलीना
पद्मासना प्रवरकुर्कुटसर्पयाना ।
दारिद्र्यदुःखरिपुवर्गविनाशनोत्का
पद्मावती भवतु मे खलु सा प्रसन्ना ॥ (वसन्ततिलका) १३

## ५८. ॥ श्रीपद्मावतीव्रतोद्यापनम् ॥

(अनुष्टुप्)

नमः श्रीपार्श्वनाथाय मोक्षलक्ष्मीनिवासिने ।
वक्ष्ये पद्मावतीपूजां चतुर्विंशतिअङ्ग्या(सङ्ख्यया) ॥ १

मण्डलं कारयेत् सूरिश्चतुर्विंशतिकोष्ठकम् ।
पञ्चवर्णं महारम्यं रत्नप्रभासमन्वितम् ॥ २

आदौ गन्धपुटीपूजा पश्चात् स्वगुरुपूजनम् ।
देवतापूजनं कुर्याद् धर्मकामार्थसाधनम् ॥ ३

कुर्वन् बुद्ध्या इमां पूजां तस्य विघ्नोपहारिणीम् ।
वाञ्छितार्थाऽखिलं दद्यात् पद्मिनी सुखदायिनी ॥ ४

ये लोकाः पूजयन्ति भगवति महति देवि पद्माङ्घ्रि भक्त्या
दंष्ट्रादाढाकराला जिनपदनिवशि उग्रतेजातिमानी (?) ।
तेषां सा पापहन्त्री निरुपमसुखदा पुत्रदारादिकल्पा-
दायी स्वर्गापवर्गा(न्) धरणिधरपतिदेवनाथादिसेव्या ॥ ५

(स्रग्धरा)

ये पूजयन्ति मनकायमानी तेषां जनानां सुखदायकानि ।
पद्मावतीनाम परं पवित्रं सद्यः फलादान ददाति पूजा ॥ ६

(इन्द्रवज्रा)

इति प्रथमं निरुपमपुष्पाञ्जलिः ।

अथ श्रीपार्श्वनाथस्तवनम् ।

ह्रीँ देवं पार्श्वनाथं धरणिपतिनुतं देवदेवेन्द्रवन्द्यं
ह्रीँकारं बीजमन्त्रं जगदकलिमलं सर्वोपद्रव्यहारी ।
ॐ ह्राँ ह्रीँ हूँकारनादं अघहरति महाभक्तिरूपं जनानाम् ।
व्यालीढं पादपीठं कमठशठमर्तिमाह्वयं पार्श्वनाथम् ॥

ॐ ह्रीँ अर्हं श्रीपार्श्वनाथाय अत्रावतरावतर संवौषट् स्वाहा ।
आह्वाननम् ।

ॐ ह्रीँ अर्हं श्रीपार्श्वनाथाय अत्र तिष्ठ तिष्ठ ठः ठः स्वाहा ।

स्थापनमन्त्रः ।

ॐ ह्रीँ अर्हं श्रीपार्श्वनाथाय अत्र मम सन्निहितो भव भव वषट् स्वाहा ।

सन्निधापनम् ।

अथाष्टकम् ।

ह्रीँह्रीँकारबीजं भूरिरूपतेजं गुणाधिकराज्यं सुराधिपपूज्यम् ।
क्षीराब्धिसुवारिभिःकाश्मीरयुक्तैर्भवकल्मषहारैर्जिनमर्चयामि ॥
ॐ ह्रीँ सकलमन्त्रबीजाय ह्रीँकाराय विश्वविघ्नहरणाय जलम् ॥ १

हुं ह्रोँकारनाम्नी परं स्फोटयापं जनानां सुखदायकं विघ्नहारम् ।
देवरण्यश्रीखण्डकुङ्कुमयुक्तैर्वपुस्तापहारैर्जिनं पूजयामि ॥
गन्धम् ॥ २

ॐ ह्रीँ देवमन्त्रं वामादेवीसुतं अखण्डं पदं निर्मितं पार्श्वनाथम्।
क्षीराब्धिप्रफेनैः समं तण्डुलौघैरखण्डैरक्षतैर्गतहेमपात्रैः ॥
अक्षतम् ॥ ३

क्ष्रूं ह्रूं रक्ष रक्ष भैरवातिभीमां ह्राँ ह्रूँ ह्रः वहननस्फुटबन्धबन्धम् ।
जपाजातिमोगरचम्पकपुष्पै रणद्गन्धलुब्धैर्भ्रमद्भ्रमरवृन्दैः ॥
पुष्पम् ॥ ४

वमं हंसबाधं सुधाबीजमन्त्रं क्षुधावेदनिवारितं पार्श्वनाथम् ।
वटाखज्जकैर्मोदकैः शालिभक्तैः गतैर्हेमपात्रे बहूअन्नपाकैः ॥
नैवेद्यम् ॥ ५

क्ष्मां क्ष्मां बीजसारहरिद्देहवर्णं हरन्मोहध्वान्तं जिनाधिपपूज्यम् ।
ज्वलद्दीपघृतादिकर्पूरयुक्तैः शिखापिङ्गवर्णैर्यथावग्रनेत्रैः ॥
दीपम् ॥ ६

भ्रं भ्रं भ्रः प्रसूतं हतं शाकिनीनां महत्क्रूरकर्मं दहन् दग्धरूपम् ।
लसद्धूपधूम्रैः कृष्णागुरुधूपैः सुगन्धीकृताङ्घ्रि जिनं पूजयामि ॥
धूपम् ॥ ७

स्फ्रीं स्फ्रीं वसनादं जगत्पूज्यवादं हतादुष्टदुःखं गताभीष्टरूपम् ।
फलैर्दाडिमैर्द्राक्षकैर्मातुलिङ्गैः जिनं पूजितं श्रीफलैर्भावयुक्तैः ॥
फलम् ॥ ८

आपैर्गन्धैरक्षतैः पुष्पश्चारुदीपधूपैः फलैरर्घैः ।
काञ्चनपात्रैर्मङ्गलदानैर्दद्यादर्घं श्रीजिननाथम् ॥
इत्थं मन्त्रं नित्यं ध्यायन् तस्मिन् सिद्धिं च प्रदेयम् ।
वामासुतं पद्मासेव्यं भक्तिभावमर्चितं च ॥

अथ स्तोत्रम् ।

(स्रग्धरा)

श्रीमद्देवेन्द्रवृन्दामलमणिमुकुटं ज्योतिषां चक्रवालै-
र्व्यालीढं पादपीठं शठकमठकृतोपद्रवाबाधितस्य ।
लोकालोकावभासी स्फुरदुरुविमलज्ञानसद्दीपकं च
प्रध्वस्तध्वान्तजालः स वितरतु सुखं संस्तुवे पार्श्वनाथम् ॥ १

ह्राँ ह्रीँ ह्रूँ ह्रौँ विभास्वन्मरकतमणिकाकान्तमूर्ते ! हिमं च
हं सं तं बीजमन्त्रैः कृतसकलजगत्क्षेमरक्षोरुवक्षः ।
क्षां क्षीं क्षां क्षौं समस्तक्षितितलमहिता ज्योतिरुद्द्योतितार्थम्
क्षैं क्षां क्षौं क्षः क्षितबीजो गुरुशुभभरैः संस्तुवे पार्श्वनाथम् ॥२

ह्रौँकारे रेफयुक्तं रररररररं देवसंसं प्रयुक्तं
ॐ ह्रीं क्लीं क्लं(ह्राँह्रीँ) समेतं विपद-

मदकलाकच्चकोद्भासि हुं हुं ।
धुं धुं धुं धूम्रवर्णैरखिलमहिजगन्मोहिदेह्यानुकृष्टं
वैषण्यन्त्रं पतन्तं त्रिजगदधिपते ! संस्तुवे पार्श्वनाथम् ॥ ३

आं क्रों ह्रीँ सर्ववश्यं कुरु कुरु सरसं क्रामणं तिष्ठ तिष्ठ
क्ष्मूँ हूं हूं रक्ष रक्ष प्रबलतरमहाभैरवारातिभीमैः ।
ह्रां ह्रीं ह्रूँ द्रावयेति द्रव हन हन फट् फट् वषट् बन्ध बन्ध
स्वाहामन्त्रं पठन्तं त्रिजगदधिपते संस्तुवे पार्श्वनाथम् ॥ ४

हं सं झ्वीं क्ष्वीं सहंसः कुवलयकलितैरर्चिताङ्गः प्रसूनैः-
झ्वीं भः हः घर्क्षहंसं हरहरहहहं पक्षिपः पाक्षिकोपम् ।
पंवं हंसः पवंमं सरसर सरसत् सत्सुधाबीजमन्त्रैः
स्नायस्थाने परत्नैः प्रबलति विमुखं संस्तुवे पार्श्वनाथम् ॥ ५

क्ष्मां क्ष्मां क्ष्मूं क्ष्मौं क्षः रेतै...हपति विनुतं रत्नदीपैः प्रदीपैः
हाहाकारोग्रनादैर्ज्ज्वलद्दहनशिखाकल्पदीर्घोर्ध्वकेशैः ।
पिङ्गाक्षैर्लेलिजिह्वैर्विषमविषधरालङ्कृतैस्तीक्ष्णदंष्ट्रै-
र्भूतैः प्रेतैः पिशाचैरनघकृतमहोपद्रवाद्रक्षितारम् ॥ ६

झ्रां झ्री झ्रः शाकिनीनां सपदि हरपदं त्रिर्विशुद्धैर्विबुद्धैः
ग्लों क्ष्मं डं दिव्यजिह्वागतिमतिकुपितं स्तम्भनं संविधेहि ।
फट् फट् सर्पादिरोगं ग्रहमरणभयोच्चाटनं चैव पार्श्व
त्रायस्वाशेषदोषादमरनरवरैः संस्तुवे पार्श्वनाथम् ॥ ७

स्फ्रां स्फ्रीं स्फ्रूँ स्फ्रौँ स्फ्रः प्रबलसुफलदं मन्त्रबीजं जिनेन्द्रम्
रां रों रौं रूं रः प्रमह...महितं पार्श्वदेवाधिदेवम् ।
क्रां क्रीं क्रूं क्रौं क्रः जजजजजजरा जर्जरीकृत्य देहं
धूं धूं धूं धूं धुं धुं धुं ससमदुरितहं संस्तुवे पार्श्वनाथम् ॥ ८

इत्थं मन्त्राक्षरोत्थं वचनमनुपमं पार्श्वनाथं सनित्यं
विद्वेषोच्चाटनादिस्तभनजयवशं पापरोगापनोदि ।
प्रोत्सर्पज्जङ्गमादिस्थविरविषमुखध्वंसनं स्वायुदीर्घै-
रारोग्यैश्वर्ययुक्तो भवति यशःसुखं स्तौति तस्येष्टसिद्धिः ॥ ९

अथ जयमाला ।

वन्दे तं जिनपार्श्वनाथमनघं ! रत्नत्रयालङ्कृतं
ह्रीँ बीजं मतिदुःखदावशमनं घोरोपसर्गापहम् ।
देवेन्द्राधिपतिं खगाधिपनतं वन्ध्यापिनारीसुतं
पद्मिनीसतिशासनं भयहरं नागेन्द्रसेवान्वितम् ॥ (शा.वि.) १

अमरनाथगणाधिपवन्द्यं मुनिजनआर्यासेवितपादम् ।
भक्तिनम्रभवसागरपोतं वाक्यामृतरसपोषितभूतम् ॥ २

कृतोपसर्गं कमठैर्गरिष्ठं जितवारातिभवान्तरश्रेष्ठम् ।
कुण्डलकुण्डलिनीकृतछत्रं वारितमेघाडम्बरशस्त्रम् ॥ ३

कर्मपर्वतहतासमवज्रं भयतमवारणसूर्यसुसज्जम् ।
केवलज्ञानविलोकनदक्षं बोधितलोकालोकविपक्षम् ॥ ४

राजितसमवसरणसुनिधानं चामरछत्रसिंहासनमानम् ।
सुरासुरखेचरतिष्ठति सौख्यं द्वादशभासाहितसन्मुख्यम् ॥ ५

धर्मप्रकाशितलक्षणसहितं मूलदयानिधिपापविरहितम् ।
जन्तूत्तारणसमरथसूरं भव्यकमलवाक्यामृतपूरम् ॥ ६

देवी पद्मावति वामे विशालं रक्षतु शासनमुखद्रुमजालम् ।
दक्षिणदिशि सोहइ फणिराजं विघ्ननिवारणदेवविराजम् ॥ ७

ईदृग्विधि पार्श्वजिनं प्रणम्यं अनन्तचतुष्टयगम्यागम्यम् ।
ये नरनारि त्रिकालं पूजन्ति ते मनवञ्छितं सफलं लहन्ति ॥८

नाग नागिणी अतिशय धारी उधर्या दम्पती जनसुखकारी ।
क्रूरघोरघनदुःखनिवारी वञ्छितफल अतिदायक भारी ॥ ९

धत्ता (मालिनीं !)
आपद्विविधहारी सम्पदासौख्यकारी
त्रिभुवनपदधारी सिद्धिलोकाग्रसूरी ।
जलबहुविधपूरैर्गन्धमाल्यादिसारै-
र्जिनवरमुखबिम्बं पूजितं भावभक्त्या ॥ १०
ॐ ह्रीँ क्रोँ महार्घं ॥
अथ धरणेन्द्रपूजा ।
धरणयक्षविलक्षविसह्लासे (?) क्षितिधरोन्न(त)कच्छपवाहने !
त्रिदशवन्दितपार्श्वजिनक्रमं प्रणतमौलिमणिं सदलं श्रिया ॥ १
ॐ ह्रीँ क्रोँ धरणेन्द्राय अत्रावतरावतर सं वौषट् स्वाहा ।
आह्वाननम् ।
॥ अत्र तिष्ठ तिष्ठ ठः ठः स्थापनम् ।
॥ अत्र मम सन्निहितो भव भव वषट् सन्निधापनम् ।

अथाष्टकम् ।

अम्भोभृङ्गारस्वर्णाभा सौगन्धिभिर्मधुव्रतैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥
ॐ ह्रीँ क्रोँ धरणेन्द्राय जलं० ॥ १

चन्दनैः कुसुमैः सारैर्भृङ्गार्द्रीकृतगन्धिभिः ।
फणीन्द्रं पूजितं भक्त्या सवविघ्नापहारिणम् ॥
ॐ ह्रीँ क्रोँ धरणेन्द्राय गन्धं० ॥ २

तन्दुलैः पाण्डुलाखण्डैः कुन्दगौरसमप्रभैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥
ॐ ह्रीँ क्रोँ धरणेन्द्राय अक्षतं० ॥ ३

मन्दाराचम्पकं जातिपुष्पवाहहताक्षमैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥
ॐ ह्रीँ क्रौँ धरणेन्द्राय पुष्पम्० ॥ ४

मण्डकैर्मोदकैर्भक्तैर्हेमभाजनसंस्थितैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥
ॐ ह्रीँ क्रौँ धरणेन्द्राय नैवेद्यम्०

कर्पूरनिर्धूमवर्तैस्तिमिराहृतदीपकैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥ दीपम् ॥
पनसैः श्रीफलैर्द्राक्षैरभीष्टफलदायकैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥ फलम् ॥
कृष्णागुरुधूपधूम्रैर्घातिकर्मसुदाहकैः ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥ धूपम् ॥
जलं गङ्गाक्षतैरर्घैर्धरणेन्द्रार्चितं मुदा ।
फणीन्द्रं पूजितं भक्त्या सर्वविघ्नापहारिणम् ॥ अर्घम् ॥

श्रीपार्श्वनाथपदपङ्कजसेव्यमानं
पद्मावती भजति वाङ्मनवामभागम् ।
घोरोपसर्गहननं निजमानदक्षं
तं देवशुद्धमतिगं प्रभजामि नित्यम् ॥ (वसन्ततिलका)

ॐ पुष्पाञ्जलि०

## ५९. ॥ श्रीपद्मावतीस्तोत्रम् ॥

(स्रग्धरा)

श्रीमद्गीर्वाणचक्रस्फुटमुकुटतटी दिव्य-माणिक्यमाला,
ज्योतिर्ज्वाला कराला स्फुरितमुकुरिकाघृष्टपादारविन्दे ! ।

व्याघोरोल्कासहस्रस्फुरज्ज्वलनशिखालोलपाशाङ्कुशाढ्ये,
ॐ आँ क्रों ह्रीँ मन्त्ररूपे ! क्षपित–
कलिमले ! रक्ष मां देवि ! पद्मे ! ॥ १

भित्त्वा पातालमूलं चल चल चलिते ! व्याललीलाकरालै–
र्विद्युद्दण्डप्रचण्डप्रहरणसहितैस्तद्भुजैस्तर्जयन्ती ।
दैत्येन्द्रक्रूरदंष्ट्राकटकटघटिते ! स्पष्टभीमाट्टहासे !,
मायाजीमूतमाला कुहरितगगने ! रक्ष मां देवि ! पद्मे ! ॥ २

कूजत्कोदण्ड काण्डोड्डमरविधुरिते ! क्रूरघोरोपसर्गं,
दिव्यं वज्रातपत्रं प्रगुणमणिरणत्किङ्किणीक्वाणरम्यम् ।
भास्वद्वैडूर्यदण्डं मदनविजयिनो बिभ्रती पार्श्वभर्तुः,
सा देवी पद्महस्ता विघटयतु महाडामरं मामकीनम् ॥ ३

भृङ्गी काली कराली परिजनसहिते ! चण्डि ! चामुण्डि ! नित्ये !
क्षाँ क्षीँ क्षूँ क्षः क्षणार्धे क्षतरिपुनिवहे ह्रीँ महामन्त्ररूपे !
भ्राँ भ्रीँ भ्रूँ भृङ्गसङ्गभ्रुकुटिपुटतटत्रासितोद्दामदैत्ये !
झ्वाँ झ्विँ झ्वूँ झ्वः प्रचण्डे ! स्तुति–
शतमुखरे ! रक्ष मां देवि ! पद्मे ! ॥ ४

चञ्चत्काञ्चीकलापे ! स्तनतटविलुठत्तारहारावलीके,
प्रोत्फुल्लत्पारिजातद्रुमकुसुममहामञ्जरीपूज्यपादे ! ।
ह्राँ ह्रीँ क्लीँ ब्लूँ समेते ! भुवनवशकरे ! क्षोभिणी द्राविणी त्वं,
आँ ईं ऊँ पद्महस्ते ! कुरु कुरु घटने रक्ष मां देवि ! पद्मे ! ॥५

लीलाव्यालोलनीलोत्पलदलनयने ! प्रज्वलद्वाडवाग्नि–
प्रोद्यज्ज्वाला–स्फुलिङ्गस्फुरदरुणकरोदग्रवज्राग्रहस्ते ! ।

ह्राँ ह्रीँ ह्रूँ ह्रः हरन्ती हरहरहर हुङ्कारभीमैकनादे !
पद्मे ! पद्मासनस्थे व्यपनय दुरितं देवि ! देवेन्द्रवन्द्ये ! ॥ ६

कोपं वं झं सहंसः कुवलयकलितोद्दामलीलाप्रबन्धे !,
ज्राँ ज्रीँ ज्रूँ ज्रः पवित्रे ! शशिकरधवले ! प्रक्षरत्क्षीरगौरे ! ।
व्यालव्याबद्धजूटे प्रबलबलमहाकालकूटं हरन्ती,
हा हा हुङ्कारनादे ! कृतकरकमले ! रक्ष मां देवि ! पद्मे ! ॥ ७

प्रातर्बालार्करश्मिच्छुरितघनमहासान्द्रसिन्दूरधूली,
सन्ध्यारागारुणाङ्गि ! त्रिदशवरवधूवन्द्यपादारविन्दे ! ।
चञ्चच्चन्द्रासिधाराप्रहतरिपुकुले ! कुण्डलोद्घृष्टगल्ले !
श्राँ श्रीँ श्रूँ श्रः स्मरन्ति ! मदगजगमने ! रक्ष मां देवि पद्मे ! ॥८

विस्तीर्णे पद्मपीठे कमलदलनिवासोचिते ! कामगुप्ते !
कान्ताङ्गि ! श्रीसमेते ! प्रहसितवदने ! दिव्यहस्ते ! प्रसन्ने ! ।
रक्ते ! रक्तोत्पलाङ्गि ! प्रतिवहसि सदा वाग्भवं कामराजं
हंसारूढे ! त्रिनेत्रे ! भगवति ! वरदे ! रक्ष मां देवि ! पद्मे ! ॥९

षट्कोणे चक्रमध्ये प्रणतवरयुते वाग्भवे कामराजे;
हंसारूढे सबिन्दौ विकसितकमले कर्णिकाग्रे निधाय ।
नित्ये क्लिन्ने मदद्रैर्द्रव इति सहितं साङ्कुशे ! पाशहस्ते !
ध्यानात्संक्षोभकारि त्रिभुवनवशकृद् रक्ष मां देवि ! पद्मे !॥१०

आँ क्रौँ ह्रीँ पञ्चबाणैर्लिखितषड्दले चक्रमध्ये सहंसः,
ह्स्क्लीँ श्रीँ पत्रान्तराले स्वरपरिकलिते वायुना वेष्टिताङ्गी ।
ह्रीँ वेष्टे रक्तपुष्पैर्जपति मतिमतां क्षोभिणी वीक्ष्यमाणा,
चन्द्रार्कं चालयन्ती सपदि जनहिते रक्ष मां देवि ! पद्मे ! ॥११

गर्जन्नीरदगर्भनिर्गततडिज्ज्वालासहस्रस्फुरत्;
सद्वज्राङ्कुशपाशपङ्कजधरा भक्त्याऽमरैरर्चिता ।
सद्यः पुष्पितपारिजातरुचिरं दिव्यं वपुर्बिभ्रती
सा मां पातु सदा प्रसन्नवदना पद्मावती देवता ॥ (शा.वि.) १२

जिह्वाग्रे नासिकान्ते हृदि मनसि दृशोः कर्णयोर्नाभिपद्मे,
स्कन्धे कण्ठे ललाटे शिरसि च भुजयोः पृष्ठपार्श्वप्रदेशे ।
सर्वाङ्गोपाङ्गशुद्ध्यान्यतिशयभवनं दिव्यरूपं स्वरूपम्
ध्यायामः सर्वकालं प्रणयलयगतं पार्श्वनाथेति शब्दम् ॥ १३

ब्रह्माणी कालरात्री भगवति वरदे ! चण्डि ! चामुण्डि ! नित्ये!
मातङ्गी गौरिधारी धृतिमतिविजये ! कीर्तिह्रीँ स्तुत्यपद्मे ! ।
सङ्ग्रामे शत्रुमध्ये ज्वलज्वलनजले वेष्टिते तैः स्वरास्त्रैः
क्षां क्षीं क्षूं क्षः क्षणार्द्धे क्षतरिपुनिवहे ! रक्ष मां देवि ! पद्मे !॥

भूविश्वेक्षणचन्द्रचन्द्रपृथिवीयुग्मैकसङ्ख्याक्रमात्,
चन्द्राम्भोनिधिबाणषण्मुखवशं दिक् खेचराशादिषु ।
ऐश्वर्यं रिपुमारविश्वभयकृत् क्षोभान्तराया विषाः
लक्ष्मीलक्षणभारती गुरुमुखान्मन्त्रानिमान्देवते ! ॥(शा.वि.)१५

खड्गैः कोदण्डकाण्डैर्मुशलहलकिणैर्वज्रनाराचचक्रैः,
शक्त्या शल्यैस्त्रिशूलै र्वरफणशफरैर्मुद्गरैर्मुष्टिदण्डैः ।
पाशैः पाषाणवक्षैर्वरगिरिसहितैर्दिव्यशस्त्रैरमानै-
र्दुष्टान् संहारयन्ती वरभुजललिते ! रक्ष मां देवि ! पद्मे ! ॥१६

यस्या देवैर्नरेन्द्रैरमरपतिगणैः किन्नरैर्दानवेन्द्रैः,
सिद्धैर्नागेन्द्रयक्षैर्नरमुकुटतटैर्घृष्टपादारविन्दे !॥

सौम्ये ! सौभाग्यलक्ष्मीदलितकलिमले ! पद्मकल्याणमाले !
अम्बे ! काले ! समाधिं प्रकटय
परमं रक्ष मां देवि ! पद्मे ! ॥ १७

धूपैश्चन्दनतण्डुलैः शुभमहागन्धैः समन्त्रालिकै-
र्नानावर्णफलैर्विचित्रसरसै र्दिव्यै र्मनोहारिभिः ।
पुष्पै र्नैवेद्यवस्त्रमनुभवनकरैर्भक्तियुक्तैः प्रदाता,
राज्ये हे त्वं गृहाण भगवति वरदे !
रक्ष मां देवि ! पद्मे ! ॥ (शा.वि.) १८

क्षुद्रोपद्रवरोगशोकहरणी दारिद्र्यविद्राविणी,
व्यालव्याघ्रहरा फणत्रयधरा देहप्रभाभास्वरा ।
पातालाधिपतिप्रियाप्रणयिनी चिन्तामणिः प्राणिनां,
श्रीमत्पार्श्वजिनेशशासनसुरी पद्मावती देवता ॥(शा.वि.)॥१९

तारा त्वं सुगतागमे भगवती गौरीति शैवागमे
वज्रा कौलिकशासने जिनमते पद्मावती विश्रुता ।
गायत्री श्रुतशालिनां प्रकृतिरित्युक्तासि साङ्ख्यागमे,
मातर्भारति ! किं प्रभूतभणितैर्व्याप्तं समस्तं त्वया ॥ (शा.वि.) २०

पाताले वसतां विषं विषधरा घूर्णन्ति ब्रह्माण्डजाः
स्वर्भूमीपतिदेवदानवगणाः सूर्येन्दवो यद्गणाः ।
कल्पेन्द्राः स्तुतिपादपङ्कजनता मुक्तामणिं चुम्बिता
सा त्रैलोक्यनता मता त्रिभुवने स्तुत्यास्तु(ता)वा सर्वदा ॥२१
(शा.वि.)

सञ्ज्ञप्ता कणवीररक्तकुसुमैः पुष्पैः समं सञ्चितैः,
सन्मिश्रैर्घृतगुग्गुलौघमधुभिः कुण्डे त्रिकोणे कृते ।

होमार्थं कृतषोडशाङ्गुलशता वह्नौ दशांशैर्जपेत्,
तं वाचं वचसीह देवि ! सहसा पद्मावती देवता ॥ २२
(शा.वि.)

ह्रीँकारैश्चन्द्रमध्ये पुनरपि वलयं षोडशावर्णपूर्णै-
र्बाह्या कण्ठैरवेष्ट्यं कमलदलयुतं मूलमन्त्रप्रयुक्तम् ।
साक्षात् त्रैलोक्यवश्यं पुरुषवशकृतं मन्त्रराजेन्द्रराजम्,
एतत्तत्त्वस्वरूपं परमपदमिदं पातु मां पार्श्वनाथः ॥ २३

प्रोत्फुल्लत्कुन्दनादे कमलकुवलयमालतीमाल्यपूज्ये,
पादस्थे भूधराणां कृतरणक्वणिते रम्यझङ्काररावे ।
गुञ्जत्काञ्चीकलापे पृथुलकटितटे तुच्छमध्यप्रदेशे
हा हा हुँकारनादे ! कृतकरकमले ! रक्ष मां देवि ! पद्मे ! ॥२४

दिव्ये पद्मे सुलग्ने स्तनतटमुपरि स्फारहारावलीके,
केयूरैः कङ्कणाद्यैर्बहुविधरचितैर्बाहुदण्डप्रचण्डैः ।
भाभाले वृद्धतेजःस्फुरन्मणिशतैः कुण्डलोद्घृष्टगण्डे ।
स्राँ स्रीँ स्रूं स्रः स्मरन्ती गजपतिगमने !
रक्ष मां देवि ! पद्मे ! ॥ २५

या मन्त्रागमवृद्धिमानवितनोल्लासप्रसादार्पणां,
या इष्टाशयक्लृप्तकार्मणगणप्रध्वंसदक्षाङ्कुशा ।
आयुर्वृद्धिकरां ज्वरामयहरां सर्वार्थसिद्धिप्रदाम् ।
सद्यः प्रत्ययकारिणीं भगवतीं पद्मावतीं संस्तुवे ॥(शा.वि.)२६

पद्मासना पद्मदलायताक्षी, पद्मानना पद्मकराङ्घ्रिपद्मा ।
पद्मप्रभा पार्श्वजिनेन्द्रशक्ता,
पद्मावती पातु फणीन्द्रपत्नी ॥ (इन्द्रवज्रा) २७

मातः पद्मिनि !, पद्मरागरुचिरे ! पद्मप्रसूनानने,
पद्मे ! पद्मवनस्थिते ! परिलसत्पद्माक्षिपद्मानने ! ।
पद्मामोदिनि ! पद्मकान्तिवरदे ! पद्मप्रसूनार्चिते,
पद्मोल्लासिनि ! पद्मनाभिनिलये ! पद्मावती पाहि माम् ॥ २८
(शा.वि.)

या देवी त्रिपुरा पुरत्रयगता शीघ्रासि शीघ्रप्रदा,
या देवी समया समस्तभुवने सङ्गीयते कामदा ।
तारा मानविमर्दिनी भगवती देवी च पद्मावती,
तास्ताः सर्वगतास्त्वमेव नियतं मायेति तुभ्यं नमः ॥ २९
(शा.वि.)

त्रुट्यच्छृङ्खलबन्धनं बहुविधैः पाशैश्च यन्मोचनम्,
स्तम्भे शत्रुजलाग्निदारुणमहीनागारिनाशे भयम् ।
दारिद्र्यग्रहरोगशोकशमनं सौभाग्यलक्ष्मीप्रदम्
ये भक्त्या भुवि संस्मरन्ति मनुजास्ते देवि ! नामग्रहम् ॥ ३०
(शा.वि.)

भक्तानां देहि सिद्धिं मम सकलमघं देवि ! दूरीकुरु त्वं,
सर्वेषां धार्मिकाणां सततनियततं वाञ्छितं पूरयस्व ।
संसाराब्धौ निमग्नं प्रगुणगणयुतं जीवराशिञ्च त्राहि,
श्रीमज्जैनेन्द्रधर्मं प्रकटय विमलं देवि ! पद्मावति ! त्वम् ॥३१

दिव्यं स्तोत्रं पवित्रं पटुतरपठतां भक्तिपूर्वं त्रिसन्ध्यम्,
लक्ष्मीसौभाग्यरूपं दलितकलिमलं मङ्गलं मङ्गलानाम् ।
पूज्यं कल्याणमालां जनयति सततं पार्श्वनाथप्रसादात्,
देवी पद्मावती नः प्रहसितवदना या स्तुता दानवेन्द्रैः ॥ ३२

पठितं भणितं गुणितं जय विजयरमानिबन्धनं परमम् ।
सर्वाधिव्याधिहरं जपतां पद्मावतीस्तोत्रम् ॥ ३३

(अनुष्टुप्)

आद्यञ्चोपद्रवं हन्ति, द्वितीयं भूतनाशनम् ।
तृतीयञ्चौरमारिं च, चतुर्थं रिपुनाशनम् ॥ ३४

पञ्चमन्तु जनानाञ्च वशीकारं भवेद् ध्रुवम् ।
षष्ठञ्चोच्चाटनं हन्ति सप्तमं घोरसङ्कटम् ॥ ३५

अत्युद्वेगञ्चाष्टमञ्च नवमं सर्वकार्यकृत् ।
इष्टा भवन्ति तेषाञ्च त्रिकालपठनार्थिनाम् ॥ ३६

आह्वानं नैव जानामि न जानामि विसर्जनम् ।
पूजाऽर्चे नैव जानामि त्वङ्गतिः परमेश्वरि ! ॥ ३७

अपराधसहस्राणि क्रियन्ते नित्यशो मया ।
तत्सर्वं क्षम्यतां देवि ! प्रसीद परमेश्वरि ! ॥ ३८

आज्ञाहीनं क्रियाहीनं मन्त्रहीनञ्च यत्कृतम् ।
तत्सर्वं क्षम्यतां देवि ! प्रसीद परमेश्वरि ! ॥ ३९

॥ अथाह्वानम् ॥

श्री पार्श्वनाथ ! जिननायक ! रत्नचूडा-
पाशाङ्कुशोरगफलाङ्कितदोश्चतुष्का ।
पद्मावती त्रिनयना त्रिफणावतंसा,
पद्मावती जयति शासनपुण्यलक्ष्मीः ॥ (वसन्ततिलका)॥ १

॥ अथ मन्त्रः ॥

ॐ आँ क्रौं ह्रीं अरुणवर्णसर्वलक्षणसम्पूर्णे !
स्वायुधवाहनबन्धुचिह्नसपरिवारे ! नमोऽस्तु ते हे पद्मावति !

देवि ! अत्र आगच्छ आगच्छ तिष्ठ तिष्ठ ठः ठः मम सन्निहिता भव भव वषट् ।

## ॥ अथ जयमाला ॥

पद्माकारदलं विशुद्धनयनं सत्तेजसा भास्करं
ह्रींबींजं जिनशासनीं भगवतीं भूजाचतुर्विंशतिः ।
त्रैलोक्यं भुवि चालयन्ति वपुषा दैत्यं निहन्त्यं सदा ।
हे देवि ! मम दुःखनाशनपरा तुभ्यं नमः स्तान् मुदा ॥ १

श्रीपार्श्वनाथवरसेवितचरणं पद्मावतीजनभवभयहरणम् ।
फणिपतिरक्षणदक्षिणसहितं भवजलतारण परभयरहितम् ॥२

वामभागविष्टपगणरक्षं दैत्यदानवभयनाशनदक्षम् ।
हंसारूढकुर्कटपाणिवाहं गमनं दुर्धर जनत्रयमोहम् ॥ ३

चतुर्विंशतिबाहुविराजं तेषामायुधविविधसुप्राजम् ।
दक्षिणकर वज्रायुधसोहे वाम भाग अंकुश मन मोहे ॥ ४

कमलचक्रछत्राङ्कितसारं डमरुकशोभा वामकरतारम् ।
चाम्रकपालखड्गधनुषकांसं बाणमुशलहलअरिशिरत्रासम् ॥५

शक्तिवह्निज्वालागणधरणं भिण्डमालावरशत्रुकशरणम् ।
तारामण्डलगगनविशालं दक्षिणकरशोभितत्रिशूलम् ॥ ६

फरसनागमुद्गरप्रचण्डं सव्यहस्तधृतवर्तनदण्डम् ।
नागपाशपाषाणविशालं अंह्रिपसणकल्पद्रुमजालम् ॥ ७

एवं आयुधग्रहणगरिष्ठं दुर्जनजम्बलनाशनदुष्टम् ।
कामिजनामनफलमभीष्टं पूजित पद्मावति देवी इष्टम् ॥ ८

षोडशाभरणालङ्कृतगात्रं कमलाकरवरशोभितनेत्रम् ।
चन्द्राननमुखममृततेजः रक्ताम्बरसुदयारसभाजम् ॥ ९

पद्मावती देवी चरणपवित्रं अष्टविधार्चनहेमसुपात्रम् ।
भावसहित पूजित नर नारी तेषां धणकणसंपत्ति भारी ॥ १०

घत्ता–

विविधदुःखविनाशी दुष्टदारिद्र्यपाशी
कलिमलभवक्षाली भव्यजीवकृपाली ।
असुरमदनिवारी देवनागेन्द्रनारी
जिनमुनिपदसेव्यं ब्रह्मपुण्याब्धिपूज्यम् ॥ ११

ॐ आँ क्रौँ ह्रीं मन्त्ररूपायै विश्वविघ्नहरणायै
सकलजनहितकारिकायै श्रीपद्मावत्यै जयमालार्थं
निर्वपामीति स्वाहा ।

लक्ष्मीसौभाग्यकरा जगत्सुखकरा वन्ध्यापि पुत्रार्पिता
नानारोगविनाशिनी अघहरात्रिकृपाजने रक्षिका ।
रङ्कानां धनदायिका सुफलदा वाञ्छार्थिचिन्तामणिः
त्रैलोक्याधिपतिर्भवार्णवत्राता पद्मावती पातु वः ॥ १२

इत्याशीर्वादः

स्वस्तिकल्याणभद्रस्तु क्षेमकल्याणमस्तु वः ।
यावच्चन्द्रदिवानाथौ तावत् पद्मावतीपूजा ॥ १३

ये जनाः पूजन्ति पूजां पद्मावती जिनान्विता ।
ते जनाः सुखमायान्ति यावन्मेरुर्जिनालयः १४

## ६०. ॥ श्रीपद्मावतीदण्डकस्तोत्रम् ॥

ॐ नमो भगवति ! त्रिभुवनवशंकरि ! सर्वाभरणभूषिते ! पद्मासने ! पद्मनयने ! पद्मिनीपद्मप्रभे ! पद्मकोशिनि ! पद्मवासिनि ! पद्महस्ते ! श्रीँ ह्रीँ कुरु कुरु, मम हृदयकार्यं कुरु कुरु, मम सर्वशान्तिं कुरु कुरु, मम सर्वराज्यवश्यं कुरु कुरु, सर्वलोकवश्यं कुरु कुरु, मम सर्वस्त्रीवश्यं कुरु कुरु, मम सर्वभूतपिशाचप्रेतरोषं हर हर, सर्वरोगान् छिन्द छिन्द, सर्व विघ्नान् भिन्द भिन्द, सर्वविषं छिन्द छिन्द, सर्वं कुरु कुरु मृगं छिन्द छिन्द, सर्वशाकिनीं छिन्द छिन्द श्री पार्श्वजिन-पादाम्भोजयुगाय नमः । ॐ ह्राँ ह्रीँ ह्रूँ ह्रौँ ह्रः श्री पार्श्व-नाथाय स्वाहा । सर्वजनराज्यस्त्रीपुरुषवश्यं सर्व सर्व ॐ आँ क्रौँ ह्रीँ श्रीँ ऐँ क्लीँ ह्रीँ देवि ! पद्मावति ! त्रिपुरकामसाधिनि ! दुर्जनमतिविनाशिनि ! त्रैलोक्यक्षोभिनि ! श्रीपार्श्वनाथोपसर्गहारिणि ! क्लीँ ब्लूँ मम दुष्टान् हन हन, मम सर्वकार्याणि साधय साधय हुँ फट् स्वाहा ॥

ॐ आँ क्रौँ ह्रीँ क्लीँ ह्सौँ पद्मे ! देवि ! मम सर्वजगद्वश्यं कुरु कुरु सर्वविघ्नान् नाशय नाशय पुरक्षोभं कुरु कुरु ह्रीँ संवौषट् स्वाहा ॥

ॐ आँ क्रौँ ह्रीँ द्राँ द्रीँ क्लीँ ब्लूँ सः ह्म्ल्व्र्यूँ

पद्मावति ! सर्वपुरजनान् क्षोभय क्षोभय
मम पादयोः पातय पातय आकर्षिणि ! ह्रीँ नमः ॥
ॐ आँ क्रौँ ह्रीँ अर्हं मम पापं फट् फट् दह दह-
हन हन पच पच पाचय पाचय हं ब्भं ब्भां क्ष्वीं-
हंस ब्भं वंह्य यहः क्षां क्षीं क्षूं क्षें क्षैं क्षों क्षं क्षः
क्षि ह्राँ ह्रीँ हं हें हों हौं हं हः हिः हिं द्रा द्रिँ
द्रावय द्रावय नमोऽर्हते भगवते श्रीमते ठः ठः मम
श्रीरस्तु पुष्टिरस्तु कल्याणमस्तु स्वाहा ॥

## ६१. ॥ श्रीपद्मावतीदेवीस्तोत्रम् ॥

(अनुष्टुप्)

ॐ नमोऽनेकान्त-दुर्वार-मत-सद्वंश-मानवे ।
जिनाय सकलाभिष्ट-दायिने कामधेनवे ॥ १

स्वस्ति श्रीजिनराज-मार्ग-कमले, प्रद्योत-सूर्यप्रभे;
स्वस्ति श्रीफणिनायिके ! सुरनराराध्ये जगन् मङ्गले ।
स्वस्ति श्रीकनकाद्रिसन्निभमहा,-सिंहासनालङ्कृते,
विद्यानामधिदेवते ! प्रतिदिनं मां रक्ष पद्माम्बिके ! ॥(शा.वि.)२

जय जय जगदम्बे ! मत्तकुम्भे ! नितम्बे !
हर हर दुरितं मे; स्वस्ति मानाभिरामे ।
नय नय जिनमार्गे, दुष्ट-घोरोपसर्गे
भव भव शरणं मे रक्ष मां देवि ! पद्मे ! ॥ (मालिनी) ३

(अनुष्टुप्)

ॐ ह्रीँ बीजं प्रणवोपेतं नमः स्वाहान्त-संयुतम् ।
देदिप्यमानं हृत्पद्मे ध्यायेऽभिष्टफलप्रदम् ॥ ४

तद्बीजं देवताकारं पञ्चानां कवचान्वितम् ।
गुरूपदेशतो ध्यायेत् पाप-दारिद्र-भञ्जनम् ॥ ५

ॐ नमस्ते महादेवी कल्याणी भुवनेश्वरी ।
चण्डी कात्यायनी गौरी जिनधर्म-परायणी ॥ ६

पञ्चब्रह्म-पदाराध्या पञ्च-मन्त्रोपदेशिनी ।
पञ्चव्रत-गुणोपेता पञ्च-कल्याण-दर्शिनी ॥ ७

नमः श्री स्तोतला नित्या त्रिपुरा काम्य-साधिनी ।
मदनोन्मालिनी विद्या, महालक्ष्मी सरस्वती ॥ ८

सारस्वतगणाधीशा सर्वशास्त्रोपदेशिनी ।
सर्वेश्वरी महादुर्गा त्रिनेत्री फणि-शेखरी ॥ ९

जटाबालेन्दु-मुकुटा कुक्कुटोरगवाहिनी ।
चतुर्मुखी महायशा, धनदेवी गुहेश्वरी ॥ १०

नागराज-महापत्नी, नागिनी नागदेवता ।
नमः सिद्धान्त-सम्पन्ना द्वादशाङ्गपरायणी ॥ ११

चतुर्दश-महाविद्या अवधिज्ञान-लोचना ।
वासन्ती वनदेवी च, वनमाला महेश्वरी ॥ १२

महाघोरा महारोद्रा वीतभीताऽभयङ्करी ।
कङ्काली कालरात्री च गङ्गा गान्धर्वनायकी ॥ १३

सम्यग्दर्शन-सम्पन्ना, सम्यग्-ज्ञान-परायणी ।
सम्यक्चारित्रसम्पन्ना, नराणामुपकारीणी ॥ १४

अगण्यपुण्यसम्पन्ना गणनी गणनायकी ।
पाताल-वासिनी पद्मा, पद्मास्या पद्मलोचना ॥ १५

प्रज्ञप्ति रोहीणी जृम्भा स्तम्भिनी मोहीनी जया ।
योगीनी योग-विज्ञानी मृत्यु-दारिद्र-भञ्जिनी ॥ १६

क्षमा सम्पन्नधरणी, सर्वपाप-निवारणी ।
ज्वालामुखी महाज्वाला-मालिनी वज्रशृङ्खला ॥ १७

नागपाशधरा धौर्या श्रेणीमानफलान्विता ।
हस्ता प्रशस्ता-विद्यार्या, हस्तिनी हस्ति-वाहिनी ॥ १८

वसन्तलक्ष्मी गीर्वाणी, शर्वाणि पद्म-विष्टरा ।
बालार्क-वर्ण-सङ्काशा शृङ्गार-रस-नायकी ॥ १९

अनेकान्तात्मतत्वज्ञा चिन्तितार्थ-फलप्रदा ।
चिन्तामयी कृपापूर्णा पापरम्भ-विमोचीनी ॥ २०

कल्पवल्ली समाकारा कामधेनुः शुभङ्करी ।
सद्धर्म-वत्सला-सर्वा सद्धर्मोत्सव-वर्धिनी ॥ २१

सर्व-पापोपशमनी सर्वरोग-निवारणी ।
गम्भीरा मोहनी सिद्धा शेफालीतरु-वासिनी ॥ २२

अष्टात्तरशतं स्तोत्र-रत्न-नामाङ्कमालिका ।
त्रिसन्ध्यं पठयेत् नित्यं पापदारिद्र्य-नाशनम् ॥ २३

दिनाष्टकं त्रिसन्ध्यं यो ध्यान-पूजा-जपान्वितम् ।
नामाङ्क-मालिका-स्तोत्रं पठेत् स वाञ्छितं लभेत् ॥ २४

दिव्यं स्तोत्रमिदं महासुखकरं चारोग्यसम्पत्करं
भूत-प्रेत-पिशाच-दुष्टहरणं पापौघ-संहारकम् ।
अन्येनार्पित-वाञ्छितस्य निलयं सर्वाप-मृत्युं जयं
देव्याः प्रीतिकरं कवित्वजनकं स्तोत्र जगन् मङ्गलम् ॥ २५

पू. आ. श्री जिनप्रभसूरिविरचिता

## ६२. ॥ श्रीपद्मावतीचतुष्पदिका ॥

जिनशासन अवधारि करेवि झायहुं सिरिपउमावइ देवी ।
भवियलोयआणंद करेउ दुलहउ सावयजम्म लहेउ ॥ १

मनरि मिच्छसूर अणुसरह ॥ आंचली ॥
पासनाहपयपंकयभसलि ! संघविघननिन्नासणकुसलि ! ।
ससिकरनिम्मलगुणगणपुण्ण !
पउमएवि ! मह होउ पसण्ण ! ॥ २

तारतरल तुह लोयण तिण्णि दुहदलणा भूयदुगण दुण्णि ।
पियसी पद्मरुहपविहत्थे वारण दीसे तुह हत्थी ॥ ३

फूलफालफणिमणिकरजाल दसदिसि पसरइ तुज्झ कराल ।
जिणिं दीठइं पडिबोहिय सहइ
विग्घ तिमिर जिणिं जग अवहरइ ॥ ४

कुंडलमंडलमंडियगल्ल अरिखंडणभुयदंडपयंड ।
घणथणघोलिरनिम्मलहार पउमावइ नंदउ जगि सार ॥ ५

नेउरझुणिबहिरियदिसिचक्क खग्गदंडखंडियरिउचक्क ।
मणिकंचणचंचुइअपउट्ठ पउमि होहि भवियह संतुट्ठ ॥ ६

मेहलमुहलियसोणिपएसि अलिकुलकोमलदीहरकेसि ।
जलधरणीदहउत्तमरमणि पउमएवि भू मयगलगमणि ॥ ७

पासंकुसवरपहरणपाणि तंबचूडविसहरवरझाणि ।
पउमपत्तसमवण्णसरीर ! पउमएवि मा मे अवहीर ॥ ८

भत्तिनमंतसुरासुररमणि मणिकिरीडकररंजियचलणि ।
किं भमई नरमित्त वराय आराहहू सुरवर तुह पाय ॥ ९

तालु ऐं च झंखर ललिय वीयउ ससिदल लहयलकीलउ ।
तुह बीयक्खर जो समरेइ मनवंछितफल सो पामेइ ॥ १०

भणइहि जोगी मज्झिम नीय धरि चित्तदक्खर सिरिगुरुरीय ।
जोडवि ससहर ईसर उड्ड तव कल जाणइ कोवि वियड्ड ॥ ११

भूअंतिल सुवच्छिम सहिय चिंतवि अंतिम पय परिगहिय ।
अड्डवि उड्डवि बिंदु धरेयवि
धण्ण झु झायइ पउमिणि देवि ॥ १२

सुण्ण जलण तुरियस्सरजुत्त अमियकिरणकलगयण पवित्त ।
गुरुउवएसिइं जवइ जु लक्ख पउमएवि तसु फुरइ पचक्ख ॥ १३

दिसिकालायण पल्लववण्ण मुद्दा जाणिवि जो कयपुण्ण ।
एह विज्जाचूडामणि सरइ कम्मछक्क ते लीलइ तरइ ॥ १४

संति पुट्ठि विद्देसण मोह मारण वसि उच्चाडणरोह ।
एउ वि झत्तिय लोयपयास कवण कवण न हु पुरइ आस ॥ १५

पढम पणव माया सम्भारि नमणउ अंतिए वण्ण वियारि ।
जो समरइ अणुदिण वरभावि
सव्वसिद्धि तसु परिणइ आवि ॥ १६

भूयपेयडाइणिगण डरइ सयलह दुज्जण मण परहरइ ।
एह विज्जु समरंतइ लोइं भम्मदा य पुहवी सिर होइ ॥ १७

विज्जा एसा लोक्कपहाण चिंतामणि कप्पद्दुसमाण ।
पहु जिणदत्तसूरि उवएसि थंभइ परबल अद्धनिवेसिं ॥ १८

हंसगमणि नीलुप्पलनयणि कुंददसणि पुण्णिमससिवयणि ।
बहुखयणी मुणसहरणि नवकिसलयकोमलवरचरणि ॥ १९

पीणसिहिणभारोण्णयअङ्गि हावभावसिंगारसुचंगि ।
एकक्खरि जे नर समरंति ताहं तियसकामिणि वय हुंति ॥२०

देउ पाप पउमिणि धरणिंदु बारस परजुयहरिकलबिंदु ।
पउम पउमकडिनी नम अन्त सयलकाम तुह पूरइ मन्त ॥२१

जंभ थंभ मोहे धमयंति जय अपराजिय विजय जयन्ती ।
चण्डी भइरव तोतल ताल सहइ इक्कच्चिय विविहपयार ॥ २२

खित्तवाल जोइणि चउसट्ठि भूयपेयडाइणिगहदिट्ठि ।
अवरवि दुद्धर विग्घ जि केवि
नामगहणिं नासइ तुह देवि ! ॥ २३

जे धण्णंतरि विज्झ असज्झ ते उवादि एहु सामि सुसज्ज ।
नीर जलण थंभइ तुह आण समरंगिणि वारइ अरिबाण ॥२४

पइसट्ठी जंति च्चिइ भुवणि भइवइ सम्मतु लंभिय सवणि ।
कंपइ धरणीयल धणई लडफडंति दस दिसि माइ ॥ २५

कुलपव्वय सत्तवि टलटलइ अनु सत्तवि जलनिहि उच्छलइ ।
किडि किडिंत उक्कड किडि दाढ
भज्जइ फणिवइ फण अइगाढ ॥ २६

दढ गढ गिरिवर खडहडि पडइ सुरनर जीविय संसइं चडइ ।
हल्लोहल्लिइं जलहरपूर घुम्मइ तारायण ससिसूर ॥ २७

पइं तुट्टिं जापिच्चरइ भूयणि पउमिणि समरइ तनी सवणि ।
भक्खइ भुजु अट्ठारसभेउ भुंजिज्जइ पिज्जइ वरपेउ ॥ २८

पहिरिज्जइ कप्पडे वरसार कंचण कुंडल मोतीहार ।
सम्माणिज्जइ वर तंबोल सम्मइ बंदीयण हलबोल ॥ २९

चंदणमयणाहिघुसिणघणसार किज्जइ सुरहि विलेवणसार ।
घरि बज्झइ तुरियहं थट्टि दीसइ मयभंभलदोघट्टि ॥ ३०

रहवरकरिजंगमसुर जाण उलग्गइ....इक्कपहाण ।
अणुसलिसइं चामरक्त भाणिज्जइ माणिणि अणुरत्त ॥ ३१

ससहरकल बारससरजुत्त थावरजंगमविसहरतत्त ।
हंसहारहरससहरकंति नाम गहणिं तुह दयफ्ल हुंति ॥ ३२

वंझनारि तुह पय झायंति सुरकुमरोवम पुत्त लहंति ।
निंदू नंदण जणइ चिराउ दूहव पावइ वल्लह राउ ॥ ३३

चिंतियफ्ल चिंतामणि मंति तुज्झ पसायिं फ्लइ नियंतु ।
तुल्ल अणुग्गह नर पिक्खेवि सिज्झइ सोलह विज्जाएवि ॥३४

रूपकंतिसोहग्गनिहाण निव पूइयपय अमिलियमाण ।
कविवाईसर हुंति ते धण्ण जाहं पउमि ! तु होहि पसण्ण ॥३५

तुह गुण अंत न केणवि मुणिय तहवि तुज्झ मइं गुणलव थुणिय ।
आण जु पालइ जिणसिंघ सूरि तार्य संघमणवंछियपूरि ॥ ३६

पउमावई चउपई पढंत होइ पुरिस तिहुयणसिरिकंत ।
रम्म भणइ नियजसकप्पूरि सूरदीय भवण जिणप्पहसूरि ॥३७

## ६३. ॥ श्रीपद्मावतीदेवी चउमुक्षदिका ॥

पणमवि सवि अरिहंत मुणिंद मनि समरे जिण पास जिणंद ।
मंत तंत अक्षर संजुत्त पभणीसु पउमाएवी थुत्त ॥ १

पासनाह पयपंकज भत्ति धरणिराय दईयाय सत्ति ।
सेव दिणयर पयपंकजभत्ति पउमदेवी समरीस निय चित्ति ॥२

पुत्तकलत्त सजण परिवार गयवर हयवर रह भंडार ।
ज्झाउ मनि धरणिंद वहू पामउं जिमए निंच्चि सहुः ॥ ३

डायण भूय पेय वेताल दुट्ठकुट्ठ दुजण जंजाल ।
सिंह सप्प वयराय सवि ठांम नवि पहुचै पउमिणीनै नामि ॥४

पुत्तहीण जे मांगै पुत्त वित्तहीण जो पामइ वित्त ।
मइ विहीण जे वंछै मइ देइ स तुट्ठि पउमावइ ॥ ५

माया अक्षर तुम्ह नामेण दुष्ट पडल वारै दूरेण ।
जइ पुण पुणि वह सिरसंजुत्त, देइ पउमदेवी बहु पुत्त ॥ ६

हियै कमल आदीसर कंठ, कंठि वीर अलि अलजिणशंत ।
मुह चंदप्पह मच्छइ पास, पउमएवी सवि पूरे आस ॥ ७

लक्ख एक मंतक्खर कर जुत्ति, पउमदेवी जै समरै भत्ति ।
विहि लियकय सिरि सुंदरी वग्ग, पसरै तसु गुरुओ सोहग्ग ॥८

संज्झराय कुंकुम सिंदूर, रत्नकांति निज्झिय नव सूर ।
ज्झाणंतरि सामण संचरइ, तह वसि सयल भुवण वित्थरइ ॥९

च्यार अट्ठ अक्षर विस्तार, लिखि पुत्त दिइ निय घरिबार ।
दुठ्ठ दिठ्ठ तक्खर उवशांति, पउमादेवी कुणै निज्झंति ॥ १०

पढम वन्न अक्षर परिमलीय, ईसर खंड बिसिं कलिय ।
अवर नाम पउमावइ तणुं, धण कण कंचण पूरै घणुं ॥ ११

पासनाह धरणिंद फणिवइ, सुगुरुवयण सिरि पउमावइ ।
जे आराहै नित नरनारि, सव्वसिद्धि वसै तिय घरबारि ॥१२

मंत तंत अक्षर मेलेवि, मइ आराहि पउमादेवि ।
ऋद्धिवृद्धि मंगल सुख घणां, पूरे इसी मनवांछित तणां ॥१३

॥ इति श्रीपद्मावतीदेवी चउमुक्षदिका ॥

पू.आ.श्री मुनिसुन्दरसूरिविरचितम्

श्रीसूरिमन्त्रपञ्चमपीठाधिष्ठात्री-

## ६४. ॥ श्रीचक्रेश्वरीदेवीस्तोत्रम् ॥

(अनुष्टुप्)

जय श्रीमद्युगादीशपदपद्ममधुव्रते ।
सुरेन्द्रादिसुरश्रेणिश्लाघ्यसद्गुणविक्रमे ॥ १

जय श्रीदेवदेवेन्द्रप्रशस्यगुणविक्रमे ।
श्रीयुगादिजगन्नाथक्रमाम्भोजमधुव्रते ॥ २

चक्रवित्रासिताशेषरिपुचक्रपराक्रमे ।
चक्रेश्वरि सूरिवृन्दवन्द्यमानक्रमाम्बुजे ॥ ३

तीर्थप्रवृत्तिहेतुश्रीसूरिमन्त्रस्य पञ्चमे ।
मन्त्रराजाभिधे स्थाने सुप्रतिष्ठे महाबले ॥ ४

वरदेष्वरिपाशाङ्कितापसव्यचतुर्भुजे ।
सत्त्वाह्लादिनी(नि)हे चक्राङ्कुशसव्यचतुःशये ॥ ५

सुपर्णवाहने श्रीमद्गौतमोपास्तिलालसे ।
स्वर्णवर्णे सदोद्भासिसारालङ्काररराजिते ॥ ६

सूरिभिः सततं ध्येये तेषामिष्टप्रसाधिके ।
सर्वविघ्नावलीघातनिघ्ने रक्षापरे सदा ॥ ७

चतुर्विधस्य सङ्घस्य सर्वोपद्रवनाशिनि ।
समाधानं सुबोधिं च सदा देहीष्टदे मम ॥ ८

स्तूयमान महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयाप्यभीष्टासिं चक्रेश्वरि विधेहि मे ॥ ९

पू. आ. श्री जिनदत्तसूरिविरचितम्

## ६५. ॥ श्रीचक्रेश्वरीदेवीस्तोत्रम् ॥

(शार्दूलविक्रीडित)

श्रीचक्रेश्वरि चक्रचुम्बितकरे चञ्चच्चलत्कुण्डला-
लङ्कारे कृतमस्तकोरुमुकुटे ग्रैवेयकालङ्कृते ।
स्फारोदारभुजाग्रभूषणकरे सन्नूपुरैर्बन्धुरे
मातर्मन्ति नयं स्वमिष्टविनयं त्रायस्व सन्त्रासतः ॥ १

श्रीचक्रेश्वरी चन्द्रमण्डलमिव ध्वस्तान्धकारोत्करं
भव्यप्राणिचकोरचुम्बितकरं सन्तापसम्पद्धरम् ।
सम्यग्दृष्टिसुखप्रदं सुविशदं कान्त्यास्पदं सम्पदां
पात्रं जीवमनःप्रसादजनकं भाति त्वदीयं मुखम् ॥ २

श्रीचक्रेश्वरी युष्मदाननरविं पश्यन्ति नैवोदितं
ध्वस्तध्वान्ततातिं प्रदत्तसुगतिं सम्प्राप्तमार्गस्थितिम् ।
ते ज्ञेया इह कौशिका इव जना हेयाः सतां सर्वथा
नादेयाः कुदृशो भवन्ति भगवत्युच्चैःशिवं वाञ्छताम् ॥ ३

श्रीचक्रेश्वरी युष्मदङ्घ्रिचरितं सर्वत्र तद्विश्रुतं
कस्याज्ञस्य मनोमुदे भवति नो निष्पुण्यचूडामणेः ।
कारुण्यान्वितमङ्गिसम्मतमतिभ्रान्तिप्रशान्तप्रियं
श्रीसङ्केतगृहं सदास्तविरहं पुण्यानुबन्धि स्फुटम् ॥ ४

श्रीचक्रेश्वरि ये स्तुवन्ति भवतीं भव्या भवद्भक्तयः
श्रीसर्वज्ञपदारविन्दयुगले विश्राममातन्वतीम् ।
भृङ्गीवत्सदृशां सुखं त्वसदृशं सम्प्रार्थयन्तो जना-
स्ते स्युर्ध्वस्तविपत्तयः सुमतयः स्पष्टं जितारातयः ॥ ५

श्रीचक्रेश्वरि नित्यमेव भवतीनामाऽपि ये सादरं
सन्तः सत्यशमाश्रिताः प्रतिपदं सम्यक् स्मरन्ति स्फुरत् ।
तेषां किं दुरितानि यान्ति निकटे नायाति किं श्रीर्गृहे ।
नोपैति द्विषतां गणोऽपि विलयं नाऽभीष्टसिद्धिर्भवेत् ॥ ६

श्रीचक्रेश्वरि ये भवन्ति भवतीपादारविन्दाश्रिता-
स्ते भृङ्गा इव कामितार्थमधुनः पात्रं सदैवाङ्गिनः ।
जायन्ते जगति प्रतीतिभवनं भव्याः स्फुरत्कीर्त्तय-
स्तेषां क्वापि कदापि सा भवति नो दारिद्र्यमुद्रा गृहे ॥ ७

श्रीचक्रेश्वरि यः स्तवं तव करोत्युच्चैः स किं मानवः
कस्मादन्यजनाच्च याचत इह क्लेशैर्विमुक्ताशयः ।
कासश्वासशिरोगलग्रहकटीवातातिसारज्वर-
स्रोतोनेत्रगतामयैरपि न स श्रेयानिह प्रार्थते ॥ ८

श्रीचक्रेश्वरि शासनं जिनपतेस्तद्रक्षसि त्वं मुदा
ये केचिज्जिनभाषितान्यवितथान्युच्चैः प्रजल्पन्ति च ।
भव्यानां पुरतो हितानि कुरुषे तेषां तु तृष्टिं सदा
क्षुद्रोपद्रवविद्रवं प्रतिपदं कृत्वा कृतान्तादपि ॥ ९

श्रीचक्रेश्वरि विश्वविस्मयकरी त्वं कल्पवृक्षोपमा
धत्सेऽभीष्टफलानि वस्तुनिकृतिं दत्से विना संशयम् ।
तेन त्वं विनुता मयाऽपि भवती मत्वेति मन्निश्चयं
कुर्याः श्रीजिनदत्तभक्तिषु मनो मे सर्वदा सर्वथा ॥ १०

## ६६. ॥ श्रीचक्रेश्वरीदेवीस्तुतिः ॥

(स्रग्धरा)

श्रीचक्रे ! चक्रभीमे ! ललितवरभुजे ! लीलया लोलयन्ती
चक्रं विद्युत्प्रकाशं ज्वलितशितशिखं खे खगेन्द्राधिरूढे ! ।
तत्त्वैरुद्भूतभावे सकलगुणनिधे ! त्वं महामन्त्रमूर्ते !
क्रोधादित्यप्रतापे ! त्रिभुवनमहिते ! पाहि मां देवि ! चक्रे ! ॥१

क्लीँ क्लीँ क्लीँकारचित्ते ! कलिकलिवदने ! दुन्दुभीभिमनादे !
ह्राँ ह्रीँ ह्रः सः खबीजे ! खगपतिगमने मोहिनी शोषिणी त्वम् ।
तच्चक्रं चक्रदेवी भ्रमसि जगति दिक्चक्रविक्रान्तकीर्ति-
र्विघ्नौघं विघ्नयन्ती विजय जयकरी पाहि मां देवि ! चक्रे ! ॥२

श्राँ श्रीँ श्रूँ श्रः प्रसिद्धे ! जनितजनमनःप्रीतिसन्तोषलक्ष्मीं
श्रीवृद्धिं कीर्तिकान्तिं प्रथयसि वरदे ! त्वं महामन्त्रमूर्तिः[र्ते] ।
त्रैलोक्यं क्षोभयन्तीमसुरभिदुरहुङ्कारनादैकभीमे !
क्लीँ क्लीँ क्लीँ द्रावयन्ती हुत-
कनकनिभे पाहि मां देवि ! चक्रे ! ॥ ३

वज्रक्रोधे ! सुभीमे ! शशधरधवले ! भ्रामयन्ती सुचक्रं
ह्राँ ह्रीँ ह्रूँ ह्रः कराले ! भगवति ! वरदे ! रुद्रनेत्रे ! सुकान्ते ! ।
आँ इँ ॐ भीषयन्ती त्रिभुवनमखिलं तत्त्वतेजःप्रकाशि
क्षाँ क्षीँ क्षुँ क्षोभयन्ती विषम-
विषयुते ! पाहि मां देवि ! चक्रे ! ॥ ४

ॐ ह्रीँ ह्रूँ ह्रः सहर्षं हरहसितसिते चक्रसङ्काशबीजे !
ह्राँ ह्रीँ ह्रूँ यः (ह्रः)क्षीरवर्णे ! कुवलयनयने ! विद्रवं द्रावयन्ती।
ॐ ह्रौँ ह्रः क्षः त्रिलोकीममृतजरजरैर्वारणैः प्लावयन्ती

ज्वाँ ज्वीँ ज्वौँ सत्त्वबीजे ! प्रलय-
विषयुते पाहि मां देवि ! चक्रे ! ॥ ५

आँ आँ आँ ह्रीँ युगान्ते प्रलयदिनकरे कारकोटिप्रतापे !
चक्राणि भ्रामयन्ती विमलवरभुजे पद्ममेकं फलं च ।
सच्चक्रे कुङ्कुमाङ्गैर्विधृतविनिरुहं तीक्ष्णरौद्रप्रचण्डे
ह्राँ ह्रीँ ह्रीँकारकारीरमरगणतवो(वो?) पाहि मां देवि ! चक्रे ! ॥६

श्राँ श्रीँ श्रूँ श्रः सवृत्तिस्त्रिभुवनमहिते नादविन्दुत्रिनेत्रे
वं वं वं वज्रहस्ते ललललललिते नीलशोनीलकोषे ।
चं चं चं चक्रधारी चलचलकलिते नूपुरालीढलोले
त्वं लक्ष्मीं श्रीसुकीर्तिं सुरवरविनते पाहि मां देवि ! चक्रे ! ॥७

ॐ ह्रीँ हूँकारमन्त्रे कलिमलमथने तुष्टिवश्याधिकारे
ह्रीँ ह्रौँ ह्रः यः प्रघोषे प्रलययुगजटीज्ञेयशब्दप्रणादे ।
याँ याँ याँ क्रोधमूर्ते ! ज्वलज्वलज्वलिते ज्वालसञ्ज्वाललीढे
आँ ईँ ऊँ अः प्रघोषे प्रकटितदशने पाहि मां देवि ! चक्रे ! ॥८

यः स्तोत्रं मन्त्ररूपं पठति निजमनोभक्तिपूर्वं श्रृणोति
त्रैलोक्यं तस्य वश्यं भवति बुधजनो वाक्पटुत्वञ्च दिव्यं ।
सौभाग्यं स्त्रीषु मध्ये खगपतिगमने गौरवं त्वत्प्रसादात्
डाकिन्यो गुह्यकाश्च विदधति न भयं चक्रदेव्याः स्तवेन ॥ ९

पू.आ.श्री जिनेश्वरसूरिविरचिता

## ६७. ॥ श्रीअम्बिकादेवीस्तुतिः ॥

देवगन्धर्वविद्याधरैर्वन्दिते जय जयामित्रवित्रासने विश्रुते ।
नूपुरारावसुनिरुद्धभुवनोदरे मुखरतरकिङ्किणीचारुतारस्वरे ॥१

ॐ ह्रीँ मन्त्ररूपे शिवे शङ्करे
अम्बिके देवि ! जय जन्तुरक्षाकरे ।
स्फुरत्तारहारावलीराजितोरःस्थले
कर्णताडङ्करुचिरम्यगण्डस्थले ॥ २

स्तम्भिनी मोहिनी ईश उच्चाटने
क्षुद्रविद्राविणी दोषनिर्णाशिनी ।
जम्भिनी भ्रान्तिभूतग्रहस्फोटिनी
शान्तिधृतिकीर्तिमतिसिद्धिसंसाधिनी ॥ ३

ॐ महामन्त्रविद्येऽनवद्ये स्वयं
ह्रीँ समागच्छ मे देवि दुरितक्षयम् ।
ॐ प्रचण्डे प्रसीद प्रसीद क्षणं
(हे) सदानन्दरूपे विधेहि क्षणम् ॥ ४

ॐ नमो देवि दिव्येश्वभे भैरवे
जयेऽपराजिते तप्तहेमच्छवे ! ।
ॐजगज्जननि संहारसम्मार्जनी
ह्रीँ कूष्माण्डि ! दिव्याधिविध्वंसिनी ॥ ५

पिङ्गतारोत्पतद्भीमकण्ठीरवे
नाममन्त्रेण निर्णाशितोपद्रवे ।

अवतरावतर रैवतकगिरिनिवासिनि
अम्बिके ! जय जय त्वं जगत्स्वामिनी ॥ ६

ह्रीँ महाविघ्नसङ्घातनिर्णाशिनी
दुष्टपरमन्त्रविद्याबलच्छेदिनी ।
हस्तविन्यस्तसहकारफललुम्बिका
हरतु दुरितानि देवी ! जगत्यम्बिका ॥ ७

इति जिनेश्वरसूरिभिरम्बिका
भगवती शुभमन्त्रपदैः स्तुता ।
प्रवरपात्रगता शुभसम्पदं
वितरतु प्रणिहन्त्वशिवं मम ॥ (द्रुतविलम्बित) ८

महामात्य श्री वस्तुपालविरचितम्

## ६८. ॥ श्रीअम्बिकादेवीस्तवनम् ॥

(वसन्ततिलका)

पुण्ये गिरीशशिरसि प्रथितावतारा-
मासूत्रितत्रिजगतीदुरितापहाराम् ।
दौर्गत्यपातिजनताजनितावलम्बा-
मम्बामहं महिमहैमवतीं महेयम् ॥ १

यद्वक्त्रकुञ्जरहरोद्गतसिंहनादोऽ-
प्युन्मादिविघ्नकरियूथकथाममाथम् ।
कूष्माण्डि ! खण्डयतु दुर्विनयेन कण्ठः
कण्ठीरवः स तव भक्तिनतेषु भीतिम् ॥ २

कूष्माण्डि ! मण्डनमभूत्तव पादपद्म-
युग्मं यदीयहृदयावनिमण्डलस्य ।

पद्मालया नवनिवासविशेषलाभ-
लुब्धा न धावति कुतोऽपि ततः परेण ॥ ३

दारिद्र्यदुर्दमतमःशमनप्रदीपाः
सन्तानकाननघनाघनवारिधाराः ।
दुःखोपतप्तजनबालमृणालदण्डाः
कूष्माण्डि ! पान्तु पदपद्मनखांशवस्ते ॥ ४

देवि ! प्रकाशयति सन्ततमेष कामं
वामेतरस्तव करश्चरणानतानाम् ।
कुर्वन् पुरः प्रगुणितां सहकारलुम्बि-
मम्बे ! विलम्बविकलस्य फलस्य लाभम् ॥ ५

हन्तुं जनस्य दुरितं त्वरिता त्वमेव
नित्यं त्वमेव जिनशासनरक्षणाय ।
देवि ! त्वमेव पुरुषोत्तममाननीया
कामं विभासि विभया सभया त्वमेव ॥ ६

तेषां मृगेश्वरगरज्वरमारिवैरि-
दुर्वारवारणजलज्वलनोद्भवा भीः ।
उच्छृङ्खलं न खलु खेलति येषु धत्से
वात्सल्यपल्लवितमम्बकमम्बिके ! त्वम् ॥ ७

देवि ! त्वदूर्जितजितप्रतिपन्थितीर्थ-
यात्राविधौ बुधजनाननरङ्गसङ्गि ।
एतत्त्वयि स्तुतिनिभाद्भुतकल्पवल्ली-
हल्लीसकं सकलसङ्घमनोमुदेऽस्तु ॥ ८

वरदे ! कल्पवल्लि ! त्वं स्तुतिरूपे ! सरस्वति ! ।
पादाग्रानुगतं भक्तं लम्भयस्वातुलैः फलैः ॥ (अनुष्टुप्) ९

स्तोत्रं श्रोत्ररसायनं श्रुतसरस्वानम्बिकायाः पुर-
श्चक्रे गूर्जरचक्रवर्तिसचिवः श्रीवस्तुपालः कविः ।
प्राप्तः प्रातरधीयमानमनघां यच्चित्तवृत्तिं सता-
माधत्ते विभुतां च ताण्डवयति श्रेयःश्रियं पुष्यति ॥ (शा.वि.) १०

## ६९. ॥ श्रीअम्बिकाष्टकम् ॥

(स्रग्धरा)

व्यालोलालम्बमानप्रवणरणझणत्किङ्किणीक्वाणरम्यं
ध्वस्तध्वान्तं समन्तान्मणिकिरणगणाडम्बरोल्लासितेन ।
देवी दिव्यांशुकानां ध्वजपटपटलैः शोभमानं विमानं
लीलारूढा भ्रमन्ती भुवनकृतनतिः पातु मामम्बिका सा ॥ १

या देवी दिव्यदामाञ्चितचिकुरभरामोदमुग्धालिमाला-
भास्वन्माणिक्यमालामिलदमलमहोमण्डलीमण्डिताङ्गा ।
सन्मुक्तातारहारैर्गगनतलगतास्तारकास्तर्जयन्ती
वज्रालङ्कारभासा हसितरविकरा पातु मामम्बिका सा ॥ २

या कौबेरं विहाय स्वपतिपरिभवात् साधुदानप्ररूढात्
स्थानं श्रान्तातिमार्गे श्रमशमनकृते संश्रिता चूतवृक्षम् ।
क्षुत्क्षामौ वीक्ष्य पुत्रौ कृतसुकृतवशात् प्रार्थयन्ती फलानि
क्षिप्रं सम्प्राप तानि स्वचरितमुदिता पातु मामम्बिका सा ॥ ३

देवी याऽत्रोपविष्टा सरणिगतपतिं वीक्ष्य कम्पं दधाना
स्मृत्वा श्रीरैवताद्रिं व्यवसितमरणा साधुधर्मं स्मरन्ती ।
आरुह्योत्तुङ्गशृङ्गं प्रपतनविधिना दिव्यदेवत्वमाप्ता
जैनेन्द्रे पादपीठे सततनतशिराः पातु मामम्बिका सा ॥ ४

या पश्चात्तापतप्तं गतमदमदनं दुष्कृतं स्वं स्मरन्ती
दंष्ट्रास्यं पिङ्गनेत्रं खरनखरकरं केसरालीकरालम् ।
पुच्छाच्छोटप्रकम्पावनिवलयतलं दिव्यसिंहं स्वकान्तं
संरूढा याति नित्यं जिनपतिनिलये पातु मामम्बिका सा ॥ ५

सान्द्राम्रालुम्बिहस्ता तरलहरिगता बालकाभ्यामुपेता
ध्याता या सिद्धकामैर्विघटितडमरा साधकैर्भक्तियुक्तैः ।
रक्ता रागानुरक्तैः स्फटिकमणिनिभा क्लेशविध्वंसधीभिः
पीता वश्यानुभावैर्विहितजनहिता पातु मामम्बिका सा ॥ ६

देवी विद्याधरेन्द्रासुरसुरमनुजैर्वन्द्यपादारविन्दा
प्रत्यूहान्निक्षिपन्ती क्षपितकलिमला बिभ्रती विश्वरक्षाम् ।
जैनेन्द्रं शासनं या प्रकटयति महोत्साहशक्त्या स्वभक्त्या
नित्यं नाम्ना नराणां विशदशिवफला पातु मामम्बिका सा ॥ ७

एवं वृत्ताष्टकेन स्तुतिमुखरमुखः संस्तुतिं यः करोति
ध्यानाधीनान्तरात्मा प्रशममुपगतो नित्यमेकाग्रचित्तः ।
प्रातर्मध्ये निशायां शयनतलगतो यत्र कुत्रापि संस्थो
देवी तस्य प्रकामं प्रकटयति पटुं प्रौढमम्बा प्रसादम् ॥ ८

## ७०. ॥ श्रीअम्बिकादेवीस्तुतिः ॥

(स्रग्विणी)

ॐ महातीर्थरैवतगिरिमण्डने !
जैनमार्गस्थिते ! विघ्नभीखण्डने ! ।
नेमिनाथाङ्घ्रिराजीवसेवापरे !
त्वं जयाम्बे ! जगज्जन्तुरक्षाकरे ! ॥ १

ह्रीँ महामन्त्ररूपे ! शिवे ! शङ्करे !
देवि ! वाचालसत्किङ्किणीनूपुरे ! ।
तारहारावलीराजितोरःस्थले !
कर्णताडङ्करुचिरम्यगण्डस्थले ! ॥ २

अम्बिके ! ह्राँ स्फुरद्बीजविद्ये ! स्वयं
ह्रीँ समागच्छ मे देहि दुःखक्षयम् ।
ह्राँ ह्रूँ तं द्रावय द्रावयोपद्रवान्
ह्रीँ द्रुहि क्षुद्रसर्पेभकण्ठीरवान् ॥ ३

क्लीँ प्रचण्डे ! प्रसीद प्रसीद क्षणं
ब्लूँ सदा प्रसन्ने ! विधेहीक्षणम् ।
सः सतां दत्तकल्याणमालोदये !
ह्स्क्ल्ह्रीं नमस्तेऽम्बिके ! अङ्कस्थपुत्रद्वये ॥ ४

इत्थमद्भुतमाहात्म्यमन्त्रस्तुते !
क्रौँसमालीढषट्कोणयन्त्रस्थिते ! ।
ह्रीँयुतेऽम्बे ! मरुन्मण्डलालङ्कृते !
देहि मे दर्शनं ह्रीँ त्रिरेखावृते ! ॥ ५

नाशिताशेषमिथ्यादृशां दुर्मदे !
शान्तिकीर्तिद्युतिस्वस्तिसिद्धिप्रदे ! ।
दुष्टविद्याबलोच्छेदनप्रत्यले !
नन्द नन्दाम्बिके ! निश्चले ! निर्मले ! ॥ ६

देवि ! कूष्माण्डि ! दिव्यांशुके ! भैरवे !
दुःसहे दुर्जये ! तप्तहेमच्छवे ! ।
नाममन्त्रेण निर्नाशितोपद्रवे !
पाहि मामंह्रिपीठस्थकण्ठीरवे ! ॥ ७

देवदेवीगणैः सेविताङ्घ्रिद्वये
जागरूकप्रभावैकलक्ष्मीमये ! ।
पालिताशेषजैनेन्द्रचैत्यालये !
रक्ष मां रक्ष मां देवि ! अम्बालये ! ॥ ८

अत्र स्तुतौ गुप्तीकृतो मन्त्रस्त्वेवम्-
ॐ ह्रीँ अम्बिके ! ह्राँ ह्रीँ ह्राँ ह्रीँ क्लीँ ब्लूँ सः ह्स्क्लह्रीँ नमः ।

# ७१. ॥ श्रीमहालक्ष्मीस्तोत्रम् ॥

(अनुष्टुप्)

नमोऽस्तु महामाये, श्रीपीठे सुरपूजिते ।
शंखचक्रगदाहस्ते, महालक्ष्मी नमोऽस्तु ते ॥ १

सर्वज्ञे सर्ववरदे, सर्वदुष्टभयङ्करि ।
सर्वदुःखहरे देवि !, महालक्ष्मी नमोऽस्तु ते ॥ २

सिद्धि बुद्धि प्रदे देवि ! भुक्ति मुक्ति प्रदायिनी ।
मन्त्ररूपे सदा देवि ! महालक्ष्मी नमोऽस्तु ते ॥ ३

आद्यन्तरहिते देवि ! आद्यशक्ति परमेश्वरि ।
योगजे योगसंभूते, महालक्ष्मी नमोऽस्तु ते ॥ ४

पद्मासनस्थिते देवि ! परब्रह्म स्वरूपिणि ।
परमेशिजगन्माता, महालक्ष्मी नमोऽस्तु ते ॥ ५

पद्मावती पद्मवने, मालती मालतीवने ।
कुन्ददन्ती कुन्दवने, सुशीला केतकीवने ॥ ६

ॐ क्लीं अमृतानन्दवने, सद्य आनन्ददायिनी ।
ॐ ह्रीँ दैत्यभक्षरदां, शक्तिमालिनी शत्रुमर्दिनी ॥ ७

सूर्यकोटि प्रतीकाशं, चन्द्रकोटि समप्रभम् ।
तन्मध्ये नेकरे सुक्ष्मं, वज्ररूप व्यवस्थितम् ॥ ८

ॐकारा परमानन्दं, क्रियते सुखसम्पदाम् ।
सर्वमङ्गलमाङ्गल्ये, देवि सर्वार्थसाधिके ॥ ९

वन्दे पद्मकरां प्रसन्नवदनां, सौभाग्यदां भाग्यदाम् ।
हस्ताभ्यामभयप्रदां, मणिगणैर्नानाविधैर्भूषिताम् ॥ १०

कदम्बमाला त्वं देवि !, कदम्बकाननेऽपि च ।
राजलक्ष्मी राजगेहे, गृहलक्ष्मी गृंहे गृहे ॥ ११

त्वं सिद्धिस्त्वं स्वधा स्वाहा, सुधा त्वं लोकपावनी ।
सन्ध्या रात्रिः प्रभा मूर्तिः, मेधा श्रद्धा सरस्वती ॥ १२

ॐकार लक्ष्मीरूपेण, विष्णो हृदयमव्ययम् ।
विष्णुमानन्दमध्यस्थं ह्रीँकार बीजरूपिणि ॥ १३

पीताम्बरधरां देवी, नानालङ्कारभूषिताम् ।
तेजपुञ्जधरां देवीं ध्यायेहं बालकुमारिकाम् ॥ १४

भक्ताभिष्टफलप्रदां, हरिनरप्रजादिभिः सेविताम् ।
पार्श्वे पङ्कजशङ्खपद्मनिधिर्युक्तां सदाशक्तिभिः ॥ १५

सरोजनयने सरोजहस्ते, धवलधरां शुकगन्धमाल्यशोभे ।
भगवति नागवल्लभे मनो ते, त्रिभुवन भूतिकरि प्रसीद मह्यम्॥१६

प्रकृतिं विकृतिं विद्यां, सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सूरिभिं, नमामि परमात्मिकाम् ॥ १७

वाचं पद्मालयां पद्मां, शुचि स्वाहा स्वधां सुधाम् ।
धन्यां हिरण्यमयीं लक्ष्मीं, नित्यपुष्टां विभावरीम् ॥ १८

अदितिं च दितिं दीप्तां, वसुधां वसुधारिणीम् ।
नमामि कमलां कान्तां, कामाक्षीं क्रोधसम्भवाम् ॥ १९

अनुग्रहां बुद्धिप्रभां, हरिवल्लभां हरिश्रीः ।
अशोकाममृतां दीप्तां, लोकालोकप्रकाशिनीम् ॥ २०

नमामि धर्मनिलयां, करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां, पद्माक्षीं पद्मसुन्दरीम् ॥ २१

पद्मोद्भवां पद्ममुखी, पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं, पद्मिनीं पद्मगन्धिनीम् ॥ २२

पुष्पगन्धां सुप्रसन्नां, प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां च, चन्द्रां चन्द्रसहोदरीम् ॥ २३

चतुर्भुजां चन्द्ररूपामिन्दिरामिन्दु शीतलाम् ।
आह्लादजननीं पुष्टिं, शिवां शिवकरीं सतीम् ॥ २४

विमलां विश्वजननीं, तुष्टिं दारिद्र्यनाशिनीम् ।
ससप्रीति पुष्करिणीं शान्तां, शुक्लमाल्याम्बराम् श्रियम् ॥२५

भास्करीं बिल्वनिलयां, वरोरोहां यशस्विनीम् ।
वसुन्धरामुदाराङ्गीं, हरिणीं हेममालिनीम् ॥ २६

धनधान्यकरीं सिद्धिं, सदा सौम्यां सुभप्रदाम् ।
नृपवेश्मगतानन्दां, वरलक्ष्मीं वसुप्रदाम् ॥ २७

शुभ्रां हिरण्यप्राकारां, समुद्रतनयां जयाम् ।
नमामि मङ्गलां देविं, पद्मद्रहः स्थलस्थिताम् ॥ २८

नागपत्नीं प्रसन्नाक्षीं, नारायण समाश्रिताम् ।
दारिद्र्यध्वंसिनीं देविं, सर्वोपद्रवहारिणीम् ॥ २९

नवदुर्गां महाकालीं, धरणेन्द्र शिवात्मिकाम् ।
त्रिकालज्ञान संपन्नां, नमामि भुवनेश्वरीम् ॥ ३०

लक्ष्मीं क्षीरसमुद्रराजतनयां, श्रीरङ्ग धामेश्वरीम्,
दासीभूत समस्त देववनितां, लोकैकदीपाङ्कुराम् ।
श्रीमन्मन्द कटाक्षलब्धविभवः ब्रह्मेन्द्र गङ्गाधराम्,
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे पङ्कजश्रियाम् ॥ ३१
(शार्दूलविक्रीडित)

मातर्नमामि कमले ! कमलायताक्षि,
श्रीचक्रिहृत्कमलवासिनी विश्वमातः ।
क्षीरोदजे कमल कोमलगर्भगौरीं,
लक्ष्मीं प्रसीद सततं नमतां शरण्ये ॥ (वसन्ततिलका) ३२

## ७२. ॥ श्रीमहालक्ष्मीस्तोत्रम् ॥

(अनुष्टुप्)

आद्यं प्रणवसंयुक्तं, माया कामाक्षरं तथा ।
महालक्ष्मी नमश्चान्ते, मन्त्रोऽयं दशसञ्ज्ञका ॥ १

ॐ ह्रीँ श्रीँ क्लीं महालक्ष्म्यै नमः ।
ऽपसग्न सुभ्रूकुसुमे, सम्भृतैः पीतवर्णकैः ।
लक्षेण जपतो लक्ष्मी, स स्यात् कोटीश्वरो भवेत् ॥ २

पीतवामां सुवर्णाङ्गं पद्महस्तां गजाङ्किताम् ।
ध्यायेदनेन मन्त्रेण, स भूयात् पृथिवीपतिः ॥ ३

दीपं पुरःसरीकृत्य, स्वर्णरूपाय जन्तिये ।
गणितैर्वासरैस्तस्य, लोके शक्तसमृद्धयः ॥ ४

क्षीरोदतनयां देवी, कामधात्री हरिप्रिया: ।
विश्वव्यापि गजारुढा, महालक्ष्मी नमाम्यहम् ॥ ५

पीनस्तनसमाकीर्णा, प्रौढे वयसि यं स्थिता ।
भूषिताङ्गस्वर्णास्यणै, पीतवासं नमाम्यहम् ॥ ६

गजेश खेमछत्रे (षु), चन्द्र-पद्मे जिनालये ।
मौक्तिके विद्रुमेवर्ण, या नित्या परमेश्वरी ॥ ७

अक्षयाभव इन्द्राणी, प्रणमामि पुनः पुनः ।
एषा हि कमलविद्या, न देया कुलजे शठे ॥ ८

कृतघ्ने रजसाकीर्णे, निद्रव्ये भक्तिवर्जितम् ।
न कस्यापि हि मन्त्रोऽयं, कथयो (ऽपि) विपश्चिताम् ॥ ९

यशोधर्म जया व्याधि, सौभाग्यं धर्म इच्छता ।
सा मे भवतु संतुष्टा, दासोऽस्मि स्याद किङ्कर ॥ १०

## ७३. ॥ श्री महालक्ष्मीदेवीनाम् अष्टोत्तरशतनाम ॥

(अनुष्टुप्)

शतमष्टोत्तरं नाम्ना, कमलाया वहानने ।
प्रवक्ष्याम्यतिगुह्यं हि, न कदापि प्रकाशयेत् ॥ १

महामाया महालक्ष्मीर्महावाणी महेश्वरी ।
महादेवी महारात्रिर्महिषासुरमर्दिनी ॥ २

कालरात्रिः कुहुः पूर्णा, नन्दाद्या भद्रिका निशा ।
जया रिक्ता महाशक्तिर्देवमाता कृशोदरी ॥ ३

शचीन्द्राणी शक्रनुता शङ्करप्रियवल्लभा ।
महावराहजननी मदनोन्मथिनी मही ॥ ४

ब्रह्म-भूनाथरमणी नृपवक्षःस्थलस्थिता ।
विश्वेश्वरी विश्वमाता वरदाऽभयदा शिवा ॥ ५

शूलिनी चक्रिणी मा च पाशिनी शङ्खधारिणी ।
गदिनी मुण्डमाला च कमला करुणालया ॥ ६

पद्माक्षधारिणी ह्यम्बा महाविष्णुप्रियङ्करी ।
स्वप्नेकनाथरमणी जिनशासने पूजिता ॥ ७

शत्रुञ्जया च यमुना, शारदा कमलासना ।
गण्डकी सरयुस्तापी(वी), रेवा चैव पयस्विनी ॥ ८

नर्मदा चैव कावेरी, पद्मद्रहकुलवासिनी ।
किशोरी केशवनिता, महेन्द्रपरिवन्दिता ॥ ९

सुरादिदेवनिर्माणकारिणी देवपूजिता ।
कोटिब्रह्माण्डमध्यस्था, कोटिब्रह्माण्डधारिणी ॥ १०

श्रुतिरुपा श्रुतिकरी, श्रुतिस्मृति परायणा ।
इन्दिरा सिन्धुतनया, मातङ्गी लोकमातृका ॥ ११

त्रिलोकजननी जन्मा, यन्त्र-तन्त्र-स्वरूपिणी ।
तरुणी च तमोहन्त्री, मङ्गला मङ्गलायना ॥ १२

जिनमातोद्भवे स्वप्ने, चतुःसङ्ख्या प्रकासिनी ।
कमला-लक्ष्मी श्रीःमाता, हरि - सुरप्रपूजिता ॥ १३

सर्वदेवमयी सर्वा, शरणागतपालिनी ।
शरण्या नृपवनिता, हिमवन्तनिवासिनी ॥ १४

गन्धर्वगानरसिका, गीता सिद्धार्थवल्लभा ।
त्रैलोक्यपालिनी तत्त्वरुपा तारुण्यपूरिता ॥ १५

चन्द्रावली चन्द्रमुखी, चन्द्रिका चन्द्रपूजिता ।
चन्द्रा शशाङ्कभगिनी, गीतवाद्यपरायणा ॥ १६

सृष्टिरूपा सृष्टिकरी, सृष्टिसंहारकारिणी ।
इति ते कथितं देवी, रमानाम शताष्टकम् ॥ १७

त्रिसन्ध्यं प्रयतो भूत्वा, पठेदेतत्समोहितः ।
यं यं कामयते कामं, तं तं प्राप्नोत्यसंशयम् ॥ १८

## ७४. ॥ श्री महालक्ष्मीस्तोत्रम् ॥

ॐ नीरनिरमल-सुगन्ध-चन्दन अखण्ड अक्षत-पुष्पजं,
दीप-धूप-नैवेद्य-पय-घृत-शर्करायुत-फलादिकम्,
पूजा भव्य शिवसुखदायक दुरित-कल्मष-खण्डणं,
श्री महालक्ष्मीमहामया पूजायां प्रतिगृह्यताम् ॥ १

ॐ नमोऽस्तु महामायो, सुरासुर प्रपूज्यते,
शङ्खचङ्क्रं गदाहस्ते, महालक्ष्मी नमोऽस्तु ते ॥ २

जन्मादिरहितो देवी, आदिशक्ति अगोचरे,
योगिनी योग-सम्भूते, महालक्ष्मी नमोऽस्तु ते ॥ ३

पद्मे वनारसि देवी, पद्म जिह्वा सरस्वती,
पद्महस्ते जगन्नाथो, महालक्ष्मी नमोऽस्तु ते ॥ ४

सर्वज्ञ सर्वदं देवी, सर्वदुःखनिवारिणी,
सर्व सिद्धिकरो देवी, महलक्ष्मी नमोऽस्तु ते ॥ ५

स्थूलः सूक्ष्मो महारुद्रे, सत्ये सत्यमहोदरी,
महापापहरो देवी, महालक्ष्मी नमोऽस्तु ते ॥ ६

सिद्धिबुद्धिप्रदो देवी, भक्तिमुक्तिप्रदायिनी,
मित्र-हस्ते महादेवी, महालक्ष्मी नमोऽस्तु ते ॥ ७

श्रीलक्ष्मी स्तवनं पुण्यं, प्रातरुत्थाय यः पठेत्,
दुःखदारिद्र्यं न पश्यन्ति(श्येन्), राज्यं प्राप्नोति नित्यं स ॥८

## ७५. ॥ श्रीमहालक्ष्मीकवचम् ॥

(अनुष्टुप्)

अथ वक्ष्ये मुनीश्वर ! कवचं सर्वकामदम् ।
यस्य विज्ञानमात्रेण, भवेत् साक्षात् कुबेरश्रीः ॥ १

नार्चनं तस्य देवेश, मन्त्रमात्रं जपेन्नरः ।
स भवेत् धरणीपुत्रः, सर्वशास्त्रपुरस्कृतः ॥ २

विद्यार्थिना सदा सेव्या, धनदात्री विशेषतः ।
धनार्थिभिः सदा सेव्या, कमला ईन्द्रवल्लभा ॥ ३

ॐ अस्य चतुराक्षरा पद्मद्रहे प्रतिष्ठिताः कमलदलेनिवासिताः कवचस्य श्री भगवान् हंसऋषिः । अनुष्टुपछन्दः । वाग्भवा देवता । वाग्भवं बीजम् । लज्जाशक्तिः । रमा कीलकम् । कामबीजास्माकं कवचम् । मम सुकवित्वपाण्डित्य समृद्धिः सिद्धये प्रसन्नार्थे पाठे विनियोगः ।

ऐँ कारो मस्तके पातु, वाग्भवा सर्वसिद्धिदा ।
ह्रीँ पातु चक्षुषोर्मध्ये, चक्षुयुग्मे च शङ्करी ॥ ४

जिह्वायां मुखवृत्ते च, कर्णयोर्दन्तयोर्नसि ।
ओष्ठाधारे दन्तपङ्क्तौ, तालुमूले हनौ पुनः ॥ ५

पातु मां विष्णुवनितां, लक्ष्मीः श्रीवर्णस्वरुपिणी ।
कर्ण-युग्मे भुज-द्वन्दे, स्तनद्वन्दे च पार्वती ॥ ६

हृदये मणिबन्धे च, ग्रीवायां पार्श्वयो द्वयोः ।
पृष्ठदेशे तथा गुह्ये, वामे च दक्षिणे तथा ॥ ७

उपस्थे च नितम्बे च, नाभौ जङ्घाद्वये पुनः ।
जानु चक्रे पदद्वन्दे, घुटिकेंऽगुलिमूलके ॥ ८

स्वधा तु प्राणशक्त्यां वा, समिन्यां मस्तके तथा ।
सर्वाङ्गे पातु कामेशी, महादेवि समुन्नतिः ॥ ९

पुष्टिः पातु महामाया, उत्कृष्टिः सर्वदाऽवतु ।
ऋद्धिः पातु सदा देवी, सर्वत्र शम्भुवल्लभा ॥ १०

वाग्भवा सर्वदा पातु, पातु मां हरगेहिनी ।
रमा पातु महादेवि, पातु माया स्वराट् स्वयं ॥ ११

सर्वाङ्गे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी ।
विजया पातु भवने जया पातु सदा मम ॥ १२

शिवदूती सदा पातु सुन्दरी पातु सर्वदा ।
भैरवी पातु सर्वत्र भेरूण्डा सर्वदाऽवतु ॥ १३

त्वरिता पातु मां नित्यमुग्रतारा सदाऽवतु ।
पातु मां कालिका नित्यं, कालरात्रि सदाऽवतु ॥ १४

नवदुर्गा सदा पातु, कामाख्या सर्वदाऽवतु ।
योगिन्यः सर्वदा पातु, मुद्राः पातु सदा मम ॥ १५

मात्रा पातु सदा देव्याश्चक्रस्था योगिनीगणाः ।
सर्वत्र सर्वकार्येषु, सर्वकर्मसु सर्वदा ॥ १६

पातु मां देवदेवी च, लक्ष्मीः सर्वसमृद्धिदाः ।
इति ते कथितं दिव्यं, कवचं सर्वसिद्धये ॥ १७

यत्र तत्र न वक्तव्यं, यदीच्छेदात्मनो हितम् ।
शठाय भक्तिहीनाय, निन्दकाय परमेश्वरी ॥ १८

न्यूनाङ्गे ह्यतिरिक्ताङ्गे, दर्शयेन्न कदाचन ।
न स्तवं दर्शयेद्दिव्यं, दर्शनभक्तिपराय च ॥ १९

कुलीनाय महेशाय, दुर्गाभक्तिपराय च ।
जितेन्द्रियविशुद्धाय, दद्यात्कवचमुत्तमम् ॥ २०

निजशिष्याय शान्ताय, धनिने कुलिने तथा ।
दद्यात्कवचमित्युक्तं, सर्वतन्त्रसमन्वितम् ॥ २१

शनौ मङ्गलवारे च, रक्तचन्दनकैस्तथा ।
यावकेन लिखेन्मन्त्रं, सर्वचक्रसमन्वितम् ॥ २२

विलिखेत्कवचं दिव्यं, स्वयं भूकुसुमैः शुभैः ।
स्वशुक्रैः परशुक्रैश्च, नानागन्धसमन्वितैः ॥ २३

गोरोचना-कुङ्कुमेन रक्तचन्दनकेन वा ।
सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने ॥ २४

अश्विन्यां कृतिकायां वा, फाल्गुन्यां वा मघासु च ।
पूर्वभाद्रपदायोगे स्वात्यां मङ्गलवासरे ॥ २५

विलेखेत्प्रपठेत्स्तोत्रं, शुभयोगे सुरालये ।
आयुष्मत्प्रीतियोगे च, ब्रह्मयोगे विशेषतः ॥ २६

इन्द्रयोगे शुभे योगे शुक्लयोगे तथैव च ।
कौलवे बालवे चैव वणिजे चैव सत्तमः ॥ २७

शुन्यागारे निर्जने वा, एकान्ते च विशेषतः ।
स्वधर्मिं पूजयित्वा च यजेदेवीं जिनधर्मिणः ॥ २८

गुरुर्देवो गुरुः साक्षात्, शिष्यस्तस्य जिनप्रियः ।
अभेदेन यजेद्यस्तु तस्य (च) सिद्धिरदूरतः ॥ २९

सर्वमङ्गलमाङ्गल्यं, सर्वकल्याणकारणम् ।
प्रधानं सर्वधर्माणां, जैनं जयति शासनम् ॥ ३०

## ७६. ॥ श्रीप्रत्यङ्गिरास्तोत्रम् ॥

जयधूम्रभीमाकारा सहस्रवदनाश्रिता ।
जलपिङ्गल लोलाक्षी ज्वाला जिह्वा च नित्यशः ॥ १

निष्ठुरान् बन्धयेद् देवी तत्क्षणं नागपाशकैः ।
भ्रकुटी भीषणान्वत्स्यात् धत्ते पादप्रहारतः ॥ २

वामेरी मर्दनो दण्डो दक्षिणो वज्रभीषणो ।
प्रेत-शिर-करोरुद्र ध्यानोदामर मरकम् (खं?) ॥ ३

अनन्त-तक्षकौ देव्या कङ्कणं च विराजते ।
वासुकिं कण्ठहारश्च कर्क्कोट-कटिमेखला ॥ ४

श्लिष्टौ पद्म-महापद्मौ पादयोः कृतनूपुरौ ।
रूण्डमालकरे भूषा गौणशौ कर्णमण्डले ॥ ५

गृहा भेत्रपटे धृत्वा जातान् दानवघातिनी ।
स्वयं सैन्याभयदा देवी परसैन्यभयङ्करी ॥ ६

इत्थं कारमात्मानं दधानानेकरूपिणी ।
वतुल वतुल शीघ्रं देवी पञ्चाननस्थे ।
प्रकटीतनिजमूर्त्ते र्मण्डलं स्वीकुरुष्क ॥
अभिलषति जिनोऽयं दर्शनं देवमूर्त्तिः ।
स्तव परिजन एषः सेवको निर्निमेषा ॥ ७

प्रत्यंगिरा सिंह सहस्त्रयाना नानायुध व्यस्त समस्त हस्ता ।
पीयूष पूरोन्नत नेत्र पाता पायादपाया जगदेकमाता ॥ ८

सीमन्धरस्वामी जिनेशभक्त्या भक्त्यार्त्तलोकाभयदान युक्त्या ।
अमानं पञ्चानन यानयाना प्रत्यङ्गिरा पातु ममुग मुच्चै ॥ ९

नौ यक्षैरखिलै र्न राक्षसगणै र्नो शाकिनीशंवर्यै-
र्नो वा चेटकखेटकै र्नव महाभूतैः प्रभूतैरपि ।
नापि व्यन्तरमुद्गरे पलगणैर्नो मन्त्रयन्त्रैः परै-
र्देवीत्वं चरणार्चतां परिभव- प्रत्यङ्गिरे शक्यते ॥ १०

सद्भक्तिवर्धार्यतांदेवी सप्रसादमागम्यतांदेवी
रणरणन्नूपुरमणिज्झंकार
भरितभुवनोदारचलकुंडलाभरण विभास्फारित मुत्कट कोटी
घृष्टचरणांगुल नखमणियष्ट समस्त विद्याधरी विस्तीर्ण
महाप्रभावे शांतात्मके ॐ अनंतभोगान्
बलं बयमयि प्रसन्न मनः क्रियसादेवी स्थानमलं क्रियतां
देवी आसनमागतांदेवी यथा परिजनलोकः प्रणमति ॥

पू. उद्योतसींहविरचितम्

## ७७. ॥ श्रीसोलह सती-स्तोत्रम् ॥

(अनुष्टुप्)

आदौ सती सुभद्रा च, पातु पश्चात्तु सुन्दरी ।
ततश्चन्दनबाला च, सुलसा च मृगावती ॥ १

राजीमती ततश्चूला, दमयन्ती ततः परम् ।
पद्मावती शिवा सीता, ब्राह्मी पुनश्च द्रौपदी ॥ २

कौशल्या च ततः कुन्ती, प्रभावती सतीवरा ।
सतीनामाङ्क-यन्त्रोऽयं चतुस्त्रिंशत् समुद्भवः ॥ ३

यस्य पार्श्वे सदा यन्त्रो, वर्तते तस्य साम्प्रतम् ।
भूरि-निद्रा न चायाति, नायान्ति भूतप्रेतकाः ॥ ४

ध्वजायां नृपतेर्यस्य, यन्त्रोऽयं वर्तते सदा ।
तस्य शत्रुभयं नास्ति सङ्ग्रामेऽस्य जयः सदा ॥ ५

गृह-द्वारे सदा यस्य यन्त्रोऽयं ध्रियते वरः ।
कार्मणादिकतन्त्रैश्च न स्यात् तस्य पराभवः ॥ ६

स्तोत्रं सतीनां सुगुरुप्रसादात्, कृतं मयोद्द्योत-मृगाधिपेन ।
यः स्तोत्र-मेतत् पठति प्रभाते स प्राप्नुते शं सततं मनुष्यः ॥७

(उपजाति)

## ७८. ॥ श्रीषोडशविद्यादेवीस्तोत्रम्-१ ॥

(अनुष्टुप्)

सर्व-कल्याणजनकं, क्षुद्रोपद्रवनाशकम् ।
विद्याधिष्ठायिनी देवी, स्तवनं वितनोम्याहम् ॥ १

पूर्वं गौरी महादेवी, महामानसिका तथा ।
श्रीप्रज्ञप्ति ज्ञानदात्री, देवी कालिका हूया ॥ २

नरदत्ताभिधा देवी, श्रीवज्रशृङ्खला तथा ।
वैरूट्या मानवी देवी, बुद्धि वृद्धि विधायिनी ॥ ३

मानसी महामानसी, देवी गान्धारिका तथा ।
महाकाली महादेवी, रोहणी वृद्धि रोहिणी ॥ ४

देवी वज्राङ्कुशी नाम्नी, देवी चक्रेश्वरी तथा ।
सर्वास्त्रा च तथाऽच्छुप्ता, विद्या सद्यः प्रदायिनी ॥ ५

विद्रावयन्तु द्राक्क्षुद्रो-पद्रवानामयानपि ।
विद्यादेव्याः षोडशैता, वितन्वतु सुखानि नः ॥ ६

विद्यादेव्यभिधाबन्ध, चतुर्स्त्रिंशत्समुद्भवः ।
यन्त्रोऽयं पूज्यते येन स स्यात् कल्याणभाजनम् ॥ ७

इदं यन्त्रमयं स्तोत्रं, हृद्य विद्यामतिप्रदम् ।
पठ्यते स्मर्यते येन, तस्य शाश्वत सुखं भवेत् ॥ ८

## ७९. ॥ श्रीषोडशविद्यादेवीस्तोत्रम्-२ ॥

(उपजाति)

गोवाहना कुन्द समानवर्णा, चाक्षापमाला-शरशंखहस्ता ।
चतुर्भुजा भूषण भूषिताङ्गी, सा रोहिणी नो दुरितानि हन्तु ॥१

त्रिशूलदण्डाभयबीजपूर, हस्त प्रशस्ता वरलोहिताङ्गी ।
या देवता प्रज्ञप्तीति नाम्नी, सर्गासनस्था नो दुरितानि हन्तु ॥२

श्वेतद्युतिर्या वरदानपद्म, सतं शृंखलारुद चतुर्भुजा ।
या वज्रपूर्वाभुविशृंखलाख्या, पद्मासनस्था नो दुरितानि हन्तु ॥३

जाम्बुनदाभा गजगामिनीहि, फलाक्षमालाङ्कुशशूलपाणिः ।
अनेकदेवाभिनता नताङ्गी, वज्राङ्कुशी नो दुरितानि हन्तु ॥४

या भिन्नवर्णानरवाहनस्था, भुजैश्चतुर्भिर्धृतभव्यचक्रा ।
विभूषणालङ्कृतदेहभागा, चक्रेश्वरी नो दुरितानि हन्तु ॥ ५

रक्ताब्जबद्धासनसंस्थितिर्या, हेमप्रभाखेटकखड्गहस्ता ।
सबीजपुराभयदानशस्ता, नृदत्तनाम्नी नो दुरितानि हन्तु ॥ ६

घनाघनाभा कमलासनस्था, त्रिशूलमालावरमुद्गराङ्का ।
काली कलाभासुरसच्छरीरा, सा देवता नो दुरितानि हन्तु ॥७

कलापिकण्ठावलिनीलदेहा, सरोजमालावरघण्टिकाङ्का ।
नृपृष्ठसंस्था तु महेतिपूर्वा, सा कालिका नो दुरितानि हन्तु ॥८

उतप्त जाम्बुनदमूर्तिकान्तिः, कुकुद्मवाहाभिरता वराङ्गी ।
अब्जाक्षमाला - वरदण्डहस्ता, गौरीति देवी दुरितानि हन्तु ॥९

धाराधराकारशरीरयष्टिः, सहस्त्रपत्रासन संस्थिता या ।
त्रिशूलदण्डाभयदानहस्ता, गान्धारीदेवी दुरितानि हन्तु ॥ १०

श्वेतच्छदस्था सितरोचिरङ्गा, चतुर्भुजन्यस्तसरीसृपाङ्का ।
चतुर्भुजा या तु महेतिपूर्वा, ज्वालाभिधाना दुरितानि हन्तु ॥११

या भिन्नवर्णा कमलासनस्था, वृक्षाक्षमालावरदानपाणिः ।
सा मानवी मानवनम्यपाद-पद्मद्वया नो दुरितानि हन्तु ॥ १२

विहङ्गराजासनबद्धसंस्था, पयोधराभा भुजगेन्द्रपत्नी ।
फणीन्द्रयुग्मासिसुखेटकाङ्का, वैरोट्यदेवी दुरितानि हन्तु ॥१३

तुरङ्गवाहा सितनित्यकाया, खड्गासिपत्रीशरखेटकाङ्का ।
या जातरूपा प्रतिजातरूपा, अच्छुसदेवी दुरितानि हन्तु ॥ १४

हेमांशुरोचिः प्रतिमानितान्तः श्वेतच्छदस्था धृतशूलमाला ।
वरप्रसन्नाननपूर्णचन्द्राः सा मानसी नो दुरितानि हन्तुः ॥ १५

सारङ्गसंस्था हिमरोचिराभा, भृङ्गारखड्गाभयखेटकाङ्का ।
श्रीमानसी यापि महेति पूर्वा, सा देवता नो दुरितानि हन्तु ॥१६

## ८०. ॥ श्रीषोडशविद्यादेवी स्तवनम्-३ ॥

मन्त्राधिराजवलये विमले द्वितीये,
षट्चन्द्राय कोष्टकयुते परितः स्थिताश्च ॥
विद्यासुरी रसविधु प्रमिता हिताय,
वर्णैः स्ववाहनभुजैरथ संस्तवीमि ॥ १

गोवाहना कुन्दसमानवर्णा चापाक्षमालाशरशंखहस्ता ।
चतुर्भुजा भूषण भृषीताङ्गी सा रोहिणी नो दुरितानि हन्तु ॥ २

त्रिशूलदण्डाभयबीजपूर-हस्ता प्रशस्ता वरलोहिताङ्गी ।
या देवता प्रज्ञसीति नाम्नी सर्प्पासनस्था दुरितानि हन्तु ॥ ३

श्वेतद्युति र्या वरदानपद्म सत्शृंखलारुद्चभुजा महाभा ।
या वज्रपूर्वा भुवि शृंखलारव्या, पद्मासनस्था दुरितानि हन्तु ॥४

जाम्बूनदाभा गजगामिनी हि, फलाक्षमालाङ्कुशशूलपाणिः ।
अनेकदेवाभिनता नताङ्गी वज्राङ्कुशी नो दुरितानि हन्तु ॥५

या भिन्नवर्णा नरवाहनस्था भुजैश्चतुर्भिर्धतभव्यचक्रा ।
विभूषणालङ्कृतदेहभागा चक्रेश्वरी नो दुरितानि हन्तु ॥ ६

रक्ताब्जबद्धासनसंस्थितिर्या हेमप्रभा खेटकखड्गहस्ता ।
सबीजपूराभवदानहस्ता नृदत्त नाम्नी दुरितानि हन्तु ॥ ७

घनाघनाभा कमलासनस्था त्रिशूलमाला वरमुद्गराङ्का ।
काली कलाभासुरसच्छरीरा सा देवता नो दुरितानि हन्तु ॥८

कलापिकण्ठावलिनीलदेहा, सरोजमालावरघण्टिकाङ्का ।
नृपृष्ठसंस्था तु महेतिपूर्वा, सा कालिका नो दुरितानि हन्तु ॥९

उत्तप्तजाम्बूनदमूर्तिकान्तिः ककुद्मवाहाभिरता वराङ्गी ।
अब्जक्षमालावरदण्डहस्ता, गौरीति देवी दुरितानि हन्तु ॥१०

धाराधराकारशरीरयष्टिः, सहस्रपत्रासनसंस्थिता या ।
त्रिशूलदण्डाभयदानहस्ता, गान्धारिदेवी दुरितानि हन्तु ॥ ११

श्वेतच्छदस्था सितरोचिरङ्गा, चतुर्भुजन्यस्तसरीसृपाङ्का ।
चतुर्भुजा या तु महेतिपूर्वा, ज्वालाभिधाना दुरितानि हन्तु ॥१२

या भिन्नवर्णा कमलासनस्था, वृक्षःक्षमालावरदानपाणिः ।
सा मानवी मानवनम्यपाद, पद्माह्वया नो दुरितानि हन्तु ॥१३

विहङ्गराजासनबद्धसंस्था, पयोधराभा भुजगेन्द्रपत्नी ।
फणीन्द्रयुग्मासिसुखेटकाङ्का, वैरोट्यादेवी दुरितानि हन्तु ॥१४

तुरङ्गवाहा स्थित नित्यकाया, खड्गासिपत्रीशरखेटकाङ्का ।
या जातरूपप्रतिजातरूपा, अच्छुप्तदेवी दुरितानि हन्तु ॥ १५

हेमांशुचिः प्रतिमा नितान्त श्वेतच्छेदस्था धृतशूलमाला ।
वरप्रसन्नाननपूर्णचन्द्रा सा मानुषी नो दुरितानि हन्तु ॥ १६

सारङ्गसंस्था हिमरोचिराभा, भृङ्गारखड्गाभयखेटकाङ्का ।
श्रीमानसी या महेति पूर्वा, सा देवता नो दुरितानि हन्तु ॥१७

द्विरष्ट विद्यावरदेवतानां, स्पष्टाक्षरं स्तोत्रमिदं पठेत् यः ।
स प्रीतियोगं लभते मनुष्यः श्रीपार्श्वतः सागरचन्द्र रूपम् ॥१८

वामासुतक्रमकुशेशयभृङ्गभावं
ये बिभ्रतीह भविका मुदिताशयास्तु
तेषां गृहेषु दुरितप्रकरं हरन्त्य-
स्तन्वन्ति शान्तिकममूस्त्रिदशाङ्गना हि ॥ १९

॥ इती षोडशविद्यादेवी स्तवनम् ॥

## ८१. ॥ श्रीषोडशविद्यादेवी स्तवनम्-४ ॥

संखक्खमाल धणुबाण च चउकरा चंदकुंदसमबुंदी ।
रोहिणि सुरहि निसन्ना पासजिन सव्वया नमई ॥ १

सत्ति सरोरूह हत्था कमली नीलकंठमारूढा ।
पन्नत्ती रक्ख करी नमइ जिण थंभणपुरत्थं ॥ २

करधरीयं संखलतया कणगजूइ वज्जसिंखला थूणइ ।
कोलाई पउमट्ठिया थंभणनयरिट्ठियं पासं ॥ ३

कुंतासि फलयपतिकर कणगच्छाग इंदवर गमणा ।
वज्जंकुसाचलं या आराही थंभणो पासो ॥ ४

जंबूणयच्छवि तणु चक्काइ अणेगयहरिणा चक्का ।
गरुडासीणा हंसरुइ थंभण पास जिणनाहं ॥ ५

सरिभगमणा असीफलयं पहरणहत्था सुवण्णवण्णक्खा ।
जं नमइ पुरिसदत्ता थंभणपासं तयं सरहं ॥ ६

तं नमह पासनाहं जं झायइ पउपसंठिया ।
काली नील पयासेइ गयाइ पहरणगेयादुट्ठे ॥ ७

उज्जुमइ महाकाले अयंसी कुसुमच्छवी नमिउं पासं ।
नरवाहण अक्खमालाय विफल घंटी कलिय पांणी ॥ ८

हंबुगाहा निसन्ना गौरी गोरी सहस्सपत्तकरा ।
गंधारी सुसलसणी रक्खकरी पउमसाकसणा ॥ ९

ससिधवला जालंधरी थंभइ दुष्टे विरालगइ जाला ।
पउमगइ नीलपुक्खररुइ माणवतरुवरकरुग्गा ॥ १०

असी नाग फलय पांणी सोमाभाजं पियंगुकुसुमसमा ।
वइरुट्टाय थुणेइ वारिदगया जिणं पासं ॥ ११

जम्मकरीधरीय धणुसरी असीकलया वर तुरंगमा पत्ति ।
अइरुरुइरी हरी पास सामीयं थुणइ अच्छुत्ता ॥ १२

हंसगमा वज्जधरी कणयच्छवी मांणसी थुणइ पासं ।
रइथुब्भो भामहमाणसीय हरग्गसी रयणधरा ॥ १३

सोलसदल कमलत्थं अट्ठमहापाडिहेर–कयसोयं ।
पासं पुव्वं दलगइ विज्जादेवीही परिअरीयं ॥ १४

ससीगोर खीरधारान् हविज्ज मांण नमामि जिण पासं ।
थंभणनयरंमि ठियं तप्पायतले निसन्नोहं ॥ १५

उँ नमो भगवओ जिणपासस्स शिवगइस्स महाबल ।
परकम्मस्स सव्वजिण शंकर गुणस्स ॥ १६

एगाहियं दुदिवसं स्तुवंती चउमासी अट्ठमासीअं ।
जइयंवेला सहुमाईआ, कट्टय आकट्टय नमो ते ॥ १७

गंधव्वपेय सायली गह रक्खस्स भूया ।
रेवइ पिसाए आकट्टय आकट्टय आवेलय कमरीओ छिंद ॥१८

भिंदय दार विदारय रिजय खयरक्ख जिणस्स पासस्स ।
सणिवाइय पित्तियं सिंभिय तवस निवारय जरं ॥ १९

रइनाह दुमइ कामल हरिसा रवय पभिइ रोग अहि सययं ।
आकट्टय आकट्टय नासइ लुहु पास जिननाहं ॥ २०

साहंति पणव माई मंतपएहिं थुओ समं ।
पासहर अंतर रोगे जिण असोगचंदप्पहप्पणया ॥ २१

॥ इति षोडशविद्यादेवी स्तवनम् ॥

## ८२. ॥ श्रीषोडशविद्यादेवी स्तवनम्-५ ॥

जिणशासनं च नमिऊण भावओ, पणमिऊण सुयदेवी ।
तिहुयण सन्निज्झाणं, भणिमो नामाणि विज्जाणं ॥ १

रोहिणी सुरहि निसन्ना, मोरनिसन्ना तहाय पन्नत्ति ।
कमलंमि वज्जसंखला, वज्जंकुस करिवरारूढा ॥ २

अप्पडिचक्का गरुडंमि संठिया, पुरीसदत्ता महीसीए ।
कमलनिसन्ना काली, वोहेई नरं महाकालीं ॥ ३

गोरी गोहारूढा, कमलारूढा तहाय गंधारी ।
सव्वत्तमहाजाला, वरालपमालसीहंसे ॥ ४

वइरुट्टाय गरुडे, तुरिये अच्छुत्तमांणसी कमले ।
केसरि उवरि निसन्ना, देउ महामाणसी सिद्धि ॥ ५

जिणवयण भावीयाणं, विज्जानामाइं वाहणाइं च ।
जो समरइ अणुदियहं, सोलहही जयच्छियं सुक्खं ॥ ६

॥ इति सोलविद्यादेवी स्तवनम् ॥

पू.आ.श्री मुनिसुन्दरसूरिविरचितम्

# ८३. ॥ श्रीलक्ष्मीदेवीस्तोत्रम् ॥

(अनुष्टुप्)

सुरराजैः चतुःषष्ठ्या, स्तूयमानगुणप्रभे ।
जय श्रीदेवि विश्वैकमातराश्रितवत्सले ॥ १

हिमवच्छिखरे पद्महृदपद्मनिवासिनि ।
गौतमक्रमसेवैकरसिके विश्वमोहिनि ॥ २

सूरिमन्त्रतृतीयोपविद्यापदनिवेशिते ।
सूरिराजहृदम्भोजविलासिनि चतुर्भुजे ॥ ३

श्रीचन्द्रप्रभभक्त्याऽतिपूते पद्माननेक्षणे ।
पद्महस्ते महारत्ननिधिराजिविराजिते ॥ ४

गजयानेऽप्सरः श्रेणिगीतनाट्यादिरञ्जिते ।
सदाशिरोधृतछत्रचलच्चामरभासिते ॥ ५

श्रीजैनशासनानन्तमहिमाम्बुधिचन्द्रिके ।
नानामन्त्रैः समाराध्ये सुरासुरनरर्षिभिः ॥ ६

विजया-जया-जयन्ती-नन्दा-भद्राद्युपासिते ।
स्मृतिस्तवनपूजाभिः सर्वविघ्नभयापहे ॥ ७

विश्वकल्पलते लक्ष्मि सर्वालङ्कृत्यलङ्कृते ।
शुद्धबोधिसमाधानसर्वसिद्धीः प्रयच्छ मे ॥ (स.कु.) ८

स्तूयमाने महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयापि सर्वेष्टसिद्धिं श्रीदेवि देहि मे ॥ ९

पू.आ.श्री मुनिसुन्दरसूरिविरचितम्

## ८४. ॥ श्रीत्रिभुवनस्वामिनीदेवीस्तोत्रम् ॥

(अनुष्टुप्)

जय श्रीगणभृन्मन्त्रविद्यास्थानप्रतिष्ठिते ।
देवि त्रिभुवनस्वामिन्यनन्तमहिमद्युते ॥ १

जिनराजपदाम्भोजविलासवरलानिभे ।
गौतमस्वामिपद्भक्ते सक्ते भक्तालिपालने ॥ २

महापराक्रमोल्लासि सहस्रभुजराजिते ।
मानुषोत्तरशैलेन्द्रनिवासिनि जयोत्तमे ॥ ३

महादेवि सुरीवृन्दवन्द्यमानक्रमाम्बुजे ।
सुरासुरनराधीशप्रशस्यगुणवैभवे ॥ ४

शाकिनी-डाकिनी-भूत-प्रेतादिग्रहनाशिनि ।
सर्वद्वेषिगणोच्चाटन्यमेयबलशालिनि ॥ ५

नृतिर्यक् - देवताद्युत्थक्षुद्रोपद्रववारिणि ।
संस्मृतेरपि सर्वेष्टसुखकल्याणकारिणि ॥ ६

सर्वसूरिगुणस्तुत्ये द्विध (धा) वैरिजयश्रियम् ।
देहि मे शुद्धबोधिं च समाधानं च सर्वतः ॥ ७

स्तूयमाने महानेकमुनिसुन्दरसंस्तवैः ।
स्तुते मयापि मेऽभीष्टं देहि त्रिभुवनेश्वरि ॥ ८

# ८५. ॥ श्रीदेवीस्तोत्रम् ॥

(अनुष्टुप्)

श्रीसरस्वत्यै नमः ।

श्री शारदे ! नमस्तुभ्यं जगद्भवनदीपिके ! ।
विद्वज्जनमुखाम्भोजभृङ्गिके ! मे मुखे वस ॥ १

वागीश्वरि ! नमस्तुभ्यं नमस्ते हंसगामिनि ! ।
नमस्तुभ्यं जगन्मातर्जगत्कर्त्रि ! नमोऽस्तु ते ॥ २

शक्तिरूपे ! नमस्तुभ्यं कवीश्वरि ! नमोऽस्तु ते ।
नमस्तुभ्यं भगवति ! सरस्वति ! नमोऽस्तुते ॥ ३

जगन्मुख्ये नमस्तुभ्यं वरदायिनि ! ते नमः ।
नमोऽस्तु तेऽम्बिकादेवि ! जगत्पावनि ! ते नमः ॥ ४

शुक्लाम्बरे ! नमस्तुभ्यं ज्ञानदायिनि ! ते नमः ।
ब्रह्मरूपे ! नमस्तुभ्यं ब्रह्मपुत्रि ! नमोऽस्तु ते ॥ ५

विद्वन्मातर्नमस्तुभ्यं वीणाधारिणि ! ते नमः ।
सुरेश्वरि ! नमस्तुभ्यं नमस्ते सुरवन्दिते ! ॥ ६

भाषामयि ! नमस्तुभ्यं शुकधारिणि ! ते नमः ।
पङ्कजाक्षि ! नमस्तुभ्यं मालाधारिणि ! ते नमः ॥ ७

पद्मारूढे ! नमस्तुभ्यं पद्मधारिणि ! ते नमः ।
शुक्लरूपे नमस्तुभ्यं नमस्त्रिपुरसुन्दरि ! ॥ ८

धीदायिनि ! नमस्तुभ्यं ज्ञानरूपे ! नमोऽस्तु ते ।
सुरार्चिते ! नमस्तुभ्यं भुवनेश्वरि ! ते नमः ॥ ९

कृपावति ! नमस्तुभ्यं यशोदायिनि ! ते नमः ।
सुखप्रदे ! नमस्तुभ्यं नमः सौभाग्यवर्द्धिनि ! ॥ १०

विश्वेश्वरि ! नमस्तुभ्यं नमस्त्रैलोक्यधारिणि ! ।
जगत्पूज्ये ! नमस्तुभ्यं विद्यां देहि महामहे ॥ ११

श्रीर्देवते ! नमस्तुभ्यं जगदम्बे ! नमोऽस्तु ते ।
महादेवि ! नमस्तुभ्यं पुस्तकधारिणी ! ते नमः ॥ १२

कामप्रदे नमस्तुभ्यं श्रेयोमाङ्गल्यदायिनि ! ।
सृष्टिकर्त्रि ! नमस्तुभ्यं सृष्टिधारिणि ! ते नमः ॥ १३

जगद्धिते ! नमस्तुभ्यं नमः संहारकारिणि ! ।
विद्यामयि ! नमस्तुभ्यं विद्यां देहि दयावति ! ॥ १४

अथ लक्ष्मीनामानि-

महालक्ष्मि ! नमस्तुभ्यं पीतवस्त्रे ! नमोऽस्तु ते ।
पद्मालये ! नमस्तुभ्यं नमः पद्मविलोचने ! ॥ १५

सुवर्णाङ्गि ! नमस्तुभ्यं पद्महस्ते ! नमोऽस्तु ते ।
नमस्तुभ्यं गजारूढे ! विश्वमात्रे नमोऽस्तु ते ॥ १६

शाकम्भरि ! नमस्तुभ्यं कामधात्रि ! नमोऽस्तु ते ।
क्षीराब्धिजे ! नमस्तुभ्यं शशिस्वस्रे ! नमोऽस्तु ते ॥ १७

हरिप्रिये ! नमस्तुभ्यं वरदायिनि ! ते नमः ।
सिन्दूराभे ! नमस्तुभ्यं नमः सन्मतिदायिनिः ॥ १८

ललिते ! च नमस्तुभ्यं वसुदायिनि ! ते नमः ।
शिवप्रदे ! नमस्तुभ्यं समृद्धिं देहि मे रमे ! ॥ १९

अथ योगिनीरूपाणि–

गणेश्वरि ! नमस्तुभ्यं दिव्ययोगिनि ते ! नमः ।
विश्वरूपे ! नमस्तुभ्यं महायोगिनि ! ते नमः ॥ २०

भयङ्करि ! नमस्तुभ्यं सिद्धयोगिनि ! ते नमः ।
चन्द्रकान्ते ! नमस्तुभ्यं चक्रेश्वरि ! नमोऽस्तु ते ॥ २१

पद्मावति ! नमस्तुभ्यं रुद्रवाहिनि ! ते नमः ।
परमेश्वरि ! नमस्तुभ्यं कुण्डलिनि ! नमोऽस्तु ते ॥ २२

कलावति ! नमस्तुभ्यं मन्त्रवाहिनि ! ते नमः ।
मङ्गले ! च नमस्तुभ्यं श्रीजयन्ति ! नमोस्तु ते ॥ २३

अथान्यनामानि–

चण्डिके ! च नमस्तुभ्यं दुर्गे ! देवि ! नमोऽस्तु ते ।
स्वाहारूपे ! नमस्तुभ्यं स्वधारूपे ! नमोऽस्तु ते ॥ २४

प्रत्यङ्गिरे ! नमस्तुभ्यं गोत्रदेवि ! नमोऽस्तु ते ।
शिवे ! कृष्णे ! नमस्तुभ्यं नमः कैटभनाशिनि ! ॥ २५

कात्यायनि ! नमस्तुभ्यं नमो धूम्रविनाशिनि ! ।
नारायणि ! नमस्तुभ्यं नमो महिषखण्डिनि ! ॥ २६

सहस्राक्षि ! नमस्तुभ्यं नमश्चण्डविनाशिनि ! ।
तपस्विनि ! नमस्तुभ्यं नमो मुण्डविनाशिनि ॥ २७

अग्निज्वाले ! नमस्तुभ्यं नमो निशुम्भखण्डिनि ! ।
भद्रकालि ! नमस्तुभ्यं मधुमर्दिनि ! ते नमः ॥ २८

महाबले ! नमस्तुभ्यं शुम्भखण्डिनि ! ते नमः ।
श्रुतिमयि ! नमस्तुभ्यं रक्तबीजवधे ! नमः ॥ २९

धृतिमयि ! नमस्तुभ्यं दैत्यमर्दिनि ! ते नमः ।
दिवागते ! नमस्तुभ्यं ब्रह्मदायिनि ! ते नमः ॥ ३०

माये ! क्रिये ! नमस्तुभ्यं श्रीमालिनि ! नमोऽस्तु ते ।
मधुमति ! नमस्तुभ्यं कले ! कालि ! नमोऽस्तु ते ॥ ३१

श्रीमातङ्गि ! नमस्तुभ्यं विजये ! च नमोऽस्तु ते ।
जयदे च नमस्तुभ्यं श्रीशाम्भवि ! नमोऽस्तु ते ॥ ३२

त्रिनयने ! नमस्तुभ्यं नमः शङ्करवल्लभे ! ।
वाग्वादिनि ! नमस्तुभ्यं श्रीभैरवि ! नमोऽस्तु ते ॥ ३३

मन्त्रमयि ! नमस्तुभ्यं क्षेमङ्करि ! नमोऽस्तु ते ।
त्रिपुरे ! च नमस्तुभ्यं तारे शबरि ! ते नमः ॥ ३४

हरसिद्धे ! नमस्तुभ्यं ब्रह्मवादिनि ! ते नमः ।
अङ्गे ! बङ्गे ! नमस्तुभ्यं कालिके ! च नमोऽस्तु ते ॥ ३५

उमे ! नन्दे ! नमस्तुभ्यं यमघण्टे ! नमोऽस्तु ते ।
श्रीकौमारि ! नमस्तुभ्यं वातकारिणि ! ते नमः ॥ ३६

दीर्घदंष्ट्रे ! नमस्तुभ्यं महादंष्ट्रे ! नमोऽस्तु ते ।
प्रभे ! रौद्रि ! नमस्तुभ्यं सुप्रभे ! ते नमो नमः ॥ ३७

महाक्षमे ! नमस्तुभ्यं क्षमाकारि ! नमोऽस्तु ते ।
सुतारिके ! नमस्तुभ्यं भद्रकालि ! नमोऽस्तु ते ॥ ३८

चन्द्रावति ! नमस्तुभ्यं वनदेवि ! नमोऽस्तु ते ।
नारसिंहि ! नमस्तुभ्यं महाविद्ये ! नमोऽस्तु ते ॥ ३९

अग्निहोत्रि ! नमस्तुभ्यं सूर्यपुत्रि ! नमोऽस्तु ते ।
सुशीतले ! नमस्तुभ्यं ज्वालामुखि ! नमोऽस्तु ते ॥ ४०

सुमङ्गले ! नमस्तुभ्यं वैश्वानरि ! नमोऽस्तु ते ।
निरञ्जने ! नमस्तुभ्यं श्रीवैष्णवि ! नमोऽस्तु ते ॥ ४१

श्रीवाराहि ! नमस्तुभ्यं तोतलायै नमो नमः ।
कुरुकुल्ले ! नमस्तुभ्यं भैरवपत्नि ! ते नमः ॥ ४२

अथागमोक्तनामानि स्वयमूह्यानि पण्डितैः ।
कथ्यन्ते कानि नामानि प्रसिद्धानि तथा न वा ॥ ४३

हेमकान्ते ! नमस्तुभ्यं हिङ्गुलायै नमो नमः ।
यज्ञविद्ये ! नमस्तुभ्यं वेदमातर्नमोऽस्तु ते ॥ ४४

श्रीमृडानि नमस्तुभ्यं विन्ध्यवासिनि ! ते नमः ।
पृथ्वीज्योत्स्ने ! नमस्तुभ्यं नमो नारदसेविते ! ॥ ४५

प्रह्लादिनि ! नमस्तुभ्यमपर्णायै नमो नमः ।
जैनेश्वरि ! नमस्तुभ्यं सिंहगामिनि ! ते नमः ॥ ४६

बौद्धमातर्नमस्तुभ्यं जिनमातर्नमोऽस्तु ते ।
ॐकारे च नमस्तुभ्यं राज्यलक्ष्मि ! नमोऽस्तु ते ॥ ४७

सुधात्मिके ! नमस्तुभ्यं राजनीते ! नमोऽस्तु ते ।
मन्दाकिनि ! नमस्तुभ्यं गोदावरि ! नमोऽस्तु ते ॥ ४८

पताकिनि ! नमस्तुभ्यं भगमालिनि ! ते नमः ।
वज्रायुधे ! नमस्तुभ्यं परापरकले ! नमः ॥ ४९

वज्रहस्ते ! नमस्तुभ्यं मोक्षदायिनि ! ते नमः ।
शतबाहु ! नमस्तुभ्यं कुलवासिनि ! ते नमः ॥ ५०

श्रीत्रिशक्ते ! नमस्तुभ्यं नमश्चण्डपराक्रमे ! ।
महाभुजे ! नमस्तुभ्यं नमः षट्चक्रभेदिनि ! ॥ ५१

नभःश्यामे ! नमस्तुभ्यं षट्चक्रक्रमवासिनि ! ।
वसुप्रिये ! नमस्तुभ्यं रक्तादिनि नमो नमः ॥ ५२

महामुद्रे ! नमस्तुभ्यमेकचक्षुर्नमोऽस्तु ते ।
पुष्पबाणे ! नमस्तुभ्यं खगगामिनि ! ते नमः ॥ ५३

मधुमत्ते नमस्तुभ्यं बहुवर्णे ! नमो नमः ।
मदोद्धते ! नमस्तुभ्यं इन्द्रचापिनि ! ते नमः ॥ ५४

चक्रहस्ते ! नमस्तुभ्यं श्रीखड्गिनि ! नमो नमः ।
शक्तिहस्ते ! नमस्तुभ्यं नमस्त्रिशूलधारिणि ! ॥ ५५

वसुधारे ! नमस्तुभ्यं नमो मयूरवाहिनि ! ।
जालन्धरे ! नमस्तुभ्यं सुबाणायै नमो नमः ॥ ५६

अन्तर्वीर्ये ! नमस्तुभ्यं वरायुधधरे ! नमः ।
वृषप्रिये ! नमस्तुभ्यं शत्रुनाशिनि ! ते नमः ॥ ५७

वेदशक्ते ! नमस्तुभ्यं वरधारिणि ! ते नमः ।
वृषारूढे ! नमस्तुभ्यं वरदायै नमो नमः ॥ ५८

शिवदूति ! नमस्तुभ्यं नमो धर्मपरायणे ! ।
घनध्वनि ! नमस्तुभ्यं षट्कोणायै नमो नमः ॥ ५९

जगद्गर्भे ! नमस्तुभ्यं त्रिकोणायै नमो नमः ।
निराधारे ! नमस्तुभ्यं सत्यमार्गप्रबोधिनि ! ॥ ६०

निराश्रये ! नमस्तुभ्यं छत्रच्छायाकृतालये ! ।
निराकारे ! नमस्तुभ्यं वह्निकुण्डकृतालये ! ॥ ६१

प्रभावति ! नमस्तुभ्यं रोगनाशिनि ! ते नमः ।
तपोनिष्ठे ! नमस्तुभ्यं सिद्धिदायिनि ! ते नमः ॥ ६२

त्रिसन्ध्यिके ! नमस्तुभ्यं दृढबन्धविमोक्षणि ! ।
तपोयुक्ते ! नमस्तुभ्यं काराबन्धविमोचनि ! ॥ ६३

मेघमाले ! नमस्तुभ्यं भ्रमनाशिनि ! ते नमः ।
ह्रींक्लींकारि ! नमस्तुभ्यं सामगायनि ! ते नमः ॥ ६४

ॐ ऐँरूपे ! नमस्तुभ्यं बीजरूपं ! नमोऽस्तु ते ।
नृपवश्ये ! नमस्तुभ्यं शस्यवर्द्धिनि ! ते नमः ॥ ६५

नृपसेव्ये ! नमस्तुभ्यं धनवर्द्धिनि ! ते नमः ।
नृपमान्ये ! नमस्तुभ्यं लोकवश्यविधायिनि ! ॥ ६६

नमः सर्वाक्षरमयि ! वर्णमालिनि ! ते नमः ।
श्रीब्रह्माणि ! नमस्तुभ्यं चतुराश्रमवासिनि ! ॥ ६७

शास्त्रमयि ! नमस्तुभ्यं वरशस्त्रास्त्रधारिणि ! ।
तुष्टिदे ! च नमस्तुभ्यं पापनाशिनि ! ते नमः ॥ ६८

पुष्टिदे ! च नमस्तुभ्यमार्तिनाशिनि ! ते नमः ।
धर्मदे ! च नमस्तुभ्यं गायत्रीमयि ! ते नमः ॥ ६९

कविप्रिये ! नमस्तुभ्यं चतुर्वर्गफलप्रदे ! ।
जगज्जीवे ! नमस्तुभ्यं त्रिवर्गफलदायिनि ! ॥ ७०

जगद्बीजे ! नमस्तुभ्यमष्टसिद्धिप्रदे ! नमः ।
मातङ्गिनि ! नमस्तुभ्यं नमो वेदाङ्गधारिणि ! ॥ ७१

हंसगते ! नमस्तुभ्यं परमार्थप्रबोधिनि ! ।
चतुर्बाहु ! नमस्तुभ्यं शैलवासिनि ते नमः ॥ ७२

चतुर्मुखि ! नमस्तुभ्यं द्युतिवर्द्धिनि ! ते नमः ।
चतुःसमुद्रशयिनि ! तुभ्यं देवि ! नमो नमः ॥ ७३

कविशक्ते ! नमस्तुभ्यं कलिनाशिनि ! ते नमः ।
कवित्वदे ! नमस्तुभ्यं मत्तमातङ्गगामिनि ! ॥ ७४

## ८६. ॥ श्रीगर्भस्तोत्रम् ॥

(शार्दूलविक्रीडित)

ह्रीङ्कारोदरवाग्भवैकवसतिर्या कुण्डली कौलिनी
ब्रह्मानन्दमयी परा परकला षड्ग्रन्थिसम्भेदिनी ।
साहस्त्रं पदपद्मकोटरलसत्सोमेन सार्द्धं मुदा
क्रीडन्ती सुखसम्पदं दिशतु नः श्रीमत्त्रिखण्डेश्वरी ॥ १

श्रीमत्पञ्चदशाक्षरी शिवकलाधारादिचक्रेषु या
स्फूर्त्तिः पञ्चदशस्तथोनवतया त्रेधापि या संस्थिता ।
उन्मन्यन्तमुपागता कुलकजप्रोद्दामसौदामिनी
मायामोहनिकृन्तिनी निजसुखं मह्यं प्रसद्यात् सदा ॥ २

कश्चित् पङ्कजसम्भवः करुणया पूर्णस्त्वया विश्वसृक्
वेदादिर्वियदादितत्त्वममलं त्वत्सामरस्यं स्फुटम् ।
तद्वेदत्रिपुरे कृपामृतरसोन्मथ्याऽप्यनन्या श्रिये
दृष्टिं देहि ततः समुज्ज्वलतरानन्दस्वभावो भवे ॥ ३

एतत् ते त्रिपुरे ! त्वदीयवपुषा सा चित्रवर्णाध्वना
व्यस्तं विश्वमनुत्तरोत्तरतया यद्बीजमुद्गीयते ।
तन्मे ताण्डवमण्डितं रसनिका सारस्वतेनाहतं
विस्फूर्जत्कलकोकिलारजतयोद्वेलं जरीजृम्भते ॥ ४

ईकारोऽसि हुताशनेन्दुतपनैर्बिन्दुत्रयैः संयुतः
कामाप्ताजननी स्थितिं वितनुते ब्रह्मैकयः केशवः ।

यत्त्वं देवि ! पुरे सुधारसवचः कल्लोलकल्लोलिनी
जिह्वातः प्रसरीसरीतु भवती कारुण्यतस्तद्द्रुतः ॥ ५

लक्ष्मीं लक्ष्मिललामधामबहुलां मत्तेभकुम्भोच्छल-
द्दानाम्भोत्कटपूरपङ्कविकटां देह्यम्ब ! मह्यं यतः ।
त्वं सृष्टिस्थितिमेदिनी मधुजितः शक्तिर्विरञ्चेर्निजा
यद्वा वाग्भवमध्यगा विलससि श्रीमत्त्रिखण्डेश्वरि ! ॥ ६

ह्रींकारादिहराब्जयोनिविलसत्संसारसङ्कोचिनी
या बेयारतयेश्वरस्य महिता वागेश्वरी जृम्भते ।
बिन्दौ नादतया च बीजवसतिर्याऽनुत्तरा शाम्भवी
श्रीमत्त्रिपुरसुन्दरी विजयते खण्डे स्थिता वास्तवे ॥ ७

हः कामः शिवबीजतो हरिरयं यन्मोहयत्यङ्गना
स्थित्या त्वच्चरणप्रसादवशतः श्रीकामराजादितः ।
मातर्भक्तिसमीहितं सृजति यद्धैर्य...रं श्रयः ।
सोऽयं मेऽखिलकाङ्क्षितं वितरतात् कामेश्वरप्रेयसी ॥ ८

सत्तारूपिणि ! सज्जनैकनिलये ! सौभाग्यसम्पत्प्रदे !
सावित्रीति सरस्वतीति गदिता लक्ष्मीस्त्वमेवासि सा ।
तत् कामेश्वरशम्भुपत्नि ! मम यत् काङ्क्षाधिरूढं भवेत्
तद्देहि त्वरितं तपोभिरपि यद् दुष्प्रापमन्यैरपि ॥ ९

कल्याणं कमलापतिः करुणया कामेश्वरः काङ्क्षितं
दद्यान्मध्यमखण्डतस्तव शवे मध्ये स्थितः कान्मना ।
कन्दर्पप्रतिमः कलासु कुशलः कल्पद्रुमः कामिनां
यस्योच्चारवशेन राजति नरः श्रीमत्त्रिखण्डात्मिके ! ॥ १०

हस्त्वन्माध्यमखण्डले च वसतिर्योऽम्ब ! द्वितीयस्थितिं
पुष्णात्येकतयैव चाधिकतया बन्धूकपुष्पप्रभः ।
सौभाग्यं परमं स मे वितरता वश्या भवेयुर्यतो
राजानो वरयोषितश्च निभृताः सौख्यश्रियः सम्मता ॥ ११

लक्ष्यं मे मनसो मनोरमतमं सौन्दर्यसीमालयो
बन्धूकप्रभवारुणं करलसच्चापेषु पाशाङ्कुशम् ।
काञ्चीनद्धनितम्बबिम्बसुभगं मध्ये न किञ्चिच्च यत्
रूपं ते कुचचक्रवाकखिलसच्चन्द्रालिकं स्तात् सदा ॥ १२

ह्रींकारे हरमान्मथीन्दुरणितैः श्रीकामराजान्तिगे
खण्डे मण्डनमावहन्ति हरयः सङ्कोचतः संस्थिते ।
रुद्रः शक्तियुतश्च मन्मथकलाकामेश्वरेणेन्दुना
नादात्मा च परापरेण भवतान्मत्कामसम्पूर्तये ॥ १३

सच्चित्सौख्यमखण्डितं शिवमयं शक्तिस्वरूपोल्लस-
त्तार्तीये तव संहृतौ प्रथमतः सद्वृत्ततोज्जृम्भते ।
शङ्कातङ्ककलङ्कभावजनितं भेदः प्रथातः शिवे
तन्मे पूर्णशशाङ्कमण्डलनिभं कुर्यादशं दूरतः ॥ १४

कश्चिज्जन्मशतार्जितेन तपसा तत्पादपद्मद्वये
जातप्रीतिरनन्यभावमनसा लब्ध्वा गुरोः सत्कृपाम् ।
कं वेद त्रिपुरे तृतीयशकले कामेश्वराख्यं हरिं
पूर्णानन्दविभूतिदं त्रिजगतीवश्यंकरं तं श्रये ॥ १५

लब्ध्वादेशकराजवीक्षणकृपां त्वा वेद कामेश्वरीं
धन्यो यस्त्रिपुरे ! त्वदङ्घ्रिकृपया विश्वात्मसाम्राज्यभूः ।

लक्ष्मीस्तं वृणुते कटाक्षवशतस्तस्य ज्वरोप्लवा
नाशं यान्ति सदा विषाणि च महावेतालभूतग्रहाः ॥ १६

श्रीमत्यम्ब ! विराजते तव परं खण्डं तृतीयान्तिमं
बीजं तत्र हरौ हरौ प्रथमतो या रुद्रशक्तिः स्वयम् ।
संहारैकरसो मनोभवकलावह्नीन्दुसूरा परा
बिन्दुर्योऽपि परेश्वरो मम सदा कुर्वन्तु ते मङ्गलम् ॥ १७

## ८७. ॥ श्रीचतुःषष्टियोगिनीस्तोत्रम् ॥

(अनुष्टुप्)

ॐ ह्रीं दिव्ययोगी १ महायोगी २ सिद्धयोगी ३ गणेश्वरी ४ ।
प्रेताशी ५ डाकिनी ६ काली
७ कालि(ल)रात्रि ८ निशाचरी ९ ॥ १

हुङ्कारी १० सिद्धवैताली ११ ह्रीङ्कारी १२ भूतडामरी १३ ।
ऊर्ध्वकेशी १४ विरूपाक्षी १५
शुक्लाङ्गी १६ नरभोजिनी १७ ॥ २

षट्कारी १८ वीरभद्रा च १९ धुम्राक्षी २० कलहप्रिया २१ ।
राक्षसी २२ घोररक्ताक्षी २३
विश्वरूपा २४ भयङ्करी २५ ॥ ३

वैरी २६ कुमारिका २७ चण्डी २८
वाराही २९ मुण्डधारिणी ३० ।
भास्करी ३१ राष्ट्रटङ्कारी ३२
भीषणी ३३ त्रिपुरान्तका ३४ ॥ ४

रौरवी ३५ ध्वंसिनी ३६ क्रोधा ३७ दुर्मुखी ३८ प्रेतवाहिनी ३९
। खट्वाङ्गी ४० दीर्घलम्बोष्ठी ४१
मालिनी ४२ मन्त्रयोगिनी ४३ ॥ ५

कालिनी ४४ त्राहिनी ४५ चक्री ४६
कङ्काली ४७ भुवनेश्वरी ४८ ।
कटी ४९ निकटी ५० माया च
५१ वामदेवा कपर्दिनी ५२ ॥ ६

केशमर्दी च ५३ रक्ता च ५४ रामजङ्घा ५५ महर्षिणी ५६ ।
विशाली ५७ कार्मुकी ५८ लोला काकदृष्टिरधोमुखी ५९ ॥७

मडोयधारिणी ६० व्याघ्री ६१ भूतादिप्रेतनाशिनी ६२ ।
भैरवी च महामाया ६३ कपालिनी वृथाङ्गनी ६४ ॥ ८

चतुषष्टिः समाख्याता योगिन्यो वरदाः प्रदाः ।
त्रैलोक्ये पूजिता नित्यं देवमानवयोगिभिः ॥ ९

चतुर्दश्यां तथाष्टम्यां सङ्क्रातौ नवमीषु च ।
यः पठेत् पुरतो भूत्वा तस्य विघ्नं प्रणश्यति ॥ १०

राजद्वारे तथोद्वेगे सङ्ग्रामे अरिसङ्कटे ।
अग्निचौरनिपातेषु सर्वग्रहविनाशिनि ॥ ११

य इमां जपते नित्यं शरीरे भयमागते ।
स्मृत्वा नारायणी देवी सर्वोपद्रवनाशिनी ॥ १२

पू.आ.श्री रत्नसिंहसूरिविरचितम्

## ८८. ॥ श्रीशासनदेवीस्तोत्रम् ॥

(आर्या)

चउवीसंपि जिणिंदे वंदिय आणंदनिब्भरमणेणं ।
सासणदेविं थुणिमो जणणिं पिव सयलसंघस्स ॥ १

नीसेसविग्घसंघं सिग्घं संघस्स हरउ कुणउ सिवं ।
एसा सासणदेवी अतुलबला विजयविक्खाया ॥ २

सीसे मण(सीसगण ?) संजुयाणं
अम्ह गुरूणं विसेसओ संतिं ।
स - - - - - - कालं सासणदेवी समायरउ ॥ ३

धम्मपभावणहेउं अपुत्तमहिलाण पुत्त सयदाणं ।
आराहिया समाणा सासणदेवी कुणइ नूणं ॥ ४

कप्पूरागुरुकुंकुमसुगंधपुप्फाइपूइया संती ।
मोयगनिघरं दाउं सक्कारिय पवरवत्थेहिं ॥ ५

जो जं पत्थइ वत्थुं दुल्लहलंभंपि तिहुयणे सयले ।
सासणदेवी वियरइ भत्तिसणाहस्स तं तस्स ॥ ६

सासणदेवी निसुणउ अम्हं विन्नत्तियंति भणइ जणो ।
लहु दुक्खडाइं तुट्टा जइ कह वि हु भावसाराए ॥ ७

ता जिणहरम्मि अम्हे पोसहसालाइ सयणवग्गम्मि ।
आरुग्गं अब्भुदयं धणरिद्धि देउ सयकालं ॥ ८

को माहप्पं तुम्हं वन्नेउं तरइ देव (वि !) भुवणम्मि ।
जइ जंपइ धरणिंदो अहव सुरिंदो अह गिरिंदो ॥ ९

इय रयणसिंहसूरि सासणदेवीए संथवण काउं ।
धम्मियजणाण भद्दं रुद (?) कुणसु त्ति पत्थेइ ॥ १०

## ८९. ॥ श्री वैराट्यादेवीस्तवनम् ॥

श्रीमत्पार्श्वजिनेन्द्रस्य पदपद्म-मधुव्रतीम् ।
कल्याणसेवधीं देवीं वैरोट्यां संस्तुवयहम् ॥ १

नागाननां नागकरां नागभूषण-भूषितम् ।
वन्दे नागकृतोत्तमां नागिनं नागवाहनाम् ॥ २

धरणेन्द्रप्रिये मातः पातालतलपालिनी ।
जगत्त्रयेप्यचिन्त्यश्रीर्महिमानहिमानतो ॥ ३

त्वत्फणामणिविद्योतेः देवी द्योतितविष्टये(पे) ।
केमिभानू बृहद्भानू शीतभानू मरीचियः ॥ ४

भयकृव्यालए कोपि दृष्ट्यस्तु परमेश्वरी ।
तत्सहस्रवृतापित्वं जगनेत्रस्तुधात्रया ॥ ५

नाभौर्ध्यायन्ति योगिन्द्रा देवीकुण्डलिनीतीयम् ।
शादैशक्तिस्त्वमेवाञ्च भुक्ति-मुक्ति-फलप्रदा ॥ ६

नागेन्द्रमुख्यमहिषी मिन्दीवरवरद्युति ।
यस्त्वां चिन्तयते स्तोत्र रिपुभिर्नाभिभूयते ॥ ७

सुरधेनु मणिवृक्षा काङ्क्षितार्थ फलप्रदा ।
त्वत्प्रसादलवेनापि भवन्ति भु(भ)विनां भुवि ॥ ८

अष्टनागाकुलाधारे यत्कुले कुलदेवता ।
स्मर्यसे त्वं जगत्पूज्ये ! तत्कुले कीर्त्ति निर्मलम् ॥ ९

पञ्चोपचारै चर्वन्ती भवती ये प्रभावतीम् ।
ते विन्दन्ते तत्क्षणात्देव भवेयुः संपदापदम् ॥ १०

सुरासुरैरसाध्यं यत् स्थावरं जङ्गमं विषम् ।
त्वन्नाम मन्त्रमहात्म्यात् पीयूषीयती तदद्भूतम् ॥ ११

सर्प्पासदर्प्पाः निःशेषा दोषा रोगा शरीरगाः ।
त्वद्ध्यानादेवी पश्यन्ति तमांशीवांसुमक्षरात् ॥ १२

ऋद्धिः करे गृहे वृद्धि हृदि बुद्धि प्रबोधिनी ।
सिद्धि समीहिता तस्य चित्ते त्वं यस्य वर्त्तते ॥ १३

श्रीपार्श्वाभिधा(न) मन्त्रं पवित्रं जं जपन्ती यः ।
श्रीवैरोट्या महादेवी तस्यावस्यां प्रसीदती ॥ १४

एकात्वमपरा पद्मावती द्वे प्रभुताद्भुता ।
रक्षतः शासनं जैनं यथाधर्मं दयाक्षमे ॥ १५

प्रातः प्रगे पठतीयः प्रकटप्रभावं
देव्यास्स्तवं नवमिमं भुजगेन्द्रपत्न्याः ।
सौभाग्यभाग्यविभवं भूवि भूरिभावं
स्वं स्वीकरोति पुरुषोत्तमभाग्यलक्ष्मीः ॥ १६

(आर्यनन्दिलविरचित: ?)

## १०. ॥ श्रीवैरोट्यादेवीस्तव: ॥

(आर्या)

नमिऊण पासनाहं असुरिंदसुरिंदवंदिअं देवं ।
वइरुट्टाए थुत्तं अहयं समरामि भत्तीए ॥ १

जा धरणोरगदइआ देवी पउमावई य वइरुट्टा ।
सप्पसहस्सेहि जुआ देवा किर किंकरा जाया ॥ २

नागिणि नागारूढा नागकरा नागभूसियसरीरा ।
नागेहिं सिरमाला नागमुहा सा जए जयउ ॥ ३

धरणिंदपढमपत्ती वइरुट्टानाम नागिणी विज्जा ।
सप्पकरंडगहत्था सप्पाभरणा य जा निच्चं ॥ ४

वासुगि १ अणंत २ तक्खग ३
कंकोलय नाम ४ पउम ५ महपउमा ६।
संखकुलि ७ ससिनामा ८ अट्ठ कुलाइं च धारेइ ॥ ५

विंछिअ-कन्न-सिआली-कंकाही-गोरसप्प सप्पे अ ।
मोहे उंदुर चित्ती किक्किडूअ हिंडु अ वसे अ ॥ ६

वंतर-गोणस जाई सत्तवडा अहिवडा य परडा य ।
भमरसिराहि धिरोलिय धिरोलियाणं च नासेइ ॥ ७

हुंकारंतं च विसं अविसट्ट विसट्टपल्लवे चरइ ।
पारस नाम श्रीँ ह्रीँ पउमावइ धरणराएणं ॥ ८

सप्प ! विसप्प सरीसव ! धरणिं गच्छाहि जाहि रे तुरिअं ।
जंभिणि थंभिणि बंधणि मोहणि हुं फुट्टकारेणं ॥ ९

जो पढइ जो अ निसुणइ वइरुट्टामंतसंथवं पुरिसो ।
तस्सासेसविसाइं कायं न फुसंति भत्तिजुत्तस्स ॥ १०

घयगुलदहिखीरविमिस्सं महुरं पउरं च जो बलिं देइ ।
साहूण भत्तपाणं वइरुट्टा तं परिक्खेइ ॥ ११

इअ धरणोरगदइआ अन्नेहि वि निअकुलेहि विउलेहिं ।
देवी करेउ रक्खं वइरुट्टा भविअलोअस्स ॥ १२

नागिणि नागलोइ वइरुट्टा सरावी
जो तसु नाम लेइ तसु असुहनिवारी ।
अज्जाणंदिलेण संदिट्ठं एहिं थंडिलिनाहिवसेवं ॥ १३

अहववसेवं नाहिउ सेवं जाहि जाहि आसीविसमंडल ! ।
नागिणिपुत्तह एह कहिज्जउ एह आण म न लंघिज्जउ ॥ १४

जीवउ नागिणि नागलोउ अहव अलंजरवाउ ।
जिणि अणाह सणाह किउ नेउरि छुट्टउ पाउ ॥ १५

दिसि बंधउ अह दिसि बंधउ बंधउ नह पायालु ।
अम्हि अरिहंत दिक्करा वोलउ खंधिहि जालु ॥ १६

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे
हिंसंतु पन्नगा उँ ठः ठः ठः स्वाहा । एवं ॥ १७

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु भूअगा ॥ १८

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु रक्खगा ॥ १९

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु जोइणी ॥ २०

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु साइणी ॥ २१

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु डाइणी ॥ २२

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु चोरगा ॥ २३

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु बालगा ॥ २४

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु हिंसगा ॥ २५

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु मूसगा ॥ २६

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु मुग्गला ॥ २७

देवदेवस्स जं छत्तं तस्स छत्तस्स जो झओ ।
तेण छाएमि अप्पाणं मा मे हिंसंतु गुज्झगा ॥ २८

पास सामि जो नमइ तिसंझं हल्लिसहि जम्मवि जाइ अवंझं ।
कमठमहासुरकयउवसग्गं झाडिअकोवं वंझं हंसं ॥ २९

मुहि चंदप्पह हियइ जिणु मत्थइ पारिसनाथ ।
इणिं मुद्दिहिं मुद्दिउ को फेडणइ समत्थ ? ॥ ३०

उरि मुद्रि सिरि मुद्रि पाय मुद्र हत्थि मुद्र ।
इणि मुद्रि मुद्रिउ हिंडइ चारि समुद्र ॥ ३१

संखिहि तूरिहि आहविअ सामिअ ! दिन्निअमुद्र !
एअ दुलंघी कोइ न लंघइ पारसनत्थिअ मुद्र ॥ ३२

वादिचक्रवर्ति पू. आ. देवसूरीश्वरविरचिता

## ९१. ॥ श्रीकुरुकुल्लादेवीस्तुतिः ॥

(मालिनी)

प्रणवहृदि यदीयं नाम मायासमिद्धं
वहसि प(ष)डरलीनामातृकोपान्तरौद्रे ! ।
भगवति कुरुकुल्ले ! तं गलद्रोगराजं
निरुदयमपि भूता नैव लुम्पन्ति लूताः ॥ १

कमलति कपिकच्छुर्मालति व्यालपाली
तुहिनति वनवह्निर्माघति ग्रीष्मकालः ।
शिशिरकरति सूरः क्षीरति क्षारनीरं
विषममृतति मातस्त्वत्प्रभावेन पुंसाम् ॥ २

ज्वरभरपरितापोद्रिक्तपित्तातिवात-
क्षतविधुततनुर्यद्बुद्बुदच्छिद्ररौद्राः ।
अपि घनरसपूतिक्लिन्नतिन्नास्थिमांसा-
स्त्वदभिमुखमुपेता नैव सीदन्ति सन्तः ॥ ३

श्रुतिपथगतमुच्चैर्नाम यस्याः पवित्रं
विषमतमविषार्तिं नाशयत्येव सद्यः ।

त्रिभुवनमहिमा सा सम्मुखीभूतदेवी
वितरतु कुरुकुल्ला सम्पदं मे विशालाम् ॥ ४

ज्वलनजलमृगेन्द्रोद्दामसङ्ग्रामशत्रु-
प्रभृतिकमपयाति त्वद्गतध्यानमात्रात् ।
धनतनयशरीरारोग्यसौभाग्यभाग्या-
दिकमुपचयमेत्यभ्यर्चनात् तावकीनात् ॥ ५

कियति महति दूरे त्वन्नतानां श्रुतश्रीः
कथमिव दुरवापा तैर्जगज्जैत्रलक्ष्मीः ।
असुलभमिह किंवा वस्तु तेषां समस्तं
त्रिभुवनजननि ! त्वं वीक्षसे यान् प्रसन्ना ॥ ६

सुभटकरतले त्वं शस्त्ररूपाऽसि शक्ति-
स्त्वमवनिपतिषूच्चैर्देवि ! मन्त्रादिशक्तिः ।
किमपरमनिलादौ त्वं महाप्राणशक्तिः
सकलभुवनपूज्या त्वं च जैनेन्द्रशक्तिः ॥ ७

प्रतिविषयमजस्रं स्वेच्छया गच्छदेतत्
पवनविजययोगात् सन्निरुध्य स्वचित्तम् ।
यदिह किमपि सन्तः सन्ततं धाम पश्य-
न्त्यवितथमयमुच्चैर्देवि ! युष्मत्प्रसादः ॥ ८

सकलकरणरोधाद् ध्यानलीनस्य पुंसः
स्फुरसि मनसि यस्य त्वं महोद्द्योतरूपा ।
सपदि विदलयन्ती तस्य जाड्यन्धकारं
समुदयति समन्तात् केवलज्ञानलक्ष्मीः ॥ ९

पू.आ.श्री मुनिसुन्दरसूरिविरचिता

सूरिमन्त्रचतुर्थ-पीठाधिष्ठायक-

## १२. ॥ श्रीगणिपिटकयक्षाधिराजस्तुतिः ॥

(आर्या)

श्रीमन्त्रपीठनाम्नि प्रतिष्ठितं सूरिमन्त्रतुर्यपदे ।
गणिपिटकयक्षराजं सर्वारिजयश्रिये नौमि ॥ १

अनपञ्चप्रज्ञप्तिश्रीमद्यक्षाधिपोऽतिजिनभक्तः ।
श्रीगौतमपदसेवानिरतस्तद्भक्तविघ्नहरः ॥ २

शरचापखड्गखेटकमुख्यास्त्रैः विश्वरक्षणप्रभुभिः ।
वरदाभयैश्च हस्तैर्विंशत्या भ्राजमानाङ्गः ॥ ३

षोडशयक्षसहस्रप्रभुर्जगज्जैत्रविक्रमो रिपुहा ।
सर्वाश्रितेष्टदानं(ने) प्रगल्भमहिमाम्बुधिर्जयतात् ॥(त्रि.भि.) ४

जिनशासनविद्वेषिव्रातकृताशेषविघ्नतिमिररविः ।
सुविहितगुरुगुणसङ्घाऽनवरतरक्षाभियुक्ततमः ॥ ५

गणधरमन्त्राराधकसूरिवरप्रार्थितार्थकल्पद्रुः ।
सर्वक्षुद्रोपद्रवहरणोद्युक्तः सकलसङ्घे ॥ ६

स्मृतिपूजास्तवनाद्यैः सन्निहितोऽस्यवहितश्च यक्षेश !
श्रीगणिपिटक ! सुरोत्तम ! विघ्नहृतेर्देहि मे तुष्टिम् ॥ ७

स्तूयमान महानेकमुनिसुन्दरसंस्तवैः ।
इति मे स्तुवतो भूया यक्षेश सकलेष्टकृत् ॥ ८

पू.आ.श्री मुनिसुन्दरसूरिविरचिता

श्रीगणधरमन्त्रपञ्चमपीठ–

## १३. ॥ श्रीमन्त्रराजाधिष्ठायकस्तुतिः ॥

(अनुष्टुप्)

पञ्चमे गणभृद्विद्यापीठे श्रीमन्त्रनायके ।
प्रतिष्ठितान् सुरेन्द्रा[दी]न् स्तुवे द्वेषिजयश्रिये ॥ १

सौधर्मेन्द्रादयः कल्पाधिपा मे दश वाञ्छितम् ।
ददतां चमरेन्द्राद्या भवनेशाश्चा विंशतिः ॥ २

दद्युः कालमहाकालप्रमुखा व्यन्तरेश्वराः ।
श्रेयःसन्निहिताद्याश्च मम षोडश षोडश ॥ ३

ज्योतिश्चक्राधिपाश्चन्द्रसूर्याः सर्वग्रहान्विताः ।
रोहिण्याद्यास्तथा विद्यादेव्यः षोडश पान्तु माम् ॥ ४

गोमुखप्रमुखा यक्षाः पान्तु शासनरक्षकाः ।
चक्रेश्वर्यादिदेव्यश्च मां चतुर्विंशतिः सदा ॥ ५

सुराः सन्निहिताः सर्वे सुर्यश्चेद्धप्रभावभाः ।
रेवतीरोहिणीनागार्जुनार्यखपुटादयः ॥ ६

यशोभद्रादयश्चापि सूरयो महिमार्णवाः ।
सिद्धश्रीसूरिमन्त्रा मे रान्तु विघ्नहृतोऽर्थितं ॥ ७

इति स्तुतगुणाः श्रीमन्मन्त्रराजप्रतिष्ठिताः ।
देवता ददतामिष्टं मुनिसुन्दरसूरये ॥ ८

मन्त्रीश्वर श्री वस्तुपालप्रणितम्

## १४. ॥ श्रीकपर्दियक्षराजस्तोत्रम् ॥

(वसन्ततिलका)

श्रीमद्युगादिजिनपूजनबद्धकक्षः
प्रत्यूहभीतभुवनाभयदानदक्षः ।
प्रौढप्रभावविहिताऽखिलसङ्घरक्षः
शत्रुञ्जये विजयतां स कपर्दियक्षः ॥ १

दारिद्र्यरौद्रतम-सन्तमसं समन्ता-
न्नो तस्य वेश्मनि कृतस्मयमभ्युदेति ।
यक्षं कपर्दिनमदुर्दिनभानुमन्त-
मन्तःस्फुरन्तमनिशं प्रसमीक्षते यः ॥ २

चिन्तामणिं न गणयामि न कल्पयामि
कल्पद्रुमं मनसि कामगवे न वीक्षे ।
ध्यायामि नो निधिमधीतगुणातिरेक-
मेकं कपर्दिनमनुक्षणमेव सेवे ॥ ३

काले कलौ कवलयत्यपि देवशक्तिं
व्यक्तं प्रभावविभवस्तव यक्षराज ! ।
सन्त्यापयत्यपि महीमिह घर्मकाले
ध्वंशेत शैत्यमहिमा न हिमाचलस्य ॥ ४

यस्यार्चनारसमये समये विसर्पत्-
कालागुरुस्फुरितधूमतमच्छलेन ।
नश्यन्ति भक्तजनता दुरितानि तानि
तं श्रीकपर्दिनमहर्दिनमाश्रितोऽस्मि ॥ ५

व्यालादि न क्रमति तीर्थपथा(पथेऽ)धिपेऽस्मिन्
पाथोनिधौ घनविपल्लहरीपरीते ।
यात्रोत्सवं मनसिकृत्य कर्पदियक्षं
त्वां कर्णधारमवधारयति जनोऽयम् ॥ ६

त्वं निर्धने निरवधिर्निधिरेव साक्षात्
त्वं क्षीरचक्षुषि गतक्षुतमेव चक्षुः ।
त्वं रोगि[णि] स्फुटगुणं प्रगुणत्वमेव
त्वं दुःखिते सुखमखण्डितमेव देव ! ॥ ७

दुष्कर्मघर्ममथनी विनिपातजात-
चेतोविकारजरजःप्रशमप्रगल्भा ।
उल्लासनाय जिनशासनकाननस्य
पीयूषवृष्टिरियमस्तु कपर्दिदृष्टिः ॥ ८

ते सिन्धु-सिन्धुर-गर-ज्वर-मार-वैरि-
पारीन्द्र-पावकभवस्य भयस्य दूरे ।
यक्षेश्वरांह्रिनरखरोचिरपूर्वदूर्वा-
मङ्गल्यपल्लवलवैरवतंशिता ये ॥ ९

काव्येषु भक्तिभरभासुरमानसानां
मुक्तालतेव शुचिवर्णगुणोज्ज्वलश्रीः ।
यक्षाधिपस्तुतिरियं तिरयन्त्यघानि
सम्पद्यतां सकलसङ्घमहोत्सवाय ॥ १०

पू.मु.श्री चतुरसागरविरचितम्

## १५. ॥ श्रीमाणिभद्रस्तोत्रम् ॥

माणिभद्रं सुरैः पूज्यं, निर्जरं सौभाग्यदायकम् ।
भद्रसम्पादकं नित्यं, द्रव्यार्थं समुपास्महे ॥ १

स्वर्गाद् भक्तजनं विलोक्य, वरदोऽभूद्धेमसूरीश्वरम् ।
धर्मस्यात्यकरोत्प्रचारममलं विश्वे समस्ते तु यः ॥
स्वायत्तीकृत्तवान् गुणौघविभवैर्मोहम्मदीयाधिपान् ।
तस्य श्रीमाणिभद्रपादयुगलं ध्याये सुरैरर्चितम् ॥ २

स्वर्गात्तु यं भक्तजनं निरीक्ष्य, वरः प्रदत्तः किल हेमसूरिम् ।
धर्मोपदेशः भुवने प्रदत्तः तं माणिभद्रं शिरसा नमामि ॥ ३

समागत्य स्वर्गात्त्रिभुवनपतिश्चार्त्तशरणो ।
वरेणोद्दामेनामृतरसरसितै र्मञ्जुवचनैः ॥
तुतेषादौ सूरिं विमलचरितं हेमविजयम् ।
नमस्तस्मै भक्त्या सुखद-माणिभद्राय शिरसा ॥ ४

जनित धार्मिक विघ्नघटाशने ! सुरपते ! करुणावरुणालय ।
हृदयवांछित-सिद्धकर ! प्रभो !
वितर मे माणिभद्र ! शिवंवरम् ॥ ५

भूतप्रेतो डाकिनी शाकिनी वा, दुष्टा देवा राक्षसा व्यन्तराश्च ।
नाम्ना यस्याऽऽयान्ति शान्तिनितान्तं,
तन्देवेशं माणिभद्रं नमामि ॥ ६

तपागच्छ रक्षाकरं जैनधर्मे, नवोज्जिवनस्याभिकर्त्तारमीशं ।
प्रभामण्डलोद्भासिवक्त्रं विशालं,
दयासागरं माणिभद्रं नमामि ॥ ७

आरोहणैरावणपृष्टष्टभागे, विराजमानं विधुकान्तिकान्तम् ।
वरप्रदातारमनन्तवीर्यं, श्री माणिभद्रं शिरसा नमामि ॥ ८

श्रद्धास्रोतः स्राविणै यस्य नित्यं,
सेवालग्नौ भैरवौ कृष्णागौरौ ।
तं विघ्नालिध्वंसकं पूज्यपादं,
भक्त्युद्रेकान्माणिभद्रं नमामि ॥ ९

वाराहवक्त्रेण सुशोभमान-मेरावणरूढमनके शक्तिम् ।
सर्वेश्वरं भद्रकरं वरेण्यं, श्रीमाणिभद्रं शिरसा नमामि ॥ १०

योगिन्यश्च समे वीराः सेवायां यस्य नित्यशः ।
विद्यमानास्तथाभूतं माणिभद्रं नमाम्यहम् ॥ ११

गुरजेरऽथ मरौ प्रथमोऽभवत्, सकलमानव-पूज्यतरः प्रभुः ।
रविशशिदिधिदीप्तिमुखश्च, तं भयहरं माणिभद्रमहं भजे ॥१२

त्रैलोक्यकीर्ति सुरवृन्दवन्द्यं, यथेष्टसिद्धि-प्रदमीशमाद्यम् ।
बद्धाञ्जलिभक्तियुतो नितान्तं,
भजाम्यहं चेतसि माणिभद्रम् ॥ १३

सर्वामरैः सिद्धिजयाऽभिलाषैः साध्वर्च्यते यस्य पादारविन्दम्।
तन्देवदेवेशमनन्तभक्त्या नमामि वीरं ननु माणिभद्रम् ॥ १४

हिन्दुसिक्खमता मुहम्मदमता ये पारसीयास्तथा
इशाइमतमागताश्च पुरुषास्त्वन्येऽपि वै पन्थिनः ।
श्रद्धाभावमुपागतास्तु परमं यस्योद्गुणेष्वक्षयं,
तं वन्देऽखिललोकमान्य-विभवं श्रीमाणिभद्रं प्रभुम् ॥ १५

यस्य प्रसादाज्जगदीश्वरस्य, नित्यं मनोवाञ्छितसिद्धिरस्तु ।
भवाम्बुधौ मङ्गलमातनोतु,
स माणिभद्रः सुखशान्ति दाता ॥ १६

वन्ध्यापि या भक्तिमवेत्य सम्यक्,
ध्यानं करोतीह सुताप्ति-हेतुम् ।
सुतं प्रयच्छत्यतिकान्तियुक्तं,
तस्यै दयालुः किल माणिभद्रः ॥ १७

गजाश्वसिंहेरतिभीतिभीतः तथा भजद्वृश्चिक-सर्प-दृष्टः ।
रोगैरनेकैरभिपीडितो वा,
सदा सुखार्थ भुवि माणिभद्रम् ॥ १८

हे देव ! मे जन्म गतान्यमूनि, दुःखानि दूरीकुरू सर्वथैव ।
त्वदीयपादाम्बुजसेवयैव,
यास्यामि मोक्षं ननु माणिभद्र ॥ १९

न मे सखा भूमितलेऽस्ति
कश्चित् त्वत्तः परो मोहविनाश-हेतुः ।
त्यक्त्वा क्व गच्छामि भवन्तमेव,
न मे गतिः क्वाऽपि तु माणिभद्र ॥ २०

सुतार्थी भजेत्पुत्रलाभाय नित्यं, गदार्त्तश्च नैरोग्यमाप्तुं मनुष्यः ।
मुमुक्षुस्तु मोक्षाय मोक्षेकहेतुं,
धनार्थी धनप्राप्तये माणिभद्रम् ॥ २१

राज्येऽभि सम्मानकर कृपालुः कारागृहात् बन्धनमुक्ति हेतुः ।
देवः परो नास्ति वर-प्रदाता,
श्रीमाणिभद्रादिह विश्वमध्ये ॥ २२

स्वच्छ-प्रभामण्डलशोभि, विश्वं विश्वैकनाथं नवमञ्जुलाभम् ।
भद्रार्णवं विघ्नहरैकहेतुं नमामि दैवार्चितमाणिभद्रम् ॥ २३

यशोवित्त-विद्या-प्रदातारमीडयं,
जगद्वन्दनीयं तपागच्छनाथम्,
पवित्रव्रतं सर्वदाऽहं स्मरामि
दयाम्भोनिधि माणिभद्रारव्यदेवम् ॥ २४

लक्ष्मीसागरसूरि पूज्य चरण शिष्यो भवत्तस्य वै ।
योग्योभोज निधिर्गुणी समभवत् विख्यातकीर्तिक्षितौ ।
तद्वंशे किल कीर्तिसागर इति प्राभुत्तपागच्छक,
लब्धं विश्वतलैर्गुणैर्निजभवैः स्थानं ह्युपाध्यायकम् ॥ २५

चतुर सागर निर्मितमस्ति यत्-स्तवनामाशु फलप्रदमद्भुतम् ।
प्रतिदिनं यदि भक्तियुतः पठेत्
मनसि वाञ्छितमस्तु प्रपूरितम् ॥ २६

शरखगाङ्क निशाकरवत्सरे, चतुरसागरनिर्मितसंस्तवम् ।
पठति यः सततं सुपवित्रितः,
स लभते भुवि वाञ्छितमद्भुतम् ॥ २७

# १६. ॥ श्रीमाणिभद्रवीरस्तोत्रम् ॥

(अनुष्टुप्)

ॐ ह्रीँ श्री माणिभद्र इन्द्र ! सर्वमङ्गलकारकम् ।
प्रत्यक्षं दर्शनं देहि म(स)च्छ्रद्धा प्रीति-भक्तितः ॥ १

विद्यां देहि धनं देहि पुत्रं देहि च पुत्रिकाम् ।
कीर्तिं देहि यशो देहि, प्रतिष्ठां देहि च स्त्रियम् ॥ २

सर्वं मे वाञ्छितं देहि, सुखं शान्ति प्रदेहि मे ।
वादे विवादे युद्धे च, जयं मे कुरु सर्वतः ॥ ३

राज्यं च राज्यमानं च बलबुद्धि प्रवर्द्धय ।
गर्भस्थबालकं रक्ष, रोगेभ्यो रक्ष बालकान् ॥ ४

आधिं व्याधिं विपत्तिं च, महाभीतिं विनाशय ।
घातकेभ्यश्च मां रक्ष, रात्रौ दिवा च सर्वदा ॥ ५

अपमृत्यु प्रयोगाणां, नाशतो रक्ष मे सदा ।
दैवी संकटतो रक्ष, आकस्मिकविपत्तितः ॥ ६

शाकिनी-भूत-वैतालान् राक्षसांश्च निवारय ।
वने रणे गृहे ग्रामे, रक्ष राज्यसभादिषु ॥ ७

इष्टसिद्धिं महासिद्धिं जयं लक्ष्मीं विवर्द्धय ।
तपागच्छ-नायक ॐ ह्रीँ श्रीँ माणिभद्रवीर ॥ ८

नमोस्तु ते मम शान्तिं तुष्टिं पुष्टिं ऋद्धिं वृद्धिम् ।
सिद्धिं समृद्धिं वश्यं रक्षां च, कुरु कुरु स्वाहा ॥ ९

## १७. ॥ श्रीमाणिभद्रवीरस्तोत्रम् ॥

ॐ नमामि माणिभद्रं, वंदे वीरं महाबलीम् ।
विपत्तिकाले मां रक्ष रक्ष मां देव ! माणिभद्रे ॥ १

ॐ आँ क्राँ ह्रीँ मंत्ररूपे, महाबलीं रक्ष सदा ।
मां शरणं शरणं तव, रक्ष मां देव ! माणिभद्रे ॥ २

भ्रां भ्रीं भ्रूं भ्रः मंत्ररूपे, तव भक्तिप्रभावतः ।
प्रत्यक्षं दर्शनं देहि, रक्ष मां देव ! माणिभद्रे ॥ ३

धर्मार्थकाममोक्षाच्चैव, कामदातृ सुखसंपदा ।
महाभीति विनाशय, रक्ष मां देव ! माणिभद्रे ॥ ४

झाँ झीँ झूँ झः मंत्ररूपे, तव शरीरं सुशोभितम् ।
स्राँ सः ते तु प्रत्यक्षं, रक्ष मां देव ! माणिभद्रे ॥ ५

सुखडी श्रीफलं चैव, कामदं मोक्षदं तथा ।
आधिं व्याधिं विपत्तिं च, रक्ष मां देव ! माणिभद्रे ॥ ६

राजभयं चोरभयं नास्ति, न च सर्पेण डस्यते ।
सर्वमङ्गलकारकं देव, रक्ष मां देव ! माणिभद्रे ॥ ७

पू.मु.श्री आनन्दवल्लभविरचितम्

## १८. ॥ श्रीबटुकाष्टकम् ॥

(उपजातिः)

शीर्षे फणीन्द्रं गजचर्मराजितं, प्रचण्डदोर्दण्डजितारिमण्डलम् ।
सुरक्तनेत्रद्वयचारुविग्रहं,
वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥ १

सद्ग्रामसद्रङ्गसुशैलकानने, प्रधानवाप्यां प्रवरे जलाशये ।
गृहीतपूजं नतलोकपत्कजं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥२

सुगन्धसद्वर्णसुपुष्पमालया, सुशोभितं ह्यष्टभयान्तकारकम् ।
अनेकविघ्नप्रकरैकवारणं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥३

सिन्दूरतैलान्वितमूर्तिमालितं, सर्वोपहारैर्महितं दिवानिशम् ।
अनेकलोकार्थविधानतत्परं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥४

कदापि सद्बाल्ययुतं मनोहरं, कदापि चोद्दीपितयौवनोदयम्।
कटिप्रदत्तोद्धुतघुर्घरारवं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥५

चञ्चद्त्रिशूलं क्रमपादुकायुगं, सुकेशपाशं गलमुण्डमालकम् ।
अरातिवर्गस्य विदारणे क्षमं, वन्दे त्रिसन्ध्यं बटुकं सनातनम्॥६

सुप्ते स्थिते जाग्रति शैलमस्तके, सुदुर्धरे वैरिगणे समागते ।
सद्यानपात्रं बहुकामितार्थदं,
वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥ ७

कार्यस्य सिद्धौ वरदं शुभार्थिनां, पुंसामभीष्टार्थकरं निरन्तरम् ।
श्ववाहनं सज्जनहर्षकारणं, वन्दे त्रिसन्ध्यं बटुकं सनातनम् ॥८

गङ्गेजीमे वरे श्रीमन्नेमीश्वरजिनालये ।
बटुकः क्षेत्रपालोऽयं भूयात् साहाय्यकारकः ॥ (अनुष्टुप्) ९

पू.आ. श्रीधर्मघोषसूरिविरचितम्

## ९९. ॥ लोकान्तिकदेवस्तवनम् ॥

थोसामि जिणे जेहि उ विन्नविया पव्वयंति जं दाउं ।
तज्जियकप्पियलोगंतिदेवट्ठाणाइकित्तणओ ॥ १

असंखतमेऽरुणवरुदहिम्मि जोयणसहस्सबायाला ।
गंतु जलोवरिमतला उप्पइओ आउतमकाओ ॥ २

पढमं जोयणसंखिज्जवि वित्थडो उवरुवरिय संखिज्जे ।
महयंधयाररूवो उड्ढं आवरिय चउकप्पो ॥ ३

बंभस्स रिट्ठपयरंमि निट्ठिओ हिट्ठिमल्लगागारा ।
उवरिं कुक्कडिपंजरसंठाणो चउदिसिं तत्थ ॥ ४

दो दो अ कण्हराई सचित्ताचित्तपुढविपरिणामा ।
पुव्वाइ मज्झिमादाहिणाइ वज्झाफुसहिं कमसो ॥ ५

पुव्वावरा छलं सातं सा पुण दाहिणुत्तरा बज्झा ।
अब्भितरचउरंसा सव्वा विय कण्हराईओ ॥ ६

जं मुत्तरायया तिरियवित्थडा पुरिमपच्छिमा दो दो ।
इय दाहिणुत्तरिल्ला पुव्वावर आयया चउरो ॥ ७

विक्खंभे संखिज्जा जोयण आयामओ य संखिज्जा ।
अक्खाडग संठाणा ईसाणाइसु कमा मज्झे ॥ ८

अच्ची य अच्चिमाली विरोयण पहंकरे च चंदाभे ।
सूराभ सुकाभे सुप्पइट्ठ रिट्ठे नव विमाणा ॥ ९

सारस्सयमाइच्चा वण्हि वरुणगद्दतोअ तुसिया य !
अव्वाबाह अगिच्चा रिट्ठभिहा तेसु संति सुरा ॥ १०

दुदुदु तिसु पढोसग सयसंगहिय चउदस सहस्स चउदहिआ ।
सत्तुत्तर सग सहस्सा नवुत्तरा नवसया कमसो ॥ ११

अडसयराऊ तिभवाइसिवगई सम्मदिट्ठिणो भविया ।
ते वेयालियकप्पा निय निय परिवारिया इन्तु ॥ १२

जय जय वाभिमुहा भणंति बुज्झाहि लोगनाह ! लहुं ।
भयवं ! तिजयहियत्थं सुहम्मतित्थं पवत्तेति ॥ १३

तो वर वरित्ति उग्घोसिविय तिगाइसु किमिच्छियं बहुसो ।
उदयाइ भोयणं जा सधणममियमणुदिणं दिंति ॥ १४

तइ सुरविरइय कणगेग कोडि अडलक्ख पायरासं जा ।
तं कोडि तिसय अडसीयसीइ लक्खा हवइ वरिसे ॥ १५

तो उग्गतवेणंतररिऊ तविय धम्मक्कित्ति जिणलच्छि ।
पाविंसु तिविहवीरे तिविहं तिविहेण ते नमह ॥ १६

पू.मु.श्री धर्मवर्द्धनगणिविरचिता

# १००. ॥ नवग्रही न्यायपरीक्षा ॥

(आर्या)

सख्ये सत्यपि दहनाद्रक्षति यत्नं विचक्षणा त्रयथा ।
ग्रहराजो ग्रहराजौ हिमाशुमंगारकादर्वाक् ॥ १

शीताद्बिभ्यति सर्वे शीतार्त्तिर्भवति दुःसहा सततम् ।
अङ्गारकमुष्णाशुं तत्तिष्ठत्यन्तरा हिमरुक् ॥ २

यत्रायाति कुपुत्रो जनयति वैरं हि जनकपुत्राणाम् ।
यद्विग्रहं गृहालौ सोऽयं सोमस्य सौम्यस्य ॥ ३

निवसति यद्यपि दैवाद् ज्ञः क्रूराक्रूरयो र्द्वयोर्मध्ये ।
सत्प्रकृतेरनुभावाद्यः सौम्यः सौम्य एव स्यात् ॥ ४

गुरुरधिकः सर्वगुणै र्गुरुसेवा नैव निःफला भवति ।
समया गुरुं वसन्तौ ग्रहावुभौ बुधकवी जातौ ॥ ५

तारुण्ये सति शुक्रे बोभूयन्तेऽसमे शुभा कामाः ।
तदभावे तदभावाच्छुक्रबलं को न कामयते ॥ ६

उच्चपदादिस्थित्या पितुरुक्त्याचलति वैपरीताद्यः ।
सत्याभिधो बुधोक्त्या मन्दो मत्या पुनर्गत्या ॥ ७

पर्व्वण्यमृतं पेन्तु (पिबति) तुदति सुधांशुं विधुन्तुदः साक्षात् ।
लब्ध्वास्वादो लोके शीर्षे छिन्नेऽपि न हि तिष्ठेत् ॥ ८

स्वस्वामिनं विनाऽपि हि निजशक्त्या कार्यसिद्धिमातनुते ।
किं नो कबन्धरूपः केतुः स्तुत्यो ग्रहश्रेणौ ॥ ९

श्रेष्ठां सुवर्णरचितां नवग्रहीं मुद्रिकां सुधर्ममतिः ।
प्रीत्या परीक्षमाणाः परीक्षते तत्त्वरत्नानि ॥ १०

## १०१. ॥ श्रीनवग्रहमन्त्राक्षरस्तोत्रम् ॥

प्रथम प्रणव मायाबीजं श्रियं सु नत्वा
थलपति श्रीगोडीपार्श्वनाथो प्रसन्नः ।
श्रीमद्वर्णं पउमादेवीमभ्यष्टसिद्धिः
अट्टे मट्टे दुष्टसर्वशत्रुविघटम् ॥ १

(अनुष्टुप्)

अथातः ग्रहसर्वाणि पार्श्वपादाब्जसेवितम् ।
दासानां दुःखहर्त्ता च सर्वाभीष्टफलप्रदम् ॥ २

धर्मकामार्थमोक्षान्ताः मनोवाञ्छितदायकः ।
रविभौमशनिराहुः महाकष्टं तु घातकम् ॥ ३

नमस्कारं च मार्त्तण्ड ममोपरि कृपां कुरु ।
ॐ स्त्रां स्त्रीं स्त्रौं स्त्रः स सूर्यः मम तुष्टतु ॥ ४

ॐ श्रां श्रीं श्रौं श्रः शशिदेव नमोऽस्तु ते ।
अमृतां च सदामीयं स चन्द्रः मम तुष्टये ॥ ५

ॐ क्रां क्रीं क्रौं क्रः कुजदेव दयां कुरु ।
भूमिपुत्र भयच्छेद सर्वारीष्टहरो हरः ॥ ६

ॐ ब्रां ब्रीं ब्रौं ब्रः बुधो ज्ञः बहुसंपदः ।
शशिसुतो न रिष्टस्त्वं ऋद्धिवृद्धिप्रदो भव ॥ ७

ॐ ज्रां ज्रीं ज्रौं ज्रः जीवदेवो बृहस्पतिः ।
भुर्भुवोधनदाता च मां स्वामिस्तु कृपां कुरु ॥ ८

ॐ ह्रां ह्रीं ह्रौं ह्रः स शुक्रः असुरोगुरुः ।
शुक्लवर्णं सौख्यकर्त्ता वर्णदुःखं तु चूरय ॥ ९

ॐ ध्मां ध्मीं ध्मौं ध्मः शनिदेवो रविसुतः ।
तुष्टमानः ममानन्दं मम शत्रुहरोद्भुतम् (भव) ॥ १०

ॐ रां रीं रौं रः आसुरिः सिंहीकासुतः ।
रोगशोकदुःखहर्त्ता सर्वकोटिफलप्रदः ॥ ११

ॐ भ्रां भ्रीं भ्रौं भ्रः केतुः कल्याणकारकः ।
स एव सुखदाता च दुःखसर्वनिवारकः ॥ १२

श्रीपार्श्वचरणकमल–भक्तियुक्तनवग्रहाः ।
सदानन्दमहार्थाय नित्यपाठं करिष्यति ।
पार्श्वदेवप्रतापायः चिरं जीयाय शाश्वती ॥ १३

## १०२. ॥ श्रीनवग्रहस्तोत्रम् ॥

(अनुष्टुप्)

संपूजयेत् ततो वास्तुं, स्वासनं तु विशेषतः ।
भूतशुद्धि ततः कार्या, प्राणस्थापनचिन्तनम् ॥ १

प्राणायाम त्रयं कार्यं, स्वमन्त्रेण साधोत्तमः ।
प्राणायाम प्रकारेण, प्राणरोधं सकृच्चरेत् ॥ २

स्वमन्त्रेण तथा न्यासं, नाममन्त्रेण चापरम् ।
कुर्यादर्घ प्रतिष्ठां च, सामान्येन मुनिवरः ॥ ३

ततो मण्डलमुद्धृत्य, सुरेखं सुमनोहरम् ।
रजसा ताण्डुलैर्वापि, कुङ्कुमादि विचित्रितैः ॥ ४

बिन्दुत्रिकोण षट्कोण द्वादशारद्वयं तथा ।
चक्रं सप्तति पत्राख्यमष्टारं च त्रिपट्टिकम् ॥ ५

पार्थिवं च तथा चक्रं, चतुर्द्वारोपशोभिताम् ।
गृहांस्तत्र प्रतिष्ठाप्य इन्द्रादि केतका यजेत् ॥ ६

अष्टपत्रे गृहापूज्याः सोमाद्या ध्यानपूर्वकाः ।
भानोः सप्तति भेदा ये, तेऽर्च्याः सप्ततिपत्रके ॥ ७

मासाधिपा द्वादशारे, द्वादशारे च तापनाः ।
षट्कोणेंऽगानि पूज्यानि, त्रिकोणे च त्रिकालकम् ॥ ८

आधारादि यजेत्सर्वं, मोदादि च ततः परम् ।
कुम्भं संस्थाप्य विधिवदावाहन पुरःसरम् ॥ ९

षोडशैरूपचारैश्च, बहुभिर्वाथ साधक ! ।
पूजनान्ते तथा जापः, दानानि रविणा सह ॥ १०

मन्त्रेणानेन मुनीन्द्र ! शृणु मन्त्रं रविप्रियम् ।
दारिद्र्यदुःखशमनं, सर्वाभयविनाशनम् ॥ ११

शृणु साधक ! वक्ष्यामि, ध्यानपूजनमुत्तमम् ।
कृतेन येन सर्वार्थसिद्धिदो भास्करो भवेत् ॥ १२

## १०३. ॥ श्रीनवग्रहाह्वाननम् ॥

ॐतरुणोग्रतरकरविसरप्राग्भारप्रहि(ह)ताशेषदोषतमस्काण्डाडम्बरं विविधनमदमर-मुकुटतटकोटिहठघटितसुखसद्मपदपद्मपीठ-लुठन्मन्दारपुष्पप्रकरं जिनाभिषेकोत्सवे सूर्यदेवमाह्वानये ॥ १

ॐअमितहरहसितघनदुग्धदधिपिण्डनवशङ्खवर-हंसमणिहारनवतारसुरश(स)रित्कल्लोल-सद्यशःप्रसरसोदरं निस्सीमपवित्रचित्रनक्षत्रमण्डलीपुरस्सरखेचराधीश्वरं शिशिरमयूषं जिनाभिषेकोत्सवे चन्द्रदेवमाह्वानये ॥ २

ॐवरदरदजपकुसुमबन्धूकर्किकिल्लिनवकुसुमसिन्दूरसन्ध्याभ्रत-डिल्लेखासमान-स्फुरदनलक्रूरनेत्रज्वलदनलज्वालाजालजटिलं रक्तालङ्कारं दरदलितपद्मममणिकिरणप्रवालचञ्चत्करकमल-कलिता-ऽक्षमालकमण्डलुं जिनाभिषेकोत्सवे मङ्गलदेवमाह्वानये ॥ ३

ॐप्रवरसिद्धगन्धर्वामरखचरकिन्नरेन्द्रनमदमरशिरः स्त्रस्तामन्द-मन्दारमकरन्दलुब्धमत्तालिकुललुठित-पादपीठस्थलं नाशा-पुटोभर्यात(?) प्रदत्तपवित्रनेत्रेन्दीवरसरोजासनस्थाङ्गीकृत-ज्ञानमुद्रोत्तरयोगीन्द्रं जिनाभिषेकोत्सवे बुधदेवमाह्वानये ॥ ४

ॐप्रवरप्रणतसुरविसरशिरोरत्नसंघट्टघृष्टचरणनखकिरण-निकरविरचितेन्द्राखण्डकोदण्डं विविधबुधप्रभाप्रध्व-स्तास्तोकतमश्चक्रं स्वर्णवर्णप्रभापूर्णत्रिविष्टपं कमण्डल्व-क्षमालोपेतं जिनाभिषेकोत्सवे बृहस्पतिदेवमाह्वानये ॥ ५

ॐशरदभ्रशुभ्राभ्रोदरशशधरकरनिकरसोदारहारनीहार-
क्षीरनीरडिण्डीरकाशपुष्पप्रकाशसंकाशयशःप्रसरसोदरं
अनेकदक्षयक्षरक्ष[कीना]शाक्षौहिणीनमदखिलमौलिमालालङ्कृत-
चारुचरणयुग्मं शुभ्रनेपथ्यं जिनाभिषेकोत्सवे शुक्रमाह्वानये ॥६

ॐसजलजलदनीलालिपटलगवलघनकज्जलतमालश्यामलं
करतलपरिकलितचण्डाखण्डलोहदण्डाघातघातित-
सकलविश्वान्तर्वर्त्तिप्राणिचक्रं रक्तान्तर्वक्रोग्रक्रूरनेत्रं
जिनाभिषेकोत्सवे शनैश्चरदेवमाह्वानये ॥ ७

ॐसजलजलधराटोपदोषातमस्तोमभ्रमद्भ्रमरसोदरं
अभिनवेन्दुकलाकोटिविकटनतोन्नतदंष्ट्राकरालव्यात्तवक्त्रवि
[जि]ह्वा (?) गलल्लोललालानिकरं जिनाभिषेकोत्सवे
राहुदेवमाह्वानये ॥ ८

ॐ कृशानो...ष्ठा(?)लिव्यालगवलाञ्जनमरकतेन्द्रनील-
हरगलतमालध्वान्तव्यूहप्रतिमं कालिन्दीपयः सोदरोदार-
भुजगेन्द्रस्फारफणातपत्रं चलन्नूपुरारावकिङ्किणीरवोत्तालव्या-
कुलितासुरसुन्दरीवृन्दवन्दितोदारस्फारचरणपीठं
मेचकाम्बरा-भरणभूषितविग्रहं जिनाभिषेकोत्सवे
केतुदेवमाह्वानये ॥ ९

श्रुतकेवली पू.आ. श्री भद्रबाहुस्वामिविरचितम्

## १०४. ॥ श्रीआदित्यस्तोत्रम् ॥

पद्मप्रभु(भ?)जिनाधिशं प्रणम्य पदपङ्कजम् ।
दिवाकरस्य स्तोत्रस्य (त्र यं) क्रियते जगम(द?)द्भुतम् ॥ १

रक्तवर्णमहातेजं सर्वरत्नविभूषितम् ।
ऋणं पापं क्षयं यान्ति प्रभाते सूर्यदर्शनात् ॥ २

आदित्यं पूजयेन्नित्यं उदयन्तं दिने दिने ।
सर्वपापं क्षयं यान्ति सर्वरोगैर्विमुच्यते ॥ ३

संग्रामे तु रणे घोरे समुद्रे त्वं च दुस्तरे ।
संसारभूतये देव पण्डिताय नमोस्तु ते ॥ ४

भानुभास्करमार्त्तण्ड-चण्डरस्मि दिवाकरः ।
आयुरारोग्यसौभाग्यं पुत्रं देहि नमोस्तु ते ॥ ५

एकभक्तं सदाकाले कर्त्तव्यं रविवासरे ।
धूपनैवेद्यसंयुक्ते पद्मप्रभु(भ?)जिनमर्च्चयेत् ॥ ६

तस्य महात्म्यमित्येवं फलं प्राप्नोति मानवः ।
व्याधिदुःखं न दारिद्र्यं नो भवन्ति कदाचन ॥ ७

सूर्याष्टकं पठते नित्यं लभते श्रीसुखप्रदम् ।
भद्रबाहुरुवाचेदं पञ्चम श्रुतकेवली ॥ ८

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्त्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया

जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित

द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्त्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला

मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

ललिता

श्री
श्लोको
शङ्ख
शरभललित
शर्करी
शशिलेखा
शशिवदना
शशीकला
शार्दूलविक्रीडित
शालिनी
शिखरिणी
शुद्धविराट्
शोभा
श्येनी

संगतक
सान्द्रपदं
सिंहोद्धता
सिद्धि
सुदन्त
सुधा
सुधाकळश
सुन्दरम्
सुप्रभा
सुभद्रामालिनी
सुमति
सुमुख
सुवदना
सोपानक
सोमराजी
सौभाग्यविमल
स्रग्धरा
स्रग्विणी
स्त्री
स्वागता

हंसमाला
हंसलयं
हंसी
हक्काषट्पदी
हरिगीत
हरिणी

वंशपत्रप्रतितं
वंशस्थ
वक्त्र
वनमञ्जरी
वसन्तचामर
वसन्ततिलका
वस्तु
वस्तुवदन
वाणिनी
वानवासिका
विद्युद्विलसित
विद्युन्माला
विभावरी
विभ्रमगति
वियोगनी
विषम
वेगवती
वेष्टक
वैतालीय
वैश्वदेवी
वृन्दारक

# स्तोत्रसंदेशमाला


१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर–गणधराणां स्तोत्राणि
५ कल्याणक–छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि –१
१० श्रीपार्श्वनाथजिनस्तोत्राणि –२
११ श्रीपार्श्वनाथजिनस्तोत्राणि –३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव–देवीनां स्तोत्राणि
१८ पू.आचार्यादिस्तोत्रमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २